# અહો! શ્રુતજ્ઞાનમ્
## ગ્રંથ જીર્ણોદ્ધાર




-: સંયોજક :-

**શ્રી આશાપૂરણ પાર્શ્વનાથ જૈન જ્ઞાનભંડાર**

શા. વિમળાબેન સરેમલ જવેરચંદજી બેડાવાળા ભવન

હીરાજૈન સોસાયટી, સાબરમતી, અમદાવાદ-૩૮૦૦૦૫.

મો. ૯૪૨૬૫ ૮૫૯૦૪ (ઓ.) ૦૭૯-૨૨૧૩૨૫૪૩

# “અહો શ્રુતજ્ઞાનમ્” ગ્રંથ જીર્ણોધ્ધાર ૧૦૫

## જૈન સ્તોત્ર સંચય ૧-૨-૩

: દ્રવ્ય સહાયક :

કચ્છવાગડ દેશોદ્ધારક અધ્યાત્મયોગી
પૂ.આ.શ્રી કલાપૂર્ણસૂરીશ્વરજી મ.સા.ના શિષ્યરત્ન
ગચ્છનાયક પ.પૂ. આચાર્ય શ્રીમદ્વિજય કલાપ્રભસૂરિશ્વરજી મ.સા.ના
આજ્ઞાવર્તિની પૂજ્ય સાધ્વીજી શ્રી મયૂરકલાશ્રીજી મ.સા.ની પ્રેરણાથી
શા. વિમળાબેન સરેમલ જવેરચંદજી બેડાવાળા
આરાધના ભવનના જ્ઞાનખાતાની ઉપજમાંથી

: સંયોજક :

શાહ બાબુલાલ સરેમલ બેડાવાળા
શ્રી આશાપૂરણ પાર્શ્વનાથ જૈન જ્ઞાનભંડાર
શા. વીમળાબેન સરેમલ જવેરચંદજી બેડાવાળા ભવન
હીરાજૈન સોસાયટી, સાબરમતી, અમદાવાદ-380005
(મો.) 9426585904 (ઓ.) 22132543

સંવત ૨૦૬૭ ઈ.સ. ૨૦૧૧

"Aho Shrut Gyanam"

## અહો શ્રુતજ્ઞાનમ્ ગ્રંથ જીર્ણોદ્ધાર – સંવત ૨૦૬૫ (ઈ. ૨૦૦૯)– સેટ નં-૧

| ક્રમાંક | પુસ્તકનું નામ | કર્તા-ટીકાકાર-સંપાદક | પૃષ્ઠ |
|---|---|---|---|
| 001 | श्री नंदीसूत्र अवचूरी | पू. विक्रमसूरिजीम.सा. | 238 |
| 002 | श्री उत्तराध्ययन सूत्र चूर्णी | पू. जिनदासगणिचूर्णीकार | 286 |
| 003 | श्री अर्हद्गीता-भगवद्गीता | पू. मेघविजयजी गणिम.सा. | 84 |
| 004 | श्री अर्हच्चूडामणि सारसटीकः | पू. भद्रबाहुस्वामीम.सा. | 18 |
| 005 | श्री यूक्ति प्रकाशसूत्रं | पू. पद्मसागरजी गणिम.सा. | 48 |
| 006 | श्री मानतुङ्गशास्त्रम् | पू. मानतुंगविजयजीम.सा. | 54 |
| 007 | अपराजितपृच्छा | श्री बी. भट्टाचार्य | 810 |
| 008 | शिल्प स्मृति वास्तु विद्यायाम् | श्री नंदलाल चुनिलालसोमपुरा | 850 |
| 009 | शिल्परत्नम् भाग-१ | श्रीकुमार के. सभात्सवशास्त्री | 322 |
| 010 | शिल्परत्नम् भाग-२ | श्रीकुमार के. सभात्सवशास्त्री | 280 |
| 011 | प्रासादतिलक | श्री प्रभाशंकर ओघडभाई | 162 |
| 012 | काश्यशिल्पम् | श्री विनायक गणेश आपटे | 302 |
| 013 | प्रासादमञ्जरी | श्री प्रभाशंकर ओघडभाई | 156 |
| 014 | राजवल्लभ याने शिल्पशास्त्र | श्री नारायण भारतीगोंसाई | 352 |
| 015 | शिल्पदीपक | श्री गंगाधरजी प्रणीत | 120 |
| 016 | वास्तुसार | श्री प्रभाशंकर ओघडभाई | 88 |
| 017 | दीपार्णव उत्तरार्ध | श्री प्रभाशंकर ओघडभाई | 110 |
| 018 | જિનપ્રાસાદ માર્તણ્ડ | શ્રી નંદલાલ ચુનીલાલસોમપુરા | 498 |
| 019 | जैन ग्रंथावली | श्री जैन श्वेताम्बरकोन्फ्रन्स | 502 |
| 020 | હીરકલશ જૈનજ્યોતિષ | શ્રી હિમ્મતરામમહાશંકર જાની | 454 |
| 021 | न्यायप्रवेशः भाग-१ | श्री आनंदशंकर बी.ध्रुव | 226 |
| 022 | दीपार्णव पूर्वार्ध | श्री प्रभाशंकर ओघडभाई | 640 |
| 023 | अनेकान्त जयपताकाख्यं भाग-१ | पू. मुनिचंद्रसूरिजीम.सा. | 452 |
| 024 | अनेकान्त जयपताकाख्यं भाग-२ | श्री एच. आर. कापडीआ | 500 |
| 025 | प्राकृत व्याकरण भाषांतर सह | श्री बेचरदास जीवराजदोशी | 454 |
| 026 | तत्त्पोपप्लवसिंहः | श्री जयराशी भट्ट बी. भट्टाचार्य | 188 |
| 027 | शक्तिवादादर्शः | श्री सुदर्शनाचार्यशास्त्री | 214 |

| | | | |
|---|---|---|---|
| 028 | क्षीरार्णव | श्री प्रभाशंकर ओघडभाई | 414 |
| 029 | वेधवास्तु प्रभाकर | श्री प्रभाशंकर ओघडभाई | 192 |
| 030 | शिल्परत्नाकर | श्री नर्मदाशंकरशास्त्री | 824 |
| 031 | प्रासाद मंडन | पं. भगवानदास जैन | 288 |
| 032 | श्री सिद्धहेम बृहद्वृत्ति बृहन्न्यास अध्याय१ | पू. लावण्यसूरिजीम.सा. | 520 |
| 033 | श्री सिद्धहेम बृहद्वृत्ति बृहन्न्यास अध्याय२ | पू. लावण्यसूरिजीम.सा. | 578 |
| 034 | श्री सिद्धहेम बृहद्वृत्ति बृहन्न्यास अध्याय३ (१) | पू. लावण्यसूरिजीम.सा. | 278 |
| 035 | श्री सिद्धहेम बृहद्वृत्ति बृहन्न्यास अध्याय३ (२) (३) | पू. लावण्यसूरिजीम.सा. | 252 |
| 036 | श्री सिद्धहेम बृहद्वृत्ति बृहन्न्यास अध्याय५ | पू. लावण्यसूरिजीम.सा. | 324 |
| 037 | વાસ્તુનિઘંટુ | પ્રભાશંકર ઓઘડભાઈ સોમપુરા | 302 |
| 038 | તિલકમઞ્જરી ભાગ-૧ | પૂ. લાવણ્યસૂરિજી | 196 |
| 039 | તિલકમઞ્જરી ભાગ-૨ | પૂ. લાવણ્યસૂરિજી | 190 |
| 040 | તિલકમઞ્જરી ભાગ-૩ | પૂ. લાવણ્યસૂરિજી | 202 |
| 041 | સપ્તસન્ધાન મહાકાવ્યમ્ | પૂ. વિજયઅમૃતસૂરિશ્વરજી | 480 |
| 042 | સપ્તભઙ્ગીમિમાંસા | પૂ. પં. શિવાનન્દવિજયજી | 228 |
| 043 | ન્યાયાવતાર | સતિષચંદ્ર વિદ્યાભૂષણ | 60 |
| 044 | વ્યુત્પત્તિવાદ ગુઢાર્થતત્ત્વાલોક | શ્રી ધર્મદત્તસૂરિ (બચ્છા ઝા) | 218 |
| 045 | સામાન્યનિર્યુક્તિ ગુઢાર્થતત્ત્વાલોક | શ્રી ધર્મદત્તસૂરિ (બચ્છા ઝા) | 190 |
| 046 | સપ્તભઙ્ગીનયપ્રદીપ બાલબોધિનીવિવૃત્તિઃ | પૂ. લાવણ્યસૂરિજી | 138 |
| 047 | વ્યુત્પત્તિવાદ શાસ્ત્રાર્થકલા ટીકા | શ્રીવેણીમાધવ શાસ્ત્રી | 296 |
| 048 | નયોપદેશ ભાગ-૧ તરઙ્ગિણીતરણી | પૂ. લાવણ્યસૂરિજી | 210 |
| 049 | નયોપદેશ ભાગ-૨ તરઙ્ગિણીતરણી | પૂ. લાવણ્યસૂરિજી | 274 |
| 050 | ન્યાયસમુચ્ચય | પૂ. લાવણ્યસૂરિજી | 286 |
| 051 | સ્યાદ્યાર્થપ્રકાશઃ | પૂ. લાવણ્યસૂરિજી | 216 |
| 052 | દિન શુદ્ધિ પ્રકરણ | પૂ. દર્શનવિજયજી | 532 |
| 053 | બૃહદ્ ધારણા યંત્ર | પૂ. દર્શનવિજયજી | 113 |
| 054 | જ્યોતિર્મહોદય | સં. પૂ. અક્ષયવિજયજી | 112 |

## અહો શ્રુતજ્ઞાનમ્ ગ્રંથ જીર્ણોદ્ધાર – સંવત ૨૦૬૬ (ઈ. ૨૦૧૦)– સેટ નં-૨

| ક્રમ | પુસ્તકનું નામ | ભાષા | કર્ત્તા-ટીકાકાર-સંપાદક | પૃષ્ઠ |
|---|---|---|---|---|
| 055 | श्री सिद्धहेम बृहद्वृत्ति बृहन्न्यास अध्याय-६ | सं | पू. लावण्यसूरिजीम.सा. | 296 |
| 056 | विविध तीर्थ कल्प | सं | पू. जिनविजयजी म.सा. | 160 |
| 057 | ભારતીય જૈન શ્રમણ સંસ્કૃતિ અને લેખનકળા | ગુજ. | पू. पूण्यविजयजी म.सा. | 164 |
| 058 | सिद्धान्तलक्षणगूढार्थ तत्त्वलोकः | सं | श्री धर्मदत्तसूरि | 202 |
| 059 | व्याप्ति पञ्चक विवृत्ति टीका | सं | श्री धर्मदत्तसूरि | 48 |
| 060 | જૈન સંગીત રાગમાળા | ગુ. | श्री मांगरोळ जैन संगीत मंडळी | 306 |
| 061 | चतुर्विंशतीप्रबन्ध (प्रबंध कोश) | सं | श्री रसिकलाल एच. कापडीआ | 322 |
| 062 | व्युत्पत्तिवाद आदर्श व्याख्यया संपूर्ण ६ अध्याय | सं | श्री सुदर्शनाचार्य | 668 |
| 063 | चन्द्रप्रभा हेमकौमुदी | सं | पू. मेघविजयजी गणि | 516 |
| 064 | विवेक विलास | सं/ગુ. | श्री दामोदर गोविंदाचार्य | 268 |
| 065 | पञ्चशती प्रबोध प्रबंध | सं | पू. मृगेन्द्रविजयजी म.सा. | 456 |
| 066 | सन्मतितत्त्वसोपानम् | सं | पू. लब्धिसूरिजी म.सा. | 420 |
| 067 | ઉપદેશમાલા દોઘટ્ટી ટીકા ગુર્જરાનુવાદ | ગુજ. | पू. हेमसागरसूरिजी म.सा. | 638 |
| 068 | मोहराजापराजयम् | सं | पू. चतुरविजयजी म.सा. | 192 |
| 069 | क्रियाकोश | सं/हिं | श्री मोहनलाल बांठिया | 428 |
| 070 | कालिकाचार्यकथासंग्रह | सं/ગુ. | श्री अंबालाल प्रेमचंद | 406 |
| 071 | सामान्यनिरुक्ति चंद्रकला कलाविलास टीका | सं. | श्री वामाचरण भट्टाचार्य | 308 |
| 072 | जन्मसमुद्रजातक | सं/हिं | श्री भगवानदास जैन | 128 |
| 073 | मेघमहोदय वर्षप्रबोध | सं/हिं | श्री भगवानदास जैन | 532 |
| 074 | જૈન સામુદ્રિકનાં પાંચ ગ્રંથો | ગુજ. | श्री हिम्मतराम महाशंकर जानी | 376 |
| 075 | જૈન ચિત્ર કલ્પદ્રૂમ ભાગ-૧ | ગુજ. | श्री साराभाई नवाब | 374 |

| | | | | |
|---|---|---|---|---|
| 076 | જૈન ચિત્ર કલ્પદ્રૂમ ભાગ-૨ | ગુજ. | श्री साराभाई नवाब | 238 |
| 077 | સંગીત નાટ્ય રૂપાવલી | ગુજ. | श्री विद्या साराभाई नवाब | 194 |
| 078 | ભારતનાં  જૈન તીર્થો અને તેનું શિલ્પસ્થાપત્ય | ગુજ. | श्री साराभाई नवाब | 192 |
| 079 | શિલ્પ ચિન્તામણિ ભાગ-૧ | ગુજ. | श्री मनसुखलाल भुदरमल | 254 |
| 080 | બૃહદ્ શિલ્પ શાસ્ત્ર ભાગ-૧ | ગુજ. | श्री जगन्नाथ अंबाराम | 260 |
| 081 | બૃહદ્ શિલ્પ શાસ્ત્ર ભાગ-૨ | ગુજ. | श्री जगन्नाथ अंबाराम | 238 |
| 082 | બૃહદ્ શિલ્પ શાસ્ત્ર ભાગ-3 | ગુજ. | श्री जगन्नाथ अंबाराम | 260 |
| 083 | આયુર્વેદના અનુભૂત પ્રયોગો ભાગ-૧ | ગુજ. | पू. कान्तिसागरजी | 114 |
| 084 | કલ્યાણ કારક | ગુજ. | श्री वर्धमान पार्श्वनाथ शास्त्री | 910 |
| 085 | विश्वलोचन कोश | सं./हिं | श्री नंदलाल शर्मा | 436 |
| 086 | કથા રત્ન કોશ ભાગ-1 | ગુજ. | श्री बेचरदास जीवराज दोशी | 336 |
| 087 | કથા રત્ન કોશ ભાગ-2 | ગુજ. | श्री बेचरदास जीवराज दोशी | 230 |
| 088 | હસ્તસઞ્જીવનમ્ | सं. | पू. मेघविजयजीगणि | 322 |
| 089 | ઐન્દ્રચતુર્વિંશતિકા | सं. | पू.यशोविजयजी, पू. पुण्यविजयजी | 114 |
| 090 | સમ્મતિ તર્ક મહાર્ણવાવતારિકા | सं. | आचार्य श्री विजयदर्शनसूरिजी | 560 |

# श्री आशापूरण पार्श्वनाथ जैन ज्ञानभंडार

संयोजक – शाह बाबुलाल सरेमल - (मो.) 9426585904 (ओ.) 22132543 - ahoshrut.bs@gmail.com
शाह वीमळाबेन सरेमल जवेरचंदजी बेडावाळा भवन
हीराजैन सोसायटी, रामनगर, साबरमती, अमदावाद-05.

## अहो श्रुतज्ञानम् ग्रंथ जीर्णोद्धार – संवत २०६७ (ई. 2011) सेट नं.-३

प्रायः अप्राप्य प्राचीन पुस्तकों की स्केन डीवीडी बनाई उसकी सूची। *यह पुस्तके www.jainelibrary.org वेबसाइट से भी डाउनलोड कर सकते हैं।*

| क्रम | पुस्तक नाम | कर्त्ता/टीकाकार | भाषा | संपादक / प्रकाशक | पृष्ठ |
|---|---|---|---|---|---|
| 91 | स्याद्वाद रत्नाकर भाग-१ | वादिदेवसूरिजी | सं. | मोतीलाल लाघाजी पुना | 272 |
| 92 | स्याद्वाद रत्नाकर भाग-२ | वादिदेवसूरिजी | सं. | मोतीलाल लाघाजी पुना | 240 |
| 93 | स्याद्वाद रत्नाकर भाग-३ | वादिदेवसूरिजी | सं. | मोतीलाल लाघाजी पुना | 254 |
| 94 | स्याद्वाद रत्नाकर भाग-४ | वादिदेवसूरिजी | सं. | मोतीलाल लाघाजी पुना | 282 |
| 95 | स्याद्वाद रत्नाकर भाग-५ | वादिदेवसूरिजी | सं. | मोतीलाल लाघाजी पुना | 118 |
| 96 | पवित्र कल्पसूत्र | पुण्यविजयजी | सं./अं | साराभाई नवाब | 466 |
| 97 | समराङ्गण सूत्रधार भाग-१ | भोजदेव | सं. | टी. गणपति शास्त्री | 342 |
| 98 | समराङ्गण सूत्रधार भाग-२ | भोजदेव | सं. | टी. गणपति शास्त्री | 362 |
| 99 | भुवनदीपक | पद्मप्रभसूरिजी | सं. | वेंकटेश प्रेस | 134 |
| 100 | गाथासहस्त्री | समयसुंदरजी | सं. | सुखलालजी | 70 |
| 101 | भारतीय प्राचीन लिपीमाला | गौरीशंकर ओझा | हिन्दी | मुन्शीराम मनोहरराम | 316 |
| 102 | शब्दरत्नाकर | साधुसुन्दरजी | सं. | हरगोविन्ददास बेचरदास | 224 |
| 103 | सुबोधवाणी प्रकाश | न्यायविजयजी | सं./गु | हेमचंद्राचार्य जैन सभा | 612 |
| 104 | लघु प्रबंध संग्रह | जयंत पी. ठाकर | सं. | ओरीएन्ट इस्टी. बरोडा | 307 |
| 105 | जैन स्तोत्र संचय-१-२-३ | माणिक्यसागरसूरिजी | सं. | आगमोद्धारक सभा | 250 |
| 106 | सन्मतितर्क प्रकरण भाग-१,२,३ | सिद्धसेन दिवाकर | सं. | सुखलाल संघवी | 514 |
| 107 | सन्मतितर्क प्रकरण भाग-४,५ | सिद्धसेन दिवाकर | सं. | सुखलाल संघवी | 454 |
| 108 | न्यायसार - न्यायतात्पर्यदीपिका | सतिषचंद्र विद्याभूषण | सं. | एसियाटीक सोसायटी | 354 |

| | | | | | |
|---|---|---|---|---|---|
| 109 | जैन लेख संग्रह भाग-१ | पुरणचंद्र नाहर | सं./हि | पुरणचंद्र नाहर | 337 |
| 110 | जैन लेख संग्रह भाग-२ | पुरणचंद्र नाहर | सं./हि | पुरणचंद्र नाहर | 354 |
| 111 | जैन लेख संग्रह भाग-३ | पुरणचंद्र नाहर | सं./हि | पुरणचंद्र नाहर | 372 |
| 112 | जैन धातु प्रतिमा लेख भाग-१ | कांतिसागरजी | सं./हि | जिनदत्तसूरि ज्ञानभंडार | 142 |
| 113 | जैन प्रतिमा लेख संग्रह | दौलतसिंह लोढा | सं./हि | अरविन्द धामणिया | 336 |
| 114 | राधनपुर प्रतिमा लेख संदोह | विशालविजयजी | सं./गु | यशोविजयजी ग्रंथमाळा | 364 |
| 115 | प्राचिन लेख संग्रह-१ | विजयधर्मसूरिजी | सं./गु | यशोविजयजी ग्रंथमाळा | 218 |
| 116 | बीकानेर जैन लेख संग्रह | अगरचंद नाहटा | सं./हि | नाहटा ब्रधर्स | 656 |
| 117 | प्राचीन जैन लेख संग्रह भाग-१ | जिनविजयजी | सं./हि | जैन आत्मानंद सभा | 122 |
| 118 | प्राचिन जैन लेख संग्रह भाग-२ | जिनविजयजी | सं./हि | जैन आत्मानंद सभा | 764 |
| 119 | गुजरातना ऐतिहासिक लेखो-१ | गिरजाशंकर शास्त्री | सं./गु | फार्बस गुजराती सभा | 404 |
| 120 | गुजरातना ऐतिहासिक लेखो-२ | गिरजाशंकर शास्त्री | सं./गु | फार्बस गुजराती सभा | 404 |
| 121 | गुजरातना ऐतिहासिक लेखो-३ | गिरजाशंकर शास्त्री | सं./गु | फार्बस गुजराती सभा | 540 |
| 122 | ऑपरेशन इन सर्च ऑफ संस्कृत मेन्यु. इन मुंबई सर्कल-१ | पी. पीटरसन | अं. | रॉयल एशियाटीक जर्नल | 274 |
| 123 | ऑपरेशन इन सर्च ऑफ संस्कृत मेन्यु. इन मुंबई सर्कल-४ | पी. पीटरसन | अं. | रॉयल एशियाटीक जर्नल | 414 |
| 124 | ऑपरेशन इन सर्च ऑफ संस्कृत मेन्यु. इन मुंबई सर्कल-५ | पी. पीटरसन | अं. | रॉयल एशियाटीक जर्नल | 400 |
| 125 | कलेक्शन ऑफ प्राकृत एन्ड संस्कृत इन्स्क्रीप्शन्स | पी. पीटरसन | अं. | भावनगर आर्चीऑलॉजीकल डिपार्टमेन्ट, भावनगर | 320 |
| 126 | विजयदेव माहात्म्यम् | जिनविजयजी | सं. | जैन सत्य संशोधक | 148 |

श्री आगमोद्धारकग्रन्थमालाया एकादशं रत्नम्

ॐ नमो जिनाय

आगमोद्धारक-आचार्यप्रवर-श्री० आनन्दसागरसूरीश्वरेभ्यो नमः

# जैनस्तोत्रसञ्चयस्य

## प्रथमो विभागः

संशोधक :-

परमपूज्य-गच्छाधिपति

आचार्यश्रीमन्माणिक्यसागरसूरिः

द्रव्यसहायक :-

मुनिश्रीलाभसागरमहाराजोपदेशाच्छाणीग्रामस्थजैनसंघः ॥

प्रतय ५००—मूल्यम् रु. १-०

वीर सं. २४८६—वि. सं. २०१६

प्रकाशक :-
रमणलाल जयचन्द शाह
ठे. शेठ मीठाभाइ कल्याणचंदनी पेढी
कपडवंज (जि. खेडा)

मुद्रक :-
रमणलाल नानालाल शाह
अशोक प्रिन्टरी रावपुरा
वडोदरा

"Aho Shrut Gyanam"

# किञ्चिद्वक्तव्यम्

अयि विबुधाः ! जिनवरभक्तिरससक्तचेतसां भवतां करसरोरुहे जैनस्तोत्रसञ्चयस्य प्रथमोऽयं विभागः सादरं समर्प्यते । अत्र तिस्रः कृतयः सन्ति । तत्र प्रथमा अवचूरियुता अष्टादशस्तोत्री । अत्र युष्मच्छब्दप्रयोगगर्भा नव स्तवाः तथा अस्मच्छब्दप्रयोगगर्भा नव स्तवाः सन्ति । एतन्मूलस्य कर्ता श्रीसोमसुन्दरसूरिः तत्सत्ताकालश्च वि० पञ्चदशशताब्दीरूपः, तथा अवचूरेः कर्ता श्रीसोमसुन्दरसूरिशिष्यः सोमगणिः तत्सत्ताकालश्च वि० पञ्चदशशताब्दीरूपः । एतच्च एतद्ग्रन्थान्तभागावलोकनात् सुस्पष्टमेव । द्वितीया पंचकल्लाणं थोत्तं–अत्र प्रथमतीर्थकरस्य श्रीऋषभदेवस्य पञ्चभिः कल्याणकैः स्तुतिः कृताऽस्ति । अस्य कर्तृनामप्रभृति न ज्ञायते, किन्तु अस्य वि० १२८५ वर्षे लिखिता ताडपत्रीया प्रतिः छाणीग्रामस्थज्ञानमन्दिरे समस्ति, तेन एतत् कर्त्ता वि० १२८५ वर्षात् प्राक्कालीन इति तु स्फुटमेव । तथा तृतीया कृतिः अवचूरिसंयुतो महावीरस्तवः । अस्य कर्त्ता पादलिप्तसूरिः । एतच्च

"Aho Shrut Gyanam"

एतत्स्तवान्ते ' पालित्तय ' पदोल्लेखात् स्फुटमेव। अवचूरिश्च अस्योपरि १३८० वर्षे श्रीजिनप्रभसूरिभिः कृताया वृत्तेः सङ्क्षिप्य कृताऽस्ति, परं तत्कर्तृनामादि न ज्ञायते। एतासां तिसृणां कृतीनां मुद्रणयोग्यपत्राणि ( प्रेसकोपी ) पू० आगमोद्धारक-आचार्यप्रवर-श्रीआनन्दसागरसूरीश्वरैः मत्पार्श्वे-वि० २००५ वर्षे कारितानि स्वयं च शोधितानि जैनानन्दपुस्तकालयात् प्राप्तानि तदाधारेण संशोध्य प्रकाशीकृताः कृतयः। इति निवेदयति.

चन्दनसागरगणि २०१६

कार्तिकशुक्लाएकादशी वटपद्रे

## साभार स्वीकार

श्री वडोदरा मध्ये जानीशेरी श्राविकाउपाश्रयना ज्ञानखातेथी रु. ५१. श्राविका हसमुखबहेने अर्पण कर्या.

व्यवस्थापक :

रमणलाल जयचन्द शाह

"Aho Shrut Gyanam"

# शुद्धिपत्रक

| पृष्ठम् | पंक्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १२ | १२ | ०राया | ०रायां |
| १५ | १३ | ०पार्श्वौ | ०पार्श्वौ |
| १९ | ८ | विषया | विषयाः |
| २० | ९ | स्तुताः | स्तुता |
| २४ | १७ | ०नग्नर० | नगर० |
| २५ | ५ | ०ऽन्या | ऽन्यो । |
| २६ | ९ | निवृताः | निर्वृताः |
| २६ | १५ | छात्रैः | छत्रैः |
| २७ | १९ | भयूर० | मयूर० |
| २९ | १८ | सन्ता, | सन्तो |
| ३१ | ११ | ०निदेशः | ०निर्देशः |
| ३७ | १४ | ययास्ता० | ययोस्ता० |
| ३९ | ६ | लज्जोध | लज्जौघ |
| ४० | १५ | ०न्तया० | ०न्तयो० |
| ४२ | ५ | पाठा | पाठां |
| ४२ | १४ | ययोत्रृ० | ययोर्वृ० |
| ४३ | १ | ०ध्योः प्रीता, | ०ध्योः, प्रीता |
| ४५ | २ | तुभ्यं | तुल्यं |
| ४६ | १८ | इतिच० | ईतिब० |
| ४८ | ५ | सदग् । कमलकुमुदेषु | सदृक्कमलकुमुदेषु । |
| ५१ | ७ | ०गुरुत्त० | ०गुरूत्त० |
| ५५ | २० | सवका० | सक्की० |
| ५८ | ९ | ०दिद्ध | ०दिद्धं |

"Aho Shrut Gyanam"

ॐ नमो जिनाय

आगमोद्धारक आचार्यप्रवरश्री० आनन्दसागरसूरीश्वरेभ्यो नमः

श्रीसोमदेवगणिनिर्मितावचूरिसमेता

आचार्यपुङ्गव-श्री० सोमसुन्दरसूरिरचिता

युष्मदस्मच्छब्दरूपरचनाश्चिता

# अष्टादशस्तोत्री ॥

स्तुवे पार्श्वं जिनाधीशं, पार्श्वयक्षोपसेवितम् ।
प्रणतानल्पसङ्कल्प-दानकल्पद्रुमोपमम् ॥१॥
पूजितत्वं जनः पूज्यः, स्यात् सर्वजगतामपि
हीलितत्वां तु नैवैति, दुःखोच्छेदः कदाचन ॥२॥

अवचूरिः-बहुव्रीहेरेकवचने युष्मच्छब्दस्यैक १ द्वि२ बहु३ वचनैः प्रत्येकं त्रयः स्तवाः, बहुव्रीहेर्द्विवचनेपि युष्मच्छब्दस्यैक १ द्वि २ बहु ३ वचनैश्च प्रत्येकं त्रयः स्तवाः, बहुवचनेपि युष्मच्छब्दस्यैक १ द्वि२ बहु ३ वचनैः प्रत्येकं त्रयः, एवं युष्मच्छब्दप्रयोगगर्भा नव स्तवाः । एवमेव चाऽस्मच्छब्दप्रयोगगर्भा अपि नव । सर्वे अष्टादश इति रचनाक्रमः ।

स्तुवे०-प्रणतानामनल्पाः सङ्कल्पाश्चिन्तितानि तेषां दाने कल्पद्रुम उपमा-उपमानं यस्य स, तम् ॥१॥

पूजितः त्वं येन स पूजितत्वं, त्वां मा इत्यादिषु ' त्वमौ प्रत्यय०' सिद्धहेम० ।२।१।११॥ इत्यस्य, प्रिया यूयं यस्य स

"Aho Shrut Gyanam"

प्रियत्वमित्यत्र 'त्वमह' मित्यस्य च सावकाशत्वात्, पूजितत्व-मित्यादिषु उभयोः सूत्रयोः स्पर्द्धे परत्वात् ' त्वमहं सिना० ' । २ । १ । १२ । इत्येव प्रवर्त्तते. ' स्पर्द्धे पर ' इतिन्यायात्। एवं तुभ्यं यूयं तवाद्यादेशेष्वपि सावकाशत्वादि वाच्यं । हीलण् चुरादिधातुः बहुलमेव निदर्शनमितिवचनात् दशवैकालिक-बृहद्वृत्तौ 'हीलन्ति मिच्छं पडिवज्जमाणा' इत्यादिव्याख्यायां हीलन्तीतिप्रयोगदर्शनाच्च, हीलितः त्वं येन स तं, विशेषण-बलाज्जनमिति विशेष्यं गम्यते। तुः पूजाविपर्ययकर्त्तुः फलविपर्ययं द्योतयति । एवोऽवधारणे । दुःखोच्छेदः कदाचन नैवेति । आङ्पूर्वस्य इणुधातोस्तिबि ' अवर्णस्येवर्णादिना० ' । १ । २ । ४ । इत्यतः परत्वात्पूर्वं ' नामिनो गुणोऽक्ङिति । ३ । ४ । ७१ । इति गुणे ' उपसर्गस्यानिणिधेदोति ' । १ । २ । १९ । इत्यत्र इणुवर्जनात् आलोपाभावे ' ऐदौत्स-न्ध्यक्षरैः ' ।१।२।१२। इति ऐकारे, ऐति इतिरूपम् ॥ २ ॥

**नाथीकृतत्वया देव !, भवारिर्जीयते क्षणात् ।**
**हर्षाद्धीक्षिततुभ्यं च, स्पृहयेन् मुक्तिकामिनी ॥३॥**

अव०—अनाथो नाथः क्रियसे स्म 'कृभ्वस्तिभ्यां कर्मकर्तृभ्यां प्रागतत्तत्त्वे च्विः' । ७ । २ । १२६ । इति च्वौ 'ईश्च्वाववर्ण-स्यानव्ययस्य ' । ४ । ३ । १११ । इति ईकारे नाथीकृतः, नाथीकृतस्त्वं येन स, तेन, 'त्वमौ प्रत्यय०' ।२।१।११। इति युष्मदो मान्तावयवस्य त्वादेशे ' लुगस्य. ' ।२।१।११३। इति

"Aho Shrut Gyanam"

त्वशब्दाकारलोपे अकारसम्बन्धे च ' टाङ्योसि यः ' ।२।१।७। इति दो यः । अरिरिवारिः, भवश्चासावरिश्च 'उपमेयं व्याघ्राद्यैः' ।३।१।१०२। इति कर्मधारयः । एवमन्यत्रापि रूपके। वीक्षितस्त्वं येन स तस्मै, ' त्वमौ प्रत्यय० ' ।२।१।११। इति ' तुभ्यं मह्यं ङया ' ।२।१।१४। इति द्वयोः प्राप्तौ परत्वात्तुभ्यमादेशः । ' स्पृहेर्व्याप्यं वा ' ।२।२।२६। इति सम्प्रदानत्वे चतुर्थी. अदन्तस्य स्पृहधातोर्णिचि अलुक्यपि स्थानिवद्भावाद् गुणाभावः ॥ ३ ॥

**नतत्वत्पुरुषाद्दोषा, रोषाद्या यान्ति दूरतः ।**
**सम्यग्ध्याततव स्वामिन्, सिध्यन्ति च मनोरथाः ॥ ४ ॥**

अव०—नतस्त्वं येन तस्मात्, ' ङसेश्चाद् ' ।२।१।१९। इति अदादेशे ' शेषे लुग् ' ।२।१।८। इति दलुक् ' लुगस्य ' ।२।१।११३। इति अलुक् । पुरुषादित्यत्र दूरशब्दयोगसद्भावाद् ' आराद्थैः ' ।२।२।७८। इति पञ्चमी । सम्यक् ध्यातस्त्वं येन, तस्य । अत्रापि ' त्वमौ प्रत्यय० ' ।२।१।११। इति ' तव मम ' ।२।१।१५। इति सूत्रयोः प्राप्तौ परत्वात् तवादेशः। विशेषणबलाज्जनस्येति विशेष्यं ग्राह्यं । एवमग्रेपि ॥ ४ ॥

**स्तुतत्वयि नरे नाथ !, विलसन्त्यखिलाः कलाः।**
**उपमानोपमेयत्वं ! चिरं जिया जिनेश्वर! ॥ ५ ॥**

"Aho Shrut Gyanam"

अव०—स्तुतस्त्वं येन, तस्मिन् । प्राग्वत् त्वादेशे 'टाङ्योसि' ।२।१।७। इति दो यः। अथ सम्बोधने प्रथमैकवचनं, यथा उपमा०—उपमानं च उपमेयश्च त्वं यस्य तत्र स. हे उपमानोपमेयत्वं ! । अनन्यसाधारणस्य तव उपमानं उपमेयश्च त्वमेवासीतिभावः । 'ये देव ! भवतः पादौ, भवत्पादाविवाश्रिताः ' इत्यादिष्विवानन्वयालङ्कारः । 'उपमानोपमेयत्वे एकस्यैवैकवाक्यगेऽनन्वय ' इति काव्यप्रकाशवचनात् । द्व्याश्रये द्वितीयसर्गे ९ वृत्ते प्रेयश्चतस्रः प्रियतिस्र ईशास्तिस्रश्चत 'स्रोपि वधूर्विहाय' अत्र प्रेयश्चतस्रः प्रियतिस्र इति १५ काव्ये 'रात्रौ गतायां वियुतावयीह स्वपत्त्रुवय्यी ' ति, तथा तत्रैव २० काव्ये 'त्वां मां धिगावां च युवां तथाऽस्मान्, युस्मान्न यत्सत्तव सन्ममेशः। अत्र सत्तव सन्ममेति प्रयोगैर्विशेषणं सर्वादिसङ्ख्यं च बहुव्रीहौ ।३।१।१५०। इत्युक्तपूर्वनिपातस्याऽनित्यत्वदर्शनात् न उपमानोपमेयशब्दात् प्राग् युष्मच्छब्दस्य निपातः । एवमन्येष्वप्युदाहरणेषु ज्ञेयं । क्तान्तानां प्रियस्य च 'क्ताः' ।३।१।१५१। 'प्रिय' ।३।१।१५७। इति सूत्राभ्यां युष्मच्छब्दात् प्राग् निपात सिद्ध एव ॥ ५ ॥

युष्मत्पदान्यपदगैकवचःप्रयोगैः,
स्तुत्वेति पार्श्वजिन ! सद्गुणभाजनं त्वाम् ।
एकं प्रभुं त्रिभुवनेऽपि भवे भवेऽहम्,
याचे शिवप्रतिभुवं ननु बोधिलाभम् ॥ ६ ॥

"Aho Shrut Gyanam"

इति युष्मद्बहुव्रीह्येकवचनमयः प्रथमः श्रीपार्श्वस्तवः ॥

अत्र --युष्म० स्पष्टं, नवरं अन्यपदं युष्मच्छब्दादन्यद् बहुव्रीहिसमासे यच्छब्दरूपं विशेष्यपदम् । इत्याद्यस्तत्रावचूरिः॥

शान्तिप्रकरणादुपद्रवोपशमः ॥ अथश्रीअजितशान्तिस्तवः—

**स्मृतिनिर्मितजनशान्ती,**
**महिमाढ्यावजितशान्तिनामानौ ।**
**नविकर्मीकुर्वेऽहं, द्वितीय-**
**षोडशजिनौ समकम् ॥१॥**

अव०--नवनं नविः, 'इकिश्तिव् स्वरूपार्थे' ।५।३।१३८। इति स्तवनमित्यर्थः । नवेः कर्म नविकर्म, अनविकर्म नविकर्म कुर्वे 'कृभ्वस्ती०'ति च्वौ 'नोऽपदस्य तद्धिते' ।७।४।६१। इति नलोप 'ईश्च्वाववर्णस्य०' ।४।३।१११। इति ईकारः ॥ १ ॥

**पुष्पाद्यैर्महितत्वं परभागपरागभाग्भवेन्मर्त्यैः ।**
**वृषभीभूतयुवां श्रीधर्मरथं श्रयति शिवगामी ॥२॥**

अव०—पु०-मह्येथे स्मेति 'तत्साप्यानाप्या०' ।३।३।२१। इति क्ते महितौ, महितौ युवां येन स महितत्वम् । अत्र 'मन्तस्य०' ।२।१।१०। इति 'त्वमहं सिना०' ।२।१।१२। इत्यस्य च प्राप्तौ परत्वात् त्वमहं सिनेत्येव फलति । एवमग्रेऽपि

"Aho Shrut Gyanam"

'मन्तस्ये'ति 'त्वमौ प्रत्यया'विति च परत्वाद् बाधित्वा 'तुभ्यं मह्यं ङया ।२।१।१४। इति, तव मम ।२।१।१५। इति च सूत्रयोरेव फलनमभ्यूह्यं। परभागो-गुणोत्कर्षः, स एव सकलजनाप्यायकत्वात् परागस्तं भजति, भजो विण्। अवृषभौ वृषभौ भवथः स्म, 'गत्यर्थाकर्म०' ।५।१।११। इति कर्त्तरि क्ते वृषभीभूतौ तदुद्धरणसमर्थत्वात् युवां यस्मिन्, स वृषभीभूतः त्वं तं वृष०। मन्ताचयवस्य युवादेशे 'अमौ मः' ।२।१।१६। इति अमो मे 'युष्मदस्मदोः' ।२।१।६। इति आः ॥ २ ॥

प्रिययुवया पुरुषेण,
प्राप्यन्ते शान्ति-कान्ति-धृति-मतयः।
प्रतिपन्नप्रभुतुभ्यं,
जनाय भद्रं भवेन्नूनम् ॥३॥

अव०—प्रिय०—प्रियौ युवां यस्य, तेन। प्रतिपन्नौ प्रभू युवां येन स तस्मै। अत्र युवादेशं बाधित्वा परत्वात्तुभ्यमादेशः। 'तद्भद्रायुष्यक्षेमार्थ०' ।२।२।६६। इति चतुर्थी ॥ ३ ॥

नित्यं मनोधृतयुवन्नुर्नान्यो जगति धन्यमुर्द्धन्यः।
निजवित्तव्ययविषयीकृततव ऋद्धिः प्रवर्द्धत ॥४॥

अव०—नित्यं०—नित्यं मनोधृतौ युवां येन स, तस्मात्। ङसेश्चादित्यादिप्रक्रिया प्राग्वत्। नुरिति नृशब्दात् 'प्रभृत्यन्यार्थ०'

"Aho Shrut Gyanam"

।२।२।७५। इति पञ्चमी । मूर्द्धनि भवो मूर्द्धन्यो-लक्षणोत्कृष्टः, धन्येषु मूर्द्धन्यः । अविषयौ विषयौ क्रियेथे स्म, 'कृभ्वस्ती०'ति च्वौ, ईश्च्वाविति ईकारः । निजवित्तव्ययस्य विषयीकृतौ युवां येन स, तस्य । अत्र युवादेशं बाधित्वा परत्वात्त्वादेशः ॥४॥

ध्यातश्रीविमलाचलतीर्थ-
स्थितयुवयि भव्यता नियमात् ।
हे स्वस्वबोधकयुवाँ ! हृदि
वसतं मे जिनाधिपती ॥ ५ ॥

अव०—ध्यातौ श्रीविमलाचलतीर्थे स्थितौ युवां येन तस्मिन् जने नियमात् भव्यता अस्तीति सम्बन्धः । अभव्यस्य तदसम्भवात् । हे स्व०—वीप्सायां द्वित्वे स्वस्य स्वस्य च बोधकौ युवां ययोः, युवयोः स्वयम्बुद्धत्वादिति भावः । हे स्व० हृदि वसतं । पञ्चमी तं । अत्र स्तवे बहुव्रीह्येकवचने प्रस्तुतेपि सम्बोधने युष्मच्छब्दस्य अन्यपदार्थस्य अभिन्नस्यैव भावाद-न्यपदे एकत्वं न सम्भवतीति तदकरणम् । एवमुत्तरस्तवे एकत्वे प्रस्तुतेपि सम्बोधने बहुवचनमेकत्वासम्भवादेवेति ज्ञेयम् ॥५॥

नूतौ युवामजितशान्तिजिनौ मयेति,
युष्मत्पदद्विवचनान्यपदैकतोक्त्या ।

"Aho Shrut Gyanam"

श्रीनन्दिषेणगणिसंस्तुतपादपद्मौ,

देयास्तमस्तविपदं सुखसम्पदं मे ॥ ६ ॥

इतियुष्मत्पदद्विवचनबहुव्रीह्येकवचनमयो द्वितीयः श्रीअजितशान्तिस्तवः ॥

अव०—श्रीनन्दि०—शत्रुञ्जये श्रीनेमिशिष्यनन्दिषेणगणधरैः यात्रार्थागतैः श्रीअजितशान्तिस्तवकरणात् । पूर्वपूर्वमहर्षिस्तुतत्वोपलक्षणार्थं चेदं । देयास्तं आशीःक्यास्तम् । इति द्वितीयस्तवावचूरिः ॥ २ ॥ अथ साधारणजिनस्तवः—

कल्याणकदिनपञ्चक-

सुरपतिततिविहितदिव्यमहिमानः ।

स्तुतिगोचरीक्रियन्ते,

मया जिना ध्वस्तसमवृजिनाः ॥ १ ॥

अव०—कल्याण०—स्तुतिगोचरीक्रियन्तेऽत्र च्विः ।

हृद्भक्तिगोचरानीत—त्वं स्यादासन्नसिद्धिकः ।

सङ्कटेऽप्युत्कटे ध्यात—युष्मां नायाति दुःखिता ।२।

अव०—हृ०—हृद्भक्तिगोचरं आनीता यूयं येन सः । सामान्येन त्वमहमादेशयोरुक्तत्वेनात्र युष्मद्बहुवचनेपि त्वमादेशः। ध्याता यूयं येन स तं । अत्र समासस्यैकत्वेपि युष्मदो बहुत्वे वृत्तेरेकत्ववृत्त्यभावात् 'त्वमौ प्रत्यय०' २ । १ । ११ । इति न

"Aho Shrut Gyanam"

त्वादेशः । एवमग्रेपि ज्ञेयम् ॥ २ ॥

प्रासादस्थापितस्वर्ण-रूप्यादिमययुष्मया ।
निर्मीयन्ते नरेणोच्चैः, स्ववशाः सर्वसम्पदः॥ ३ ॥

अव०–प्रासादे स्थापिताः स्वर्णरूप्यादिमया यूयं येन, स तेन ॥ ३ ॥

अङ्गाद्यर्चाराधिततुभ्यं कः श्लाघते न देहभृते ?।
आभरणमालभारीकृतयुष्मद् भाग्यवान् कोऽन्यः ॥ ४ ॥

अव०–अङ्गा०–आदिशब्दादग्रभावौ, तद्विषया अर्चा, मयूरव्यंसकत्वादित्वात् समासे विषयशब्दे लोपे तया. राधेरपरपठितस्य चुरादेः सद्भावात्, आराधिता यूयं येन स तस्मै, श्लाघिक्रियाभिप्रेयत्वात् सम्प्रदाने चतुर्थी । 'तुभ्यं मह्यं ङया' २।१।१४। इतिसामान्योक्तेर्बहुत्वेपि तुभ्यमादेशः । एवं तवादेशेपि वाच्यं । आभरणमालां बिभृथेति आभरणमालभारिणः 'मालेषीकेष्टकस्यान्तेपि भारतुलचिते' २।४।१०२। इति ह्रस्वः। अते ते कृताः च्वौ 'व्यञ्जनस्यान्त ई' ७।२।१२९। इति ईकारं बाधित्वा 'नोऽपदस्य' ७।४।६१। इति नलोपे 'दीर्घश्च्वि०' ४।३।१०८। इति दीर्घत्वे आभरणमालभारीकृता यूयं येन स तस्मात्, 'ङसेश्चादि' त्यादि प्राग्वत् 'प्रभृत्यन्यार्थ०' २।२।७५। इति पञ्चमी ॥ ४ ॥

"Aho Shrut Gyanam"

**अभिष्टुततवाऽष्टापि, सिद्धयः स्युः सहर्द्धयः ।**
**सम्यग् विधिसमाराद्ध-युष्मयि स्युः श्रियः स्थिराः ॥ ५ ॥**

अव०–अभि०–अभिष्टुता यूयं येन तस्य, सिद्धयो लघिमाद्याः, ऋद्धयः आमर्शौषध्याद्याः । सम्यग् विधिना समाराद्धा यूयं येन, तस्मिन् । भिन्नवाक्यत्वेन स्युरित्यस्य न पौनरुक्त्यम् ॥ ५ ॥

**ध्यातृध्येयोभयीभूत–यूयं जीयास्त हे जिनाः ! ।**
**युष्मच्छब्दबहुत्वाऽन्य–पदैकवचनस्तुताः ॥ ६ ॥**

अव०–ध्या०–ध्यातारश्च ध्येयाश्च तेषामुभयं–द्वयं, यथा द्वयत्रयादिशब्दा मुख्यवृत्त्या गुणिनि वर्तमाना अपि विवक्षया गुणेपि वर्त्तन्ते, गुणा त्वयट् तयडित्यादिषु तथोक्तेः । तथा उभयशब्दोऽप्यत्र गुणप्रधानः, 'सूत्रार्थतदुभयविद' इत्यादिप्रयोग-दर्शनाच्च । अतत् तद् भूता यूयं येषां ते, ध्या० सम्बोधने । कोऽर्थः? यथा येषां युष्माकं तीर्थंकराणां श्रीवीरादीनां भावितीर्थकराः पद्मनाभादयो ध्यातारः, युष्माकं तीर्थंकराणां पद्मनाभादीनां श्री-वीरादयो ध्येया भूतपूर्वगत्या इति भाविभूतयोरेकीकरणेन ध्यातृध्येयोभयीभूता यूयं । यद्वा एकत्रैवोभयम् । यथा पद्मनाभो जिनध्याता भूतपूर्वतया श्रीवीरध्यातृत्वात्, ध्येयश्च परेषां द्रव्यजिनानां इति, यथा पद्मनाभजिनो जिनध्याता जिनध्येयश्च

"Aho Shrut Gyanam"

तथा श्रीऋषभाद्योपि । जीयास्तेति आशीर्द्वितीयद्विकबहु-
वचनेन यूयमिति कर्त्ता लभ्यते ॥ ६ ॥

संस्तुत्य भक्तिभरतो वृषभादिमान् श्री-
वीरान्तिमान् जिनपतीनिति तीतदोषान् ।
श्रीज्ञानसागरगतप्रवरार्थसार्थ-
लीलाऽवगाहनकलाबलमेव याचे ॥ ७ ॥

इति युस्मत्पदबहुवचनान्यपदैकवचनगर्भः साधारणजिन-
स्तवस्तृतीयः ॥ ३ ॥ अथ श्रीऋषभस्तवः—

अव०—स्थानाङ्गवृत्तौ 'अतीत इत्यत्र पिधानवदतीत्यकार-
लोपो' इत्युक्तेः तीतशब्दोऽत्र साधुः । तृतीयस्तवावचूरिः ॥३॥

कृपया प्रकटीकृताखिल—व्यवहारोत्तमधर्मसत्पथम् ।
प्रथमं जिननायकं मुदा, विनयेन स्तुतिकर्मतां नये
॥ १ ॥

अव०—कृप०—प्रकटीकृता अखिला व्यवहारस्य उत्तमधर्मस्य
च सत्पथा येन तम् ॥ १ ॥

श्रुतत्वां मे श्रुती धन्ये, दृष्टत्वां चक्षुषी स्तुवे ।
कराभ्यां चर्चितत्वाभ्यां, कृतार्थोऽस्मि
जिनेश्वर! ॥ २ ॥

"Aho Shrut Gyanam"

अव०—श्रुतस्त्वं याभ्यां ते. श्रु० । अत्र बहुव्रीहिद्वित्वेऽपि युष्मच्छब्दस्यैकत्वे वर्त्तनात् न युवादेशः । दृष्टस्त्वं याभ्यां. दृ०। चर्चण् अध्ययने 'भीषि भूषि' ५।३।१०९ । इत्यङि चर्चा–अङ्गसंस्क्रिया, चर्चिक्यं समालभनं चर्चा (अभिधान० श्लो० ६३६) इतिवचनात्, तां कुरुतः णिजि चर्चयतः कर्मणि चर्च्यसे स्म इति चर्चितः, चर्चितस्त्वं याभ्यां ताभ्याम् ॥२॥

अभितः कृपाणधाराप्रतिफलनवशात्त्रि-
रूपितत्वाभ्याम् ।
त्वद्भक्त्या धरणेन्द्रो नमिविनमिभ्यामदाद्
विद्याः ॥ ३ ॥

अव०—अभित उभयत इत्यर्थः, कृपाणधाराया प्रतिफलनस्य–प्रतिबिम्बनस्य वशेन त्रिरूपः क्रियसे णिजि त्रिरूप्यसे स्म क्ते त्रिरूपितः, त्रिरूपितस्त्वं याभ्यां ताभ्यां कर्माभिप्रेयत्वात् सम्प्रदानत्वे चतुर्थी ॥ ३ ॥

जटाभ्यां शोभितस्वर्णवर्ण–स्त्वाभ्यां तवांसयोः ।
श्रीमेरोः पार्श्वयोर्नील–वनालीभ्यामिवाऽभवत् ।४।

अव०—शुभधातोर्णिगि कर्मणि क्ते शोभितस्वर्णवर्णस्त्वं याभ्यां ताभ्यां जटाभ्यामिति, जटे आश्रित्य 'गम्य यपः कर्माधारे' २।२।७४। इति पञ्चमी ॥ ४ ॥

"Aho Shrut Gyanam"

द्रव्यभावतमोरुद्ध–दृष्टेर्दिष्ट्या मम प्रभो ! ।
सूर्येन्द्वोरुदयो भूयात्, स्वविभादर्शितत्वयोः ।५।

अव०-द्रव्यभावौ बाह्यान्तरे ये तमसी, ताभ्यां रुद्धा दृष्टिर्नयनं ज्ञानं च यस्येत्यस्य मम, दिष्ट्येत्यव्ययं सम्मदे। उदयाशिषि हेतुरूपं विशेषणमाह–स्व०स्वविभया दर्शितस्त्वं याभ्यां सूर्येन्दुभ्यां तयोः । इदंतत्वात् 'लघ्वक्षर०' ३।१।१६०। इति इन्दुशब्दस्य प्राग्निपाते प्राप्तेपि धर्मार्थादित्वात् सूर्यशब्दस्य प्राग्निपातोऽभूत् ॥ ५ ॥

जन्मस्नात्रमहानन्द–पदलाभार्हितत्वयोः ।
अष्टापदाद्र्योः केषां न, सतां निविशते मनः ।६।

इति युष्मदेकवचनबहुव्रीहिद्विवचनप्रयोगसुभगः श्रीऋषभस्तवस्तुरीयः

अव०–जन्मस्नात्रं महानन्दपदलाभश्च, ताभ्यां करणभूताभ्य अर्हितः–पूजितः त्वं ययोराधारभूतयोः तौ तयोः, अष्टापदस्य स्वर्णस्य अद्रिर्मेरुः अष्टापदश्चासौ अद्रिश्च कैलासः द्वन्द्वे 'स्यादावसङ्ख्येयः' ३।१।११९। इति एकशेषः, तयोः, नि०–'निविशः' ३।३।२४। इत्यात्मनेपदम् ॥ ६ ॥

युष्मत्पदैकवचनान्यपदद्विवचनवचोविरचनेन ।
स्तुत इति मया प्रदेयाः
प्रवचनचातुर्यमाद्यार्हन्न ॥ ७ ॥

"Aho Shrut Gyanam"

इति तुर्यस्तवावचूरिः ॥ ४ ॥ अथ पार्श्वसुपार्श्वस्तवः—

पार्श्वसुपार्श्वाभिख्यौ फणमणिघृणिगणविभा-
सिताकाशौ ।
स्तोष्ये ऋभुक्षिमुख्यस्तुतपदपद्मौ जिनौ
भक्त्या ॥ १ ॥

अव०–आनुपूर्व्यपेक्षया सुपार्श्वस्य प्राग्निपाते युक्तेपि अल्पस्वरत्वात् पार्श्वशब्दस्य प्राग्निपातः। ऋभुक्षिः मुख्यो येषां ते ऋभुक्षिमुख्या. देवा इति विशेष्यमनुक्तमपि प्रकरणाद् लभ्यते. 'संशय्य कर्णादिषु तिष्ठते यः' इत्यादिष्विव ॥ १ ॥

स्यातां प्रमोदपुष्ट्या दृष्टयुवां स्त्रीनरौ विमलदृष्टी ।
मधुरस्वरगीतयुवां वाग्माधुर्यं सदाऽभ्येति ॥ २ ॥

अव०–दृष्टौ युवां याभ्यां तौ, द्वितीयाद्विवचनम् ॥ २ ॥

उपासितयुवाभ्यां च, लभ्यते भुवनेशता ।
भक्त्या प्रणतयुवाभ्यां, वासवोपि नमस्यति। ३ ।

अव०–उपासितौ युवां याभ्यां ताभ्यां। प्रणतौ युवां याभ्यां, कर्माभिप्रेयत्वात् सम्प्रदाने चतुर्थी ॥ ३ ॥

ऊरीकृतयुवाभ्यां नो, दूरे लोकाग्रगं पदम् ।
सुप्रभूतयुवयो–र्दासायन्ते सुरद्रवः ॥ ४ ॥

"Aho Shrut Gyanam"

अव०–ऊरीकृतौ–स्वामितया अङ्गीकृतौ युवां याभ्यां ताभ्यां, 'आराद्‌र्थैः' २।२।७८ इतिपञ्चमी। असुप्रभू सुप्रभू भवथः स्म, च्वौ 'गत्यर्थाकर्मक०' ५।१।११। इति कर्त्तरि क्ते सुप्रभू भूतौ युवां ययोस्तयोः ॥ ४ ॥

मनसि न्यस्तयुवयो–र्लसन्त्यखिलसम्पदः।
विभक्तिसप्तकेनैवं, स्तुतो श्रीजिननायकौ ॥५॥

चतुर्भिः स्त्रीनरावृत्त्या सम्बद्धैःकलापकम्।

अव०–न्यस्तौ युवां याभ्यां तयोः। पाठान्तरे आधेय-युवयोः 'सर्वे दधत्याधेयतां गुणा' इति रूपे आधेयौ युवां ययोस्तयोः स्त्रीनरयोः, सर्वगुणा आधेयतां दधति, तं स्वाधि-करणं कुर्वन्तीतिभावः ॥ ५ ॥

युष्मत्पदान्यपदगद्विवचनगर्भोक्तियुक्तिरम्येण।
स्तवनेन संस्तुतौ स्तां पार्श्वसुपार्श्वौ प्रसन्नौ मे ॥६।

इतियुष्मच्छब्दबहुव्रीहिद्विवचनगर्भः श्रीपार्श्वसुपार्श्वस्तवः॥

अव०–स्ताम्–असक् भुवि, पञ्चमी तां 'श्नास्त्योर्लुक्' ४।२।९०। इति अलुक्। इति पञ्चमस्तवावचूरिः॥

अथ साधारणजिनस्तवः।

कल्पद्रुचिन्तामणिकामधेनु-
मुख्यार्थसार्थाधिकयत्प्रणामान्।

"Aho Shrut Gyanam"

जिनाँस्त्रिलोकीजनितांह्रिपूजान्,

भूजानिवंशप्रभवान्नुवामि ॥ १ ॥

अव०–कल्पश्चासौ द्रुश्च कल्पद्रुः, चिन्तायाः पूरको मणिः चिन्तामणिः, कामस्य पूरिका धेनुरुभयत्र मयूरव्यंसकादित्वात् समासः। भूर्जाया येषां ते भूजानयः 'जायाया जानिः' ७।३।१६४। इति जान्यादेशः। णु०णुधातुः ॥ १ ॥

स्थितनामद्रव्याद्यात्मकयुष्मां रोदसी बुधश्लाघ्ये।
तुष्यन्ति गीतयुष्मां न के नराः किंनरौ श्रुत्वा?
॥ २ ॥

अव०–स्थिता नामद्रव्ये आदिशब्दात् स्थापनाभावौ ते आत्मा–स्वरूपं येषां ते नामद्रव्याद्यात्मका यूयं ययोस्तौ, रोदसी-द्यावाभूम्यौ, किंनरश्च किंनरी च 'पुरुषस्त्रिये'त्येकशेषः ॥ २ ॥

आशाततियुष्माभ्यां स्त्रीनृभ्यां

लभ्यते न किं दुःखम्?।

आराधितयुष्माभ्यामभ्यायान्ति

स्वयंवराः कमलाः ॥ ३ ॥ गीतिः ॥

अव०–आशा० 'शदेःशिति' ३।३।४१। इत्यात्मनेपदे आशीयध्वे यूयं ते आशीयमानाः। स्त्रीनृभ्यां प्रयुज्यध्वे णिगि, 'शदेरगतौ शात्' इति शातिकर्मणि क्ते च आशातिता यूयं

"Aho Shrut Gyanam"

याभ्यां ताभ्यां. आराधिता यूयं याभ्यां ताभ्यां क्रियाभि-प्रेयत्वात् सम्प्रदाने चतुर्थी ॥ ३ ॥

पथिषु स्मृतयुष्माभ्यां पलायते निखिलभीतिरतिदूरम्।
पित्रोः सुत्रामापि प्रणमति स्तुतयुष्मयोः पादौ ।४।

अव०-स्मर्यध्वे स्मेति स्मृताः, स्मृता यूयं याभ्यां ताभ्यां, 'पञ्चम्यपादाने' २।२।६९। इति पञ्चमी । पिता च माता च 'पिता मात्रा वे' त्येकशेषे पितरौ तयोः, स्तुता यूयं ययोस्तयोः ।४।

युष्मास्विव मम भक्तिः,
स्वात्मैकत्वाप्तयुष्मयोर्भूयात् ।
युष्मद्बहुवचनान्यद्वित्वोक्त्यैवं जिना नूताः ॥५॥

अव०-युष्मा०-आत्मना सह एकत्वं प्राप्ता यूयं ययोस्तयोः युष्मादृशीभूतयोरिति भावः, स्त्रीनरयोर्विषययोः ॥ ५ ॥

इत्थं स्तुत्वा सर्वतीर्थाधिनाथान्,
भव्यप्राणिप्रार्थितार्थामरद्रून् ।
दुःखोच्छेदं कर्ममर्मक्षयं स्वा-
गन्तातीतं बोधिलाभं च याचे ॥६॥

इतियुष्मच्छब्दबहुवचनबहुव्रीहिद्विवचनगर्भः साधारणजिनस्तवःषष्ठः ॥

अव०-बोधिलाभेन कर्ममर्मक्षयस्ततश्च दुःखोच्छेद इति

त्रयाणामन्योऽन्यं हेतुहेतुमद्भावः । अन्तं अतीतम्तं, 'श्रिता-दिभिः' ३।१।६२। इति तत्पुरुषः । इति षष्ठस्तवावचूरिः ॥६॥

पुनः प्रकारान्तरेण षष्ठ एव स्तव उपदर्श्यते

सर्वान् सार्वान रागरोषादिदोषै-
स्त्यक्तान् युक्तान् मुक्तसङ्ख्यातिशेषैः ।
हर्षादीडे व्रीडया पीडितोऽपि,
स्वाऽविज्ञत्वोद्भूतया भूतनाथान् ॥१॥

अव०–सर्वान्०–मुक्ता सङ्ख्या यैस्तैः, अतिशेषशब्दः 'इय अइसेसज्झयणा भूआवाओ अ 'नो त्थीणं' इत्यादिसमयपरिभाषया अतिशयार्थः, तैर्युक्तान्, अर्हतां प्रसिद्धानां चतुस्त्रिंशतोऽति-शयानामुपलक्षणमात्रत्वान्न मुक्तसङ्ख्यत्वव्याघातः ॥१॥

अभिविजितयुष्मां कं, मोदयेतां न चामरे ।
सदासेवितयुष्मां च, देवदेव्यौ स्मराम्यहम् ॥२॥

अव०–'वीजणू' अपठितश्चौरादिकः । अभि–समन्ताद्विजिता यूयं याभ्यां ते, देवश्च देवी च । अत्र धवयोगलक्षणार्थविशेषसद्भा-वात् 'पुरुषः स्त्रिया' ।३।१।१२६। इति न एकशेषस्तत्र हि तन्मात्रभेद एव गृहीतोऽस्ति ॥ २ ॥

ज्ञानक्रियाभ्यां भव्यानां, मोक्षसौख्याभिलाषिणाम् ।
देशकीभूतयुष्माभ्यां, संसारः सुतरो भवेत् ॥३॥

"Aho Shrut Gyanam"

अव०—देशकीभूता [ अत्र च्विः क्तश्च ] यूयं ययोस्ताभ्यां, करणे तृतीया ॥ ३ ॥

**अच्युतसुखान्तसत्फलदात्रीभ्यां द्रव्यभावपूजाभ्याम्**
**विषयीकृतयुष्माभ्यां प्रयतेत श्रावको न हि कः ? ।४।**

अव०—द्रव्यपूजापक्षे अच्युतसुखं—द्वादशदेवलोकसुखं, भावपूजापक्षे अच्युतसुखमक्षयमुक्तिसम्बन्धि यत्सुखं, तदन्तानां सत्फलानां दायिकाभ्यां, द्रव्यभावप्रधाने पूजे, मयूरव्यंसकादित्वात्समासः । ताभ्यां, अविषया विषया क्रियध्वे स्मेति विषयीकृता, विषयीकृता यूयं याभ्यां ताभ्यां, ' गम्यस्याप्ये ' ।२।२।६२। इति चतुर्थी, ते कर्तुं को न प्रयतेत ? इत्यर्थः ॥४॥

**व्याख्यानोद्युक्तयुष्माभ्यां, धर्माभ्यां भव्यजन्तवः ।**
**तीर्णास्तरन्ति मोहाब्धिं, तरिष्यन्ति तथा न के ? ।५।**

अव०—व्याख्याने उद्युक्ता यूयं ययोस्ताभ्यां, साधुश्राद्धभेदेन द्वौ धर्मौ ' गम्ययपः० ' ।२।२।७४। इति पञ्चमी । तावाश्रित्येत्यर्थः ॥ ५ ॥

**साधयेन्निर्मलं धर्मं, निश्चयव्यवहारयोः ।**
**मर्यादामनतिक्रामन्, दर्शकीभूतयुष्मयोः ॥६॥**

अव०—दर्शकीभूता यूयं ययोस्तयोः, अनतिक्रामन् इति विशेषणबलाज्जन इति विशेष्यं लभ्यते ॥ ६ ॥

"Aho Shrut Gyanam"

द्रव्यपर्यायनययोः, प्रमाणीकृतयुष्मयोः ।
स्थितो भूपसभे वादी, जल्पन्नाप्नोति वै जयम् ॥७॥

अव०–अप्रमाणं प्रमाणं क्रियध्वे स्म इति प्रमाणीकृताः, प्रमाणीकृता यूयं याभ्यां तयोः । द्रव्यपर्यायनयौ हि यथा युष्मदुपदिष्टं सर्वार्थेष्वविसंवादितया प्रवर्त्तमानौ युष्माकं प्रामाण्यं व्यवस्थापयतः । वक्तुः प्रामाण्य एव वचनप्रामाण्य-नियमात्। भूपसभं 'राजवर्जिते' (लिङ्गानु०)ति क्लीबत्वं. वै निश्चये। युष्मदुपज्ञद्रव्यपर्यायनयवादिनो जयस्यैकान्तिकत्वात् ॥ ७ ॥

युष्मच्छब्दबहुत्वाऽन्यपदद्वित्वोक्तिभिः स्तुताः एवं।
श्रीज्ञानसागरत्वं देयासुः सर्वसार्वा मे ॥८॥

इतियुष्मच्छब्दबहुवचनबहुव्रीहिद्विवचनप्रयोगमयः साधारणजिनस्तवः एष वा षष्ठः । इति द्वितीयषष्ठस्तवावचूरिः ॥६॥

अथ श्रीनेमिस्तवः

रैवताचलशृङ्गारं, भृङ्गारं ज्ञानवारिणः ।
श्यामलच्छायमिच्छामि, श्रीनेमिं स्तोतुमादरात् ।१।
शिष्यीभूयानुयूयं ये, भव्यास्ते नात्र संशयः ।
सम्यग्दृक्त्वादभित्वांश्च, भजन्ति त्रिदशा विशः ।२।

अव०–त्वामनुगताः. अनुलोमादिष्विव 'प्रात्यवपरि०' ३।१।४७। इति द्वितीयातत्पुरुषः पूर्वपदप्रधानः । अत्र युष्मद्

"Aho Shrut Gyanam"

एकत्वे वृत्तावपि ' त्वमौ प्रत्यये 'ति न त्वादेशः, परत्वेन ' यूयं वयं जसे ' त्यस्यैव प्रवृत्तेः । शिष्यीभूय अनु यूयं ये स्युः, ते भव्या एव भवन्ति, नात्र संशयोऽस्ति इति वाक्यत्रयेणाऽन्वयः । स०–'ऋत्विज् दिश् दृश्०' २।१।६९। इति शकारस्य गकारः । तस्मात्, त्वां अभि प्रतिपन्नाः अभियूयं, अभिमुखादिवत् 'प्रात्य-वपरि० ' ३।१।४७। इति द्वितीयातत्पुरुषः । तान् ' शसो नः ' २।१।१७। इति शसो ने, युष्मदस्मदोः। २।१।६। इत्याः, विशः–पुरुषान् ॥ २ ॥

**प्रियत्वाभिर्नरैरुच्चै–र्मुच्यते विषयस्पृहा ।**
**रुचिगोचरितत्वभ्यं, न रोचन्तेऽन्यतीर्थिकाः ॥३॥**

अव०–प्रियस्त्वं येषां ते प्रिययूयं, तैः। अत्र बहुव्रीहेर्बहुत्वेपि युष्मद एकत्वे प्रवृत्तेः 'त्वमौ प्रत्यय०' २।१।११। इति त्वादेशः । एवमग्रेपि । रु०–रुचेः-श्रद्धाया गोचरः क्रियसे 'णिज् बहुलं०' ।३।४।४२। इति णिजि रुचिगोचर्यसे स्मेति क्ते रुचिगोचरितस्त्वं यैस्तेभ्यः, 'रुचिकृप्यर्थधारिभिः०' ।२।२।५५। इति चतुर्थी । ' अभ्यं भ्यसः ' ।२।१।१८। इति अभ्यम् ' शेषे लुक् ' ।२।१।१८। इति दलुक् ॥ ३ ॥

**निरन्तराविस्मृतत्वन्, नश्यन्ति सकलारयः**
**ध्यानाधीनीकृतत्वार्कं, पादान्नमति विष्टपम् ॥४॥**

अव०–निरन्तरं अविस्मृतस्त्वं येषां तेभ्यः, ' ङसेश्चाद् '

"Aho Shrut Gyanam"

।२।१।१९। इति अद्. ध्यानस्य अधीनो–वशः. असः स कृतस्त्वं यैस्तेषां, ध्या० ' आम आकम् ' २।१।२०। इति ' शेषे लुक् ' ।२।१।८। ॥ ४ ॥

नरेषु नायकत्वासु, न स्याद्भवरिपोर्भयम् ।
एवं युष्मत्पदैकत्वान्यबहुत्वोक्तितो मया ॥ ५ ॥

अव०–नायकस्त्वं येषां तेषु ॥ ५ ॥

श्रीमान् देवः शिवासूनु–रानीतःस्तुतिगोचरम् ।
ब्रह्मविद्यामयं दद्यात्, प्रसद्यात्मपदं मम ॥६॥

इति युष्मच्छब्दैकवचनान्यपदबहुत्वगर्भः श्रीनेमिस्तवः ।

अव०—ब्रह्मविद्या–केवलज्ञानं सा प्रकृता यस्य, 'प्रकृते मयट्' । दद्यादिति, विधिनिमन्त्रणाधीष्टसम्प्रश्न० ।५।४।२८ इति अध्येषणे सप्तमी, दद्यादमन्दमानन्दमितिवत् ॥ ६ ॥ इति सप्तमस्तवावचूरिः ॥ ७ ॥

अथ श्रीसीमन्धरयुगन्धरस्तवः ।

भवपङ्कपतज्जन्तु–जातोद्धारधुरन्धरौ ।
स्तुवे जिनौ विदेहस्थौ, सीमन्धरयुगन्धरौ ॥१॥
स्वामिताङ्कितयूयं याः, प्रजास्ता भाग्यभाजनम् ।
भावेनोपासितयुवान्, स्तुवे सेवकपुङ्गवान् ॥२॥

"Aho Shrut Gyanam"

**प्रथमं शिबिकारूढव्यूढयुवाभिर्नृभिस्तपस्यायाम् ।**
**इन्द्रेभ्योऽप्यखिलेभ्यः प्राधान्यं प्राप्यते स्म खलु ॥३॥**

अव०—स्वामितयाङ्कितौ–चिह्नितौ युवां यासां ताः, परत्वाद् युवादेशं बाधित्वा यूयमादेशः । उपासितौ युवां यैस्तान् 'शसो नः' ।२।१।१७। 'युष्मदस्मदोः' ।२।१।६। इत्याः । बहुव्रीहिबहुत्वेपि युष्मच्छब्दस्य द्वित्वेपि वृत्तेः ' मन्तस्य० ' ।२।१।१०। इति युवादेशः । एवमग्रेतनेष्वपि प्रयोगेषु ॥२॥ प्रथ०–शिबिका–याप्ययानं, तत्रारूढौ व्यूढौ युवां यैस्तैः । न च व्यूढेत्यत्र विपूर्वो वहतिर्विवाहार्थ एव, 'वूढो गणहरसद्दो' तथा ' मुणिवूढो सीलभरो ' इत्यादिषु व्यूढशब्दस्य वहनार्थस्यापि प्रयोगाणां दर्शनात् । इन्द्रा अपि हि ' मनुष्योद्भवाः जिना ' इति मनुष्याणामेव प्रथमं याप्ययानवहनानुमतिं ददति ॥ ३ ॥

**याचकेभ्योऽपि भद्रं स्ताद्, वार्षिकत्यागपर्वणि ।**
**स्वहस्तदायकीभूत–युवभ्यं वाञ्छितावधि ॥ ४ ॥**

अव०—याच०–' तद्भद्रायुष्य० ' ।२।२।६६। इति चतुर्थी । याचकानामाशीर्दानहेतुरूपं विशेषणमाह–स्वहस्तेन दायकीभूतौ युवां येषां तेभ्यः । वाञ्छितमवधिर्यस्मिन् स्वहस्तदाने तत् । गङ्गायां बहुमानातिशयात्तन्मृत्तिकापि यथा बहुमान्या तथा स्वहस्तदायकीभूतयूयं याचका अपीतिभावः ।४।

"Aho Shrut Gyanam"

प्रदक्षिणीकृतयुवत्, केवलिभ्यो भवत्सभाम् ।
संश्रितेभ्यो विदुः स्पष्टं, के न वैनयिकक्रमम् ? ।५।

अव०—दक्षिणां प्रगतौ प्रदक्षिणौ, 'प्रात्यवपरि०' ।३।१।४७। इति समासः । अतौ तौ क्रियेथे स्मेति प्रदक्षिणीकृतौ, प्रदक्षिणीकृतौ युवां यैस्तेभ्यः, 'गम्ययपः कर्म०' ।२।२।७४। इति पञ्चमी, भ्यसो 'ङसेश्चाद्' ।२।१।१९। इति अद् । विनय एव वैनयिकं. 'विनयादेरिकण्' ॥ ५ ॥

स्वविहारक्रमपावकयुवाकमुर्वीं महाविदेहानाम् ।
स्पृहयेद् बुधो न कस्कः सदावहन्मोक्षनगरपथाम् ।६।

अव०—स्वविहारस्य क्रमेण – परिपाट्या, पावकौ–पावित्र्यकारकौ युवां येषां विदेहानां तेषां, भरतैरावतेभ्यो महत्त्वात् महान्तश्च ते विदेहाश्च महाविदेहाः । एकपदव्यभिचारेऽपि विशेषणसमासो दृश्यते । यथा शेषाहिः, अब् द्रव्यं, पृथिवी द्रव्यमित्यादि । बहुवचनं चात्र सीमन्धराद्यर्हच्चतुष्टयविहारकल्याणकादियोगहेतुकान् अन्यक्षेत्रातिशायिनः स्याद्वादनीत्या कथञ्चिदभिन्नान् महाविदेहानां बहून् गुणान् सूचयति । सदा वहन् मोक्षनगरस्य पथो यस्यां उर्व्यां तां, वहति सार्थ इत्यादिष्विव अत्र वहिरकर्मकः सातत्यगमनार्थः अविच्छिन्नमुक्तिगच्छन्नैकजनाश्रितत्वेन उपचारात् मुक्तिमार्गोऽपि वहन्नुच्यते, मञ्चाः क्रोशन्तीत्यादिवत् ॥ ६ ॥

"Aho Shrut Gyanam"

अवतीर्णतरुणतरणिप्रभप्रभास्वरयुवासु भूमीषु ।
तिमिरं न संशयमयं तिष्ठति भव्याङ्गिहृदयगतम् ७

अव—अवतीर्णौ तरुणतरणिप्रभौ प्रभास्वरौ युवां यासु विदेहभूषु तासु । अत्रापि प्राग्वत् गुणबहुत्वसूचनार्थं बहुवचनम् ।७।

अन्योऽन्यापमितयुवां, युवां जिनाधीश्वरौ ? विजेज्याथाम् । आव्योमसोमसूर्यं महाविदेहाभरणभूतौ । ८ ।

अव॰—अन्योऽन्येन कर्तृभूतेन उपमितौ युवां ययोस्तौ सम्बोधने, विपूर्वाज्जिधातोर्यङ्लुपि 'प्रकृतिग्रहणे यङ्लुबन्तस्यापि ग्रहण' मिति न्यायात् पञ्चम्या आत्मनेपदीययुष्मदर्थे द्विवचनं । आ व्योमसोमसूर्येभ्यः आ॰ ' पर्यपाङ्बहिरच् पञ्चम्या ' इत्यव्ययीभावः ' ।३।१।३२।

सीमन्धरप्रभुयुगन्धरनामधेयौ,
भक्त्या स्तुतौ जिनवरौ युगपन्मयेति ।
अत्राप्यवाप्तजनुषः सुकृताऽऽशिषं त्वां,
दत्तां मम प्रमदतो नमतोऽनुवेलम् ।। ९ ।।

इति युष्मच्छब्दद्विवचनबहुव्रीहिबहुवचनप्रयोगगर्भः श्रीसीमन्धरयुगन्धरस्तवोऽष्टमः ।। ९ ।।

अव॰–सुकृतं ते भूयादिति सुकृतविषया आशीः सुकृताशीस्तां, मयूरव्यंसकादित्वात् समासः ।९। अष्टमस्तवावचूरिः ।८।

"Aho Shrut Gyanam"

अथ सर्वजिनस्तवः ।

यद्गुणस्तवने नालम्भूष्णवो योगिनोऽपि हि ।
तान् किलाखिलसर्वज्ञान् स्तोष्येऽहकमपि प्रभून्॥१॥

अव० — इत्यल्पधीत्वेनाल्पोऽहम् 'त्यादिसर्वादेः०' ।७।३।२९। इत्यक् ॥१॥

ये स्युः परिवृतयूयं निर्वृतभूयं भजन्ति ते शिष्याः।
हृदयास्थाक्रोडीकृतयुष्मान् नाराध्यति नरान् कः॥२॥

अव०—परिव्रियध्वे स्मेति परिवृताः, परिवृता यूयं यैस्ते । निर्वृताः—समाहिताः मुक्ता इतियावत्, तेषां भावः, 'हत्या भूयं भावे' ५।१।३६। इति भूयनिपातः । हृदयास्थया—आन्तर श्रद्धया, अक्रोडाः क्रोडाः क्रियध्वे स्म च्वौ 'तत् साप्या०' । ३।३।२१। इति क्ते च क्रोडीकृता विषयीकृता इति यावत् यूयं यैस्तान्, युष्मदेकत्वद्वित्वयोरभावात् न त्वयुवादेशौ ॥२॥

दृष्टैः कः शशिविशदैस्त्रिकैरधिचतुर्दिशं दिव्यैः ।
छायास्थितयुष्माभिच्छात्रैः पात्रीभवेन्न मुदाम् ।३।

अव०—चतुर्दिशि अधि, 'विभक्तिसमीप०' ।३।१।३९। इत्यव्ययीभावे 'शरदादेः' ।७।३।९२। इत्यत्समासान्तः । छायास्थिता यूयं येषां तैः, अपात्रं पात्रं भवेत् च्विः । मुदामित्यस्यापेक्षायामपि पात्रीभवेदित्यत्र तद्धितवृत्तिर्नित्यसापेक्ष-

"Aho Shrut Gyanam"

त्वात् । तदुक्तं परिभाषायां–सम्बन्धिशब्दः सापेक्षो, नित्यं सर्वः प्रवर्त्तते । स्वार्थवत् सा व्यपेक्षाऽस्य, वृत्तावपि न हीयते ॥३॥

मध्यासितयुष्मभ्यं पर्षद्भ्यो द्वादशभ्य इह भव्यः।
परिमुक्तनित्यवैरादिभ्यः श्लाघेत को न जनः?॥४॥

अव०—मध्ये आसिताः–स्थिता यूयं यासां ताभ्यः, 'अभ्यं भ्यसः' ।२।१।१८। इत्यभ्यं । आदिशब्दात् क्षुत्पिपासादिबाधाग्रहणं । श्लाघिक्रियाभिप्रेयत्वात् सम्प्रदानत्वे चतुर्थी ॥ ४ ॥

संसद्यनुकृतयुष्मन्मूर्त्तिभ्योऽन्याभ्य इह सुरकृताभ्यः।
यौष्माकमूलमूर्त्तेर्भेदं न विवेद विदुरोऽपि ॥५॥

अव०–अनुकृता यूयं याभिस्ताभ्यः, भ्यसोऽद्, मूलं पार्श्वाद्ययोरिति (अभिधान०) वचनात् मूलमाद्यार्थे, 'प्रभृत्यन्यार्थ०' ।२।२।७५। इति पञ्चमी ॥ ५ ॥

अन्तर्मृगेन्द्रविष्टरनिविष्टयुष्माकमुत्तमाः पुरुषाः ।
प्राकाराणां त्रितयं रम्यं के नो दिदृक्षन्ते ?॥६॥
सन्मुखनिविष्टयुष्मास्वनल्पसोपानपङ्क्तिषु सुखेन ।
आरोहन् समवसृतौ बालो वृद्धोऽपि न श्राम्येत् ।७।

अव०–मृगेन्द्रावयवं विष्टरं, मयूरव्यंसकादित्वात्समासः ।

"Aho Shrut Gyanam"

तत्र निविष्टा यूयं येषु तेषां, दिहृ० ' स्मृदृशः ' ।३।३।७२। इत्यात्मनेपदं ॥ ६ ॥ सन्मुखा निविष्टा यूयं यासु तासु, जिनेन्द्रवदनदर्शनसमुल्लसदमन्दसम्मदो जिनातिशयात् न कश्चित् खेदं वेदयते इति भावः ॥ ७ ॥

**ज्ञानातिशयगुणर्द्ध्या भरतैरावतविदेहसर्वजिनाः ।**
**अन्योऽन्यतुलितयूयं मम यूयं दत्त शिवसौख्यम् ।८।**

अव–ज्ञाना०–अन्योऽन्येन कर्त्रा तुलिताः–समीकृता यूयं येषां युष्माकं ते, हे० ॥ ८ ॥

**युष्मत्पदान्यपदसत्कबहुत्वगर्भ-**
**मुग्धोक्तिभिः स्तुतिपथं गमिता मयेत्थम् ।**
**श्रीज्ञानसागरसमाः समतीर्थनाथाः,**
**श्रीसोमसुन्दरगुणा ददतु प्रसादम् ॥ ९ ॥**

इति युष्मच्छब्दबहुव्रीहिवचनगर्भः सर्वजिनस्तवो नवमः ॥ ९ ॥ एवं च समाप्ता युष्मच्छब्दत्रिषष्टिरूपरचनाञ्चिता क्षुल्ला-दिबुद्धिव्युत्पत्तये तपागच्छाधिराजश्रीसोमसुन्दरसूरिभिर्विरचिता नवस्तवी ॥

अव०——युष्म०–सदेव सत्कं, 'यावादिभ्यः कः' ।७।३।१५। इति कः, सम्बन्धीतियावत् । वदति हि जनः इदं वस्तु ममसत्तायां, सा च सम्बन्धिता इत्यर्थः ।एवं च व्यक्तमेव सच्छब्दः सम्बन्ध्यर्थे,

"Aho Shrut Gyanam"

पृथुकार्तस्वरपात्रं भूषितनिश्शेषपरिजनं देव । विलसत्करेणु-गहनं, सम्प्रति सममावयोः सदनम् ॥ १ ॥ इत्यादौ विलस त्केत्यादिप्रयोगदर्शनाच्च ॥ ९ ॥

इति नवमस्तवावचूरिः सम्पूर्णा ॥ ९ ॥

* * * * * *

श्रीसोमसुन्दरसूरिविरचिता

अथास्मच्छब्दरूपाङ्किता नवस्तवी आरभ्यते—

**जिनं निरस्तवृजिनं, भाजनं गुणसम्पदाम् ।**
**कृपापण्यापणं नाथं, किञ्चिद्विज्ञपयाम्यहम् ॥ १ ॥**

अव०—नाथोऽपि निर्दयो न विज्ञप्यत इत्याह—कृपा०—तथापि स्वयं गुणवानेव परेषां गुणाधाने क्षम इत्याह—भा० तं च कं ? इत्याह—जिनमित्यादि ॥१॥

**विडम्बिताहं मोहस्त्वां, बाधते देव ! न क्वचित् ।**
**स्वदासीकृतमां कामं, निकामं त्वं निहंस्यहो ! ॥२॥**

अव०—विडम्बितोऽहं येन स. मस्य अहमश्च प्राप्तौ परत्वात् अहमादेश एव । स्वदासीकृतोऽहं येन तं'त्वमौ०' ॥२॥१॥११॥ इति मादेशः ॥२॥

**सेवकीभूतरोराम—मयेन्द्रोपासित ! त्वया ।**
**न द्रुतव्यं यतः सन्ता, राजरङ्कसदृग्दृशः ॥३॥**

"Aho Shrut Gyanam"

अव०–सेवकीभूतो रोराभोऽहं यस्य तेन, 'टाङ्योसि', २।१।७। इति यः। हे इन्द्रोपासित !, अर्थान्तरन्यासमाह–यतः सं० ॥३॥

सर्पादिरूपतानीत–मह्यं रोषाय न त्वया ।
ददेऽवकाशलेशोऽपि, युक्तं सेवकवत्सल: ॥४॥

अव०–सर्पादीनि रूपाणि यस्य स तत्तां नीतोऽहं येन स तस्मै, 'त्वमौ प्रत्यय०' ।२।१।११। इत्यस्य प्राप्तावपि परत्वात् 'तुभ्यं मह्यं ङया' ।२।१।१४ इति स्यात् । सेवकापराधिनां हि प्रभुणा नावकाशो देयः ॥४॥

नारकीभूतमत्पापात्, पाहि स्वं सेवकं जनम्।
अनुगामिममार्हस्ते, भाविनी विहृतिः कदा ? ॥ ५ ॥

अव०–नारकीभूतोऽहं यस्मात्तस्मात् । अनुगामी अहं यस्य तस्य, अत्रापि 'त्वमौ प्रत्यय०' ।२।१।११। इति बाधित्वा परत्वान्ममादेशः । अयं हि सर्वजिनसाधारणस्तवः । ततः सीमन्धरादिविहरमाणजिनाऽपेक्षया इदमाशंसनमुपपद्यते ॥ ५ ॥

अनुकम्प्याश्रितमयि, त्वयि नाथे प्रसन्नता ।
भूयादवश्यं देव ! स्यां, फलेग्रहिजनुर्यतः ॥ ६ ॥

अव०–अनुकम्प्य आश्रितोऽहं यस्य तस्मिन्, यतः फलेग्रहिजनुः स्यामित्यन्वयः । अपेक्षते न यच्छन्दस्तदमु-

"Aho Shrut Gyanam"

त्तरवाक्यग ' इतिवचनात् न पूर्वार्द्धे तद आकाङ्क्षा । फलं गृह्णाति ' रजःफले मलाद् ग्रहः ' ।५।१।९८। इति इः, फले इति निर्देशादेकारश्च । ६ ।

अस्मत्पदान्यपदयोरिति जिन ! नूतस्त्वमेकवचनेन ।
निजपदपङ्कजसेवाहेवाकितया कृतार्थय माम् ॥७॥

इति अस्मद्बहुव्रीह्येकवचनप्रयोगगर्भः स्तवः प्रथमः॥ १ ॥

इति प्रथमस्तवावचूरिः ॥ १ ॥

अथ साधारणजिनस्तवः ।

सुरासुरेन्द्रौ निस्तन्द्रौ, कल्याणसमयागतौ
हर्षान्निद्रौ जिनेन्द्राग्रे, विज्ञप्तिं तनुतो यथा ॥१॥

अव०—'तनुत' इति तत्कालापेक्षया वर्त्तमानतानिर्देशः । एवमग्रेतनेष्वपि स्तवनेषु ज्ञेयं । यथा इत्युपदर्शने ॥ १ ॥

एवंविधर्द्धिं प्राप्ताहमर्हणा पदयोस्तव ।
विनयावहिताऽऽवां त्वां, निषेवन्ते न के नराः? ।२।

अव०—एवंविधां ऋद्धिं प्राप्तौ आवां यतः सा, 'मन्तस्ये०'ति प्राप्तं आवादेशं बाधित्वा परत्वादहमादेशः । अर्हण् पूजायां ' णिवेत्त्यासश्रन्थ० ' ।५।३।१११। इत्यनः स्त्युक्त्वादाप् विनयेऽवहितौ आवां यस्य तं, निषे० लोकः पूजितपूजक इति हि स्थितिः ॥ २ ॥

"Aho Shrut Gyanam"

येन ब्रह्मादयोऽप्येते, किङ्करीभावमापिताः ।
विगोपितावया तेन, रागेण न जिता भवान् ॥३॥

अव०–विगोपितौ आवां येन तेन, 'देवा विसयपसत्ता' इतिवचनात् ॥ ३ ॥

भूयोभ्रमितमह्यं त्वं, परतीर्थिकवादिने ।
विश्वार्च्यो रोचसे नैव, घूकायाऽर्क इव प्रभा ! ॥४॥

अव०–भ्रमितौ मिथ्याज्ञानेन (ज्ञानस्य) दीक्षितौ आवां येन तस्मै, मस्य मह्यमश्च प्राप्तौ परत्वान् मह्यमेव प० जातौ एकवचनं, 'रुचिक्लृप्यर्थ०' ।२।२।५५। इति चतुर्थी ॥ ४ ॥

प्रबोधितावद्धावत्क–विशुद्धागमभाषितात् ।
प्रबुद्धाः साधयामासु–र्महानन्दपदं न के ? ॥५॥

अव०—प्रबोधितौ आवां येन तस्मात्, 'ङसेश्चाद्' ।२।१।१९। इति अत्, भवत इदं भा० 'भवतोरिकणीयसौ' ।६।३।३०। इति इकण्, 'ऋवर्णोवर्णदोसिसुसश्श्वदकस्मात्त इकस्येतो लुक्' ।७।४।७१। इति इलुग्, वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' ।७।४।१। इति वृद्धिः, 'गम्य यपः०' ।२।२।७४। इति पञ्चमी लब्ध्वेत्यर्थः । सा० 'सिध्यतेरज्ञाने' ।४।२।११। इत्याः ॥ ५ ॥

निष्पत्त्युद्यतमम ते समवसृतेर्भुवि समं समासीनाः।

"Aho Shrut Gyanam"

बाधां न बुबुधिरे जन्तुकोटिकोट्योपि चित्रमिदम् ६

जघनविपुला ।

अव०—निष्परयुष्मतौ आवां यस्यास्तस्याः, मादेशं बाधित्वा परत्वान् ममादेशः । एवमग्रेऽपि वाच्यम् ॥ ६॥

अनन्तदर्शनज्ञान—वीर्यानन्दमयात्मनि ।
तृणप्रायावयि पदे, परमेऽवस्थितो जय ॥ ७ ॥

अव०—प्रायशब्दः अकृत्स्नबहुत्वे, तृणप्रायौ आवां यस्मिन् तस्मिन् ॥ ७ ॥

अस्मच्छब्दद्विवचोऽन्यपदैकवचःप्रपञ्चरुचिरेण ।
स्तवनेनाऽनेन नुतः प्रभो ! प्रसीद त्वमचिरेण ।८।

इति अस्मच्छब्दद्विवचनबहुव्रीह्यैकवचनमयः साधारणजिनस्तवो द्वितोयः ॥ २ ॥

अव०—अस्म०—सुरासुरेन्द्रकृतेनेति शेषः ॥ ८ ॥

इति द्वितीयस्तवावचूरिः ॥ २ ॥ अथ वीरस्तवः—

उदितज्ञानदिनकरं विदांवरैर्वर्ण्यमानगुणविभवम् ।
समसमयमिन्द्रनिवहाः स्तुवन्ति भक्त्या जिनं वीरम् १

अव०—उदितो ज्ञानमेव दिनकरो यस्य तम् ॥ १ ॥

सकलातिशयसमृद्धया सर्वजिनोत्कृष्टतामवाप्नोति ।



"Aho Shrut Gyanam"

मेवासक्ताहमहा ! धत्से नोत्सेकलेशमपि ॥ २ ॥

अव०—सेवासक्ता वयं यस्य । उत्सेकः-चित्तातिरेकः ॥२॥

जननजरामरणोच्छलदतुच्छकल्लोलमालया कलितम् ।
निर्मग्नास्मां संसारसागरं तीर्णवान् भगवान् ॥३॥

अव०—निर्मग्ना वयं यस्मिन् विषयासक्ततया, सर्वं जानाति देव इतिवत् प्रकरणात् भवान् लभ्यते ॥ ३ ॥

पारप्राप्ताऽस्मया जज्ञे, मन्ये दुःखाब्धिनाऽधुना ।
लभामहे महेश ! त्वद्दर्शनं पावनं यतः ॥ ४ ॥

अव०—पारं प्राप्ता वयं यस्य तेन, मन्ये इत्यव्ययं, नो चेत् अत्र स्तवे अस्मदो बहुत्वप्रक्रमात् मन्यामहे इति स्यात्, न च बहुवचनार्थं एकवचनान्तप्रतिरूपकमव्ययमपि न प्रयोगार्हमिति-वाच्यं, 'सदृशं त्रिषु लिङ्गेषु, सर्वासु च विभक्तिषु । वचनेषु च सर्वेषु, यन् न व्येति तदव्यय' मित्यव्ययलक्षणात् । उक्तं च व्यक्त्येदं ओघनिर्युक्तिवृत्तौ—' किमत्थि अन्नेवि अणुओगा ' इत्यस्य व्याख्यायाम् ॥ ४ ॥

दूरेऽपि सदनुष्ठानं, कृतं जीवदयादिकम् ।
ईदृक्श्रीप्राप्तमह्यं त्वद्भक्त्यायेव हि कल्पते ।५।

अव०—दूरे०—त्वत्त इत्यध्याहार्यं । ईदृग् श्रियं प्राप्ता वयं यतस्तस्यै ' तुभ्यं मह्यं । ' ।२।१।१४। इति मह्यं, श्लेष्मणे

"Aho Shrut Gyanam"

दधि कल्पते इत्यादिवत्, 'रुचिक्रृप्यर्थ०' ।२।२।५५। इति चतुर्थी, आज्ञापालनं हि भक्तिस्तच्च त्वत्तो दूरेपि न भिद्यते इति भावः ॥ ५॥

यदर्जितं भवेऽनादौ, कषायविषयादिभिः
चिरं विधुरितास्मत्प्राक् तस्मात्त्रायस्व कर्मणः ।६।

अव०—विधुराः क्रियामहे णिजि 'तत्साप्या०' ।३।३।२१। इति क्ते विधुरिता वयं येन, तस्मात् ॥ ६ ॥

पत्तीयितममसेवकजनदत्तात्मीयपदसदृशर्द्धेः ।
योगक्षेमविधायक! तव नायकतामभीप्सामः ॥७॥

अव०—पत्तय इवाचरामः पत्तीयामहे, पत्तीयामहे स्म पत्तीयिता वयं यस्य तस्य सेवकजनस्य दत्ता आत्मीयपदसदृशी ऋद्धिर्येन, तस्य । अलब्धलाभो योगो, लब्धपरिपालनं क्षेमः, अभ्याप्तुमिच्छामः भवान्तरेऽपीति शेषः ।७।

प्रकटीकृतजगतीगतजीवाऽजीवादिभावसद्भावे ।
सुज्ञायकीकृतास्मयि तवागमे स्ताद्रतिर्नित्यम् ।८।

अव०—सु०—निगोदादिसूक्ष्मविचाराणां सुज्ञायकीकृता वयं येन, तस्मिन् ॥ ८ ॥

अस्मच्छब्दबहुत्वान्यपदैकत्वाङ्किताऽर्हतः ।

"Aho Shrut Gyanam"

श्रीज्ञानसागरस्याऽस्तु, स्तुतिरेषा सुखाय नः ।९।

इति अस्मच्छब्दबहुवचनबहुव्रीह्येकवचनप्रयोगमयः श्रीवीरस्तवः तृतीयः ॥ ३ ॥ इति तृतीयस्तवावचूरिः समाप्ता ।

अर्बुदगिरिवरभूषणमदुषणं प्रथमतीर्थकरनाथम् ।
स्तुतिपथमानेतास्मि प्रसृमरमहिमानमतिमानम् १

अव०—प्रथमः तीर्थकरो नाथश्च-राजा तीर्थकरनाथयोः, खञ्जकुण्टादिवत् समासः ॥ १ ॥

कल्पद्रू इव ते पादौ, मनोऽभीष्टार्थदायकौ ।
मेऽथ्यावुपान्तविश्रान्त—मां केषां नैव धीमताम्? ।२।

अव०—उपान्ते विश्रान्तोऽहं ययोस्तौ, धीमतां 'कृत्यस्य वा' ।२।२।८८। इति षष्ठी ॥ २ ॥

आसादि यत्प्रसादाद्धर्मः शिवशर्मकृद् भवदुपज्ञम् ।
पितरौ तावभिवन्दे प्रसूतमां दुष्प्रतीकारौ । ३ ।

अव०—' आङः सदण् गतौ ' भवत उपज्ञा—प्रथमं ज्ञानं, भवता प्राक् प्रकाशित इति भावः । ' पितामात्रे ' त्येकशेषः । प्रसूतोऽहं याभ्यां तौ, दुःखेन प्रतीकारोऽनृणीभावो ययोस्तौ, ' अव्ययं० ' ।३।१।४८। इति बहुव्रीहिः, दुःखेन प्रतिक्रियेते इति वाक्ये ' दुःस्वीषतः० ' ।५।३।१३९। इति खल् स्यात् ।

"Aho Shrut Gyanam"

असाधारणसौभाग्य–भवद्रूपनिरूपणे ।
भूयो व्याभृतमाभ्यां स्व–चक्षुर्भ्यां सफलोऽस्म्यहम् ।

अव०–भूयो व्यापृतोऽहं ययोस्ताभ्याम् ॥ ४ ॥

एतद्गिरिसत्काभ्यां त्वद् योगात् सर्वतीर्थभूताभ्याम् ।
मङ्गलमवनतमाभ्यामधित्यकोपत्यकाभ्यां स्तात् । ५ ।

अव०–एतस्य गिरेरर्बुदस्य सम्बन्धिनीभ्यां, सर्वतीर्थानां–भूते तुल्ये 'भूतरूपोपमा' इति वचनात्, ताभ्यां, कामहृदादौ अधित्यकायामपि श्रीआदिनाथयोगः । अत एवावनतोऽहं याभ्यां ताभ्यां, 'तद्भद्र०' ।२।३।६६। इति चतुर्थी । अधित्यकोर्ध्वभूमिः स्या–दधोभूमिरुपत्यका (हैम०) ॥ ५ ॥

चलनप्रवृत्तमाभ्यां, त्वद्यात्राकरणक्षणे ।
एताभ्यामर्बुदोत्तंस !, पादाभ्यां पुण्यमाप्नुयाम् ।६।

अव०–चलने–सञ्चरणे प्रवृत्तोऽहं ययास्ताभ्यां, अर्थात् स्वाभ्यां पादाभ्यां 'गम्ययपः०' ।२।२।७४। पञ्चमी ॥६॥

यदा त्वद्दर्शनं लेभे, दूरीभूतमयोस्तदा ।
तिर्यग्नरकदुर्गत्योः, स्वप्नेऽपि व्यरमद्द्वयम् ॥ ७ ॥

अव०–अस्मदर्थेऽन्यदर्थे च परोक्षात्मनेपदैकवचनस्य एक–रूपत्वेन कर्मणि कर्त्तरि च भेदाभावात्, अहं मया वा यदा

"Aho Shrut Gyanam"

त्वद्दर्शनं लेभे, तदा दूरीभूतमयोः सत्योस्तिर्यग्नरकदुर्गत्योर्भयं स्वप्नेपि व्यरमत्-निवृत्तं, अर्थान्मम। हेतुरूपं विशेषणमाह-तिर्य० कीदृश्योः ? दूरी० दूरीभूतमयोः, अदूरो दूरो भवामि स्म च्वौ क्ते दूरीभूतोऽहं याभ्यां, तयोः ॥ ७ ॥

त्वद्धर्मावासितः पूर्व—मनुत्पन्नमयोः किल ।
देवमानवसद्गत्यो—र्न वासं कः समीहते? ॥८॥

अव०—अनुत्पन्नोऽहं ययोस्तयोः ॥ ८ ॥

इत्यस्मदेकवचनान्यपदद्वित्वोक्तिभिः स्तुतो वृषभः।
देवोऽर्बुदगिरिमौलिः कलयतु लीलां मनोऽन्तर्मे ९

इति अस्मच्छब्दैकवचनबहुव्रीहिद्विवचनप्रयोगचारुः
श्रीऋषभस्तवः ॥ ४ ॥

अव०—मनोऽन्तरिति ' पारे मध्येऽग्रेऽन्तः०' ।३।१।३०। इत्यव्ययीभावविषये विभाषाकरणसामर्थ्यात् ' तृप्तार्थ० ' ।३।१।८५। इतिनिषिद्धोऽपि षष्ठीतत्पुरुषोऽभूत् ॥ ९ ॥

इतितुर्यस्तवावचूरिः ॥ ४ ॥ अथ ऋषभवीरस्तवः—

श्रीऋषभवर्द्धमानौ युगपत्पौरस्त्यचरमतीर्थपती ।
निभृतीभूय सुभक्त्या इतीह जायापती नुवतः ।१।

अव०—निभृतो—विनीतः, च्विः क्त्वा यप् ॥ १ ॥

"Aho Shrut Gyanam"

नेशते यद्यपीन्द्राद्याः, स्तुत्यै तत्र तथाप्यहो ।
युवामुपस्थितावावां ह्री-स्थानं नैव गुरुत्वतः ।२।

अव०-यद्यपीन्द्राद्याः, स्तुत्यै-स्तुतिकर्तुं नेशते, अर्थात् युवयोस्तथापि तत्र स्तुतौ उपस्थितौ-सज्जीभूतावावां ययोस्तौ युवां ह्रीस्थानं न भवथः, कुत ? इत्याह-युवां हि गुरू-महाशयौ । अत आवयोः स्तवनेनापि न लज्जोद्य इति भावः ।। २ ।।

यत्राऽध्यैथे युवां युष्म-द्धर्मश्च परिपाल्यते ।
कुलजाती पवित्रे ते, जातावां स्तुवहे सदा । ३ ।

अव०—कुलं-पैतृकं, जातिर्मातृकी, जातौ आवां ययोस्ते ।। ३ ।।

मूढावाभ्यामनिशं रागरुषाभ्यां जगज्जनमशेषम् ।
पीडितमवतामेतं प्रभू ! भवन्तौ दयावन्तौ ।४।

अव०—मूढौ-निर्विवेकौ आवां याभ्यां, ताभ्यां । रुषा भिदादित्वादङि आपि च । अवतां-पञ्चमी तां । रक्षाया हेतुरूपं विशेषणमाह-प्रभू दयावन्तौ ।। ४ ।।

स्वायोग्यतया तादृग् विशिष्टकालेऽपि दूरितावाभ्याम् ।
अनिमित्तवत्सलाभ्यामपि विज्ञपयावहे किमु वाम् ? ।५।

अव०-आवां युवाभ्यां क्रियाभिप्रेयत्वात् सम्प्रदानभूताभ्यां,

"Aho Shrut Gyanam"

किं विज्ञपयावहे इत्यन्वयः । कीदृशाभ्यां ? अनिमित्तवत्सलाभ्यामपि, स्वायोग्यं० स्वायोग्यतया मुक्तिगमनार्हकालेऽपि आवयोः दूरि० दूरौ क्रियावहे ' णिज् बहुलम् ' ।३।४।४२। इति णिजि परमतेन ' स्थूलदूरयुव० ' इति अन्तस्थालोपगुणयोरभावे दूरितौ आवां याभ्यां, ताभ्यां, 'प्रभृत्यन्यार्थ०' ।२।२।७५। इति पञ्चमी ॥ ५ ॥

मिथ्यात्वमहाम्भोधेर्निजागमप्रवहणार्पणादधुना ।
तीरानीतावाभ्यां परो युवाभ्यां कृपावान् कः ? ।६।

ऋजुवक्राज्ञयोर्योग्यं, युवामन्तर्गतावयोः ।
विधिं पञ्चव्रतीमुख्यं, दिशन्तौ न कथं हितौ ? ।७।

अव०—ऋजुश्च वक्रश्च ऋजुवक्रौ, तौ च तौ अज्ञौ—जडौ च अन्तर्गतौ आवां ययोस्तयोः श्रीऋषभतीर्थे उत्पन्नत्वेन ऋजुजडौ श्रीवीरतीर्थोत्पन्नत्वेन वक्रजडौ चावामिति भावः । पञ्चव्रती मुख्या यस्य, मानोपेतवस्त्रग्रहणादि नम् ॥ ७ ॥

आद्यन्तयाश्चतुर्थारस्यानुचितावयोर्विमुक्तिपथे ।
सुवहेऽपि भवद्भ्यां नौ सिद्धं कार्यं न किं कुर्वः ? ।८।

अव०—अनुचितौ—मुक्त्यनर्हौ आवां ययोस्तयोः । भवद्भ्यामिति पञ्चमी, चतुर्थारस्यादौ श्रीऋषभात् अन्ते च श्रीवीरात्

"Aho Shrut Gyanam"

नौ-आवयोः, कार्यं न सिद्धम् ॥ ८ ॥

इत्यानन्दपुरस्थौ श्रीमन्नाभेयवीरतीर्थपती ।
स्तुत्वा कौचित् श्राद्धावार्जितां दम्पती पुण्यम् ९
अस्मत्पदान्यपदयोर्द्विवचनगर्भस्तवेन नुतिविषयम् ।
नीतौ जिनाविति मम प्रयच्छतां स्वच्छतां मनसः

इत्यस्मच्छब्दबहुव्रीहिद्विवचनगर्भ ऋषभवीरस्तवः ॥

इतिपञ्चमस्तवावचूरिः ॥ ५ ॥ अथ साधारणजिनस्तवः-

लोकान्तिकनाकिवरा जिनपुरतो
मौलिमिलितभूमितलाः ।
दीक्षासमयसमेता विज्ञप्तिं तन्वते मुदिताः ॥१॥

अव०-लोको-ब्रह्मलोकस्तस्यान्ते-समीपे भवा इकण्, ब्रह्मलोकवासित्वात् । तन्वते इति वर्त्तमाननिर्देशस्तत्समयापेक्षः ॥ १ ।

अशक्तास्मां महाप्रज्ञा-वैभवेनापि केनचित् ।
स्तुतिपूजे विधातुं ते, न शक्येते कदाचन ॥२॥

अव०-अशक्ता वयं ययोस्ते, प्रज्ञा च वैभवं च, महती ते यस्य तेन, स्तुति० द्वन्द्वः, 'लघ्वक्षर०' ।३।१।१६०। इति, इदंतत्वात् स्तुतिशब्दस्य पूजाशब्दात् प्राग् निपातः ॥ २ ॥

"Aho Shrut Gyanam"

गुणैर्विस्मायिताऽस्मां त्व-द्यतिसाध्वीजनौ कदा ।
प्रणंस्यामस्तवोपास्तिं, कुर्वाणौ वह्निदिक्स्थितौ ३

अव०-गुणैः करणभूतैः विस्मायिता वयं याभ्यां तौ, प्रयोक्तुः स्वार्थाभावादकाराभावः, स्मिङ 'पुरुषस्त्रिया' इत्येकशेषात् त्वत्साधुसाध्वीजनाविति पाठो न सङ्गच्छते. व०-दक्षिणपूर्वा दिग्, आग्नेयी इतिभावः ॥ ३ ॥

निजगुणगणैरधरिताऽस्माभ्यां सुस्त्रैणपौंस्नवर्गाभ्याम् ।
सद्देशविरतिमद्भ्यां कदा विभास्यति सभा भवतः ८

अव०-अधरि० अधरिता-अधःकृता अविरता वयं याभ्यां ताभ्यां, स्त्रीणामयं स्त्रैणः, पुंसामयं पौंस्नः । 'प्राग्वतः स्त्रीपुंसाद् नञ् स्नञ्' ।६।१।२५। तौ च तौ वर्गौ च ताभ्याम् ॥ ४ ॥

कदा चान्तर्गताऽस्माभ्यां, त्वद्व्याख्याक्षिप्तचेतसाम् ।
नरामराणां वृन्दाभ्यां, न सुधापि स्वदिष्यते ।५।

अव०-अन्तर्गता वयं लोकान्तिकदेवा ययोर्वृन्दयोस्ताभ्यां रुचिक्लृप्यर्थ०' ।२।२।५५। इति चतुर्थी ॥ ५ ॥

तवेश ! देशनाभ्यां द्वि-र्दिने के नेह देहिनः ।
प्रीताऽस्माभ्यां प्रपत्स्यन्ते, सम्यक्त्वचरणादिकम् ? ६

"Aho Shrut Gyanam"

अव० -दिने. द्विः प्रथमचरमपौरुष्योः प्रीता, वयं याभ्याम् ताभ्याम् ॥ ६ ॥

निशादिवससम्बन्धि–प्रतिक्रमणयोः क्रियाः।
अत्यस्मयोः कदा देव!, भवान् प्रादुष्करिष्यति ? ७

अव०–अस्मान् अतिक्रान्तौ तयोः 'प्रात्ययपरि०' ।३।१।४१। इति पूर्वपदप्रधानस्तत्पुरुषः अतिखट्वादिवत् । देवानामविरतत्वेन प्रतिक्रमणासम्भव इति ॥ ७ ॥

ध्यानयोर्दुर्गतिक्षिप्ता–स्मयोरौद्रार्त्तयोर्विभो ! ।
वर्त्तमानं जनं भव्यं, निवर्त्तय दयानिधे ! ॥८॥

अव०–दुर्गतौ क्षिप्ता वयं याभ्यां, पूर्वपूर्वबहुभवापेक्षयेदम् ।८।

जय त्वं नन्द भद्रं ते, धर्मतीर्थं प्रवर्त्तय ।
इत्यादिवचनैर्लोका–न्तिकाः शंसन्ति यं विभुम् ९
स एषोऽस्मद्बहुत्वेन, द्वित्वेनान्यपदस्य च ।
स्तुत एवं जिनो देयान्, निर्व्रणचरणे रतिम् १०।

इति अस्मच्छब्दबहुवचनबहुव्रीहिद्विवचनगर्भो लोकान्तिकदेवविज्ञप्तिरूपः साधारणजिनस्तवः षष्ठः ॥ ६ ॥

इतिषष्ठस्तवावचूरिः सम्पूर्णा ॥ ६ ॥ अथ शाश्वतजिनस्तवः—

श्रीऋषभवर्द्धमानौ चन्द्राननवारिषेणसञ्ज्ञौ च ।

"Aho Shrut Gyanam"

शाश्वतजिनेश्वरानिति नवीमि चतुरोऽप्यचतुरोपि ।१।

दूरस्थितवयं यूयं, ध्यानेनाऽऽसन्नतां गताः ।
प्रसीदत ममायोग्य—स्याप्यचिन्त्यसुखार्पणात् ।।२।।

अव०—अन्ये तु युकु णुकु व्यञ्जनादौ विति शिति ईनमपीच्छन्ति ' इति क्रियारत्नसमुच्चयोक्तेर्नवीमीति साधुः । दूरस्थितोऽहं येषां युष्माकं, ते ।। २ ।।

अत्रस्थ एव वन्देऽहं, साक्षाद्द्रष्टुमशक्तमान् ।
युष्मान्मानस एवेह, व्यापारो हि सतां मतः ।३।

अव०—अत्रस्थत्वेन साक्षाद् द्रष्टुमशक्तोऽहं येषां तान्, मनसोऽयं 'तस्येदम्'।६।३।१६०। अण्, मत इति प्राधान्येन ।३।

सम्पादनानलम्भूष्णु—माभिः पुष्पादिकैर्जिनाः ।
मर्त्यलोकासम्भविभिः, पूज्यध्वे सर्वदा सुरैः ।४।

अव०—सम्पादने अनलम्भूष्णुरक्षमोऽहं येषां मर्त्यानां दिव्यैरित्यर्थः ।। ४ ।।

दर्शनपूजनवन्दनसेवादिमनोरथोच्छ्वसितमभ्यम् ।
युष्मभ्यं भद्रं स्तात् सनाऽप्यनाद्यन्तरूपेभ्यः ।।५।।

अव—दर्शनादिमनोरथैरुच्छ्वसितोऽहं येषां तेभ्यः, अनाद्यन्तंशाश्वतं रूपं येषां तेभ्यः ।। ५ ।।

"Aho Shrut Gyanam"

प्रत्यक्षाश्रितदेवेभ्यः, परोक्षाश्रितमत्पुनः ।
युष्मद्भवेत्फलं तुभ्यं, सद्भावादुभयेष्वपि ॥६॥

अव०–प्रत्यक्षमाश्रिता देवा यान् तेभ्यः, अत्रस्थत्वेन परोक्षमाश्रितोऽहं यान् तेभ्यः, 'गम्ययप' इति पञ्चमी, संश्चासौ भावश्च, तस्मात् । उभ० देवेषु मयि च ॥ ६ ॥

सुलभं कृतपुण्यानां, दुर्लभं पापिनां पुनः ।
युष्माकं सद्गुणास्वाद–लुब्धमाकं सुदर्शनम् ॥७॥

अव०–सद्गुणास्वादं लुब्धोऽहं येषां ते, शोभनं दर्शनमस्तीति गम्यते ॥ ७ ॥

वागतिक्रान्तसौभाग्य–युष्मद्रूपकथास्वहो ! ।
अशक्तमासु सुत्रामा–दिमा अपि हि न क्षमाः ।८।

अव०–वागतिक्रान्तं सौभाग्यं यस्यैवंविधं युष्मद्रूपं, तस्य कथासु–स्तुतिरूपासु, अशक्तोऽहं यासु तासु ॥ ८ ॥

अस्मत्पदैकवचनान्यपदबहुत्वेन संस्तुता एवम् ।
मम ददतु शाश्वतजिनाः शाश्वतपदसम्पदं सपदि९

इति अस्मच्छब्दैकवचनबहुव्रीहिबहुवचनगर्भः शाश्वतजिनस्तवः सप्तमः ॥ इति सप्तमस्तवावचूरिः ॥ ७ ॥ अथ वीरस्तवः

सूर्येन्दू सविमानौ वन्दनहेतोरितौ मुदा नुवतः ।

"Aho Shrut Gyanam"

कौशाम्ब्यां समवसृतं, श्रीवीरं चरमतीर्थकरम् १।

अव०–सूर्येन्दू इति, धर्माधर्मादित्वात् सूर्यशब्दस्य प्राग्निपातः, वर्त्तमाननिर्देशस्तत्समयापेक्षः ॥ १ ॥

स्वतेजसा जितवयं, चातुरूप्यभृतस्तत्र ।
धर्मचक्राणि चत्वारि, दीप्यन्ते देशनाक्षणे ॥ २ ॥

अव०–स्वते० जितौ आवां यैः, चतुरूपस्य भावश्चातुरूप्यम् ॥ २ ॥

आन्तराणि तमांसि त्वं, भव्यस्वान्तगतान्यहो ! ।
अनीशितावानुच्छेत्तुं, निर्णाशयसि सर्वतः ॥३॥

अव०–अनीशितौ आवां येषां तानि, 'अलिङ्गे युष्मदस्मदी' इति न 'नपुंसकस्य शिः' ।१।४।५५। बहुव्रीह्यादौ लिङ्गाभ्युपगमे पि वा 'शसो न' ।२।१।१७। इति अनेन बाधितत्वान्न शिः । प्रियसुष्मान् कुलानि पश्य इति 'शसो न' इत्यस्य न्यासे उक्तेः ॥३॥

स्वामिन्ननुकृतावाभि–र्भास्वद्भामण्डलैस्तत्र ।
चतुर्भिर्देशनासद्म, सदोद्योतं विराजते ॥ ४ ॥

अव०–अनुकृतौ–तुलितौ आवां यैस्तैः, सदा उद्योतो यस्मिन् 'अव्ययम्' ।३।१।२१। इति च० समासः ॥ ४ ॥

"Aho Shrut Gyanam"

सङ्कोचादिविशेषाप्रौढावर्भ्यं सदा स्मिताब्जेभ्यः ।
त्वच्चरणयुग्मसङ्गमपूतेभ्यः प्रणमति न कस्कः ? ५

अव०—सङ्कोचादिविशेषेषु अप्रौढौ—असमर्थौ, आवौ येषां तेभ्यः, क्रियाभिप्रेयत्वात् सम्प्रदानत्वे चतुर्थी ॥ ५ ॥

प्राप्तत्वदुपास्तिभ्यो दिवस—निशाभ्यः
शुभोदयकृताभ्यः ।
हेतूभूतावत् को नार्जयति स्वर्गमोक्षसुखम् ॥६॥

अव०—प्राप्ता त्वदुपास्तिर्याभिस्तु ताभ्यः, हेतूभूतौ आवौ यासां ताभ्यः, आवयोर्दिनकरनिशाकरत्वेन प्रसिद्धः, 'गम्ययपः' ।२।२।७४। इति पञ्चमीभ्यस्॥ ६ ॥

रसलयलीनावार्कं त्वद्वचनानां सुधायमानाम् ।
तृप्ताः कदापि न स्युर्भव्यजना वहु लिहन्तोऽपि ७

अव०—रस० रसः—श्रवणरतिस्तत्र लय—एकाग्रता, तस्यां लीनौ आवां सूर्येन्दू येषां तेषां, त्वद्व० करणस्य सम्बन्धमात्र-विवक्षायां षष्ठी, यथा फलानां तृप्ता इति ॥ ७ ॥

देव ! सदृग् नौ न रुचिः,
प्रियाऽप्रियावासु कमलकुमुदेषु ।
विश्वप्रियस्य नु कृपारूपरुचिः सर्वसदृशी ते ।८।

"Aho Shrut Gyanam"

अव०--नौ-आवयो रुचिर्न सदृग् । कमलकुमुदेषु हेतुरूप विशेषणमाह-क्रमेण प्रियाप्रियौ आवां येषु तेषु । विश्वप्रियस्य ते कृपारूपा रुचिः सर्वेषु सदृशी अस्ति । रूपकमेतत् । वीतरागस्यापि कृपा वर्ण्या । एव. मुनिसुव्रतप्रभोरश्वबोधाय एकरात्र्या ६० योजनोल्लङ्घनेन भृगुकच्छागमनश्रवणात् 'मैत्रीपवित्रपात्राय, मुदितामोदशालिने । कृपोपेक्षाप्रतीक्षाय ( वीतरागस्तोत्र ) इति वचनाच्च ॥ ८ ॥

**स्तुतवन्तौ भक्त्यैवं यं देवं शशिरवी स मे वीरः ।**
**अस्मत्पदद्विवचनान्यबहुत्वनुतस्तनोतु शिवम् ।९।**

इति अस्मच्छब्दद्विवचनबहुव्रीहिबहुवचनमयः
सूर्येन्दुस्तुतिरूपः श्रीवीरस्तवोऽष्टमः ।

। इति अष्टमस्तवावचूरिः परिपूर्णा । अथ वीरस्तवः-

**श्रीवर्द्धमानमनघं सुरासुरा भक्तिभासुरा एवम् ।**
**गमयन्ति स्तुतिविषयं जिनेश्वरं समवसरणस्थम् ।१।**

अव०--सुरा० सुरासुराणां हि न निर्निमित्तकं वैरमपि तु राज्यापहारादिकृतमिति । समवसरणे नित्यवैरोपशमनाद्वा न 'नित्यवैरस्य' ।३।१।१४१। इतिसमाहारद्वन्द्वः । वर्त्तमान-निर्देशः प्राग्वत् ॥ १ ॥

**बद्धा अपि महाकाव्यप्रबन्धैर्विबुधैर्गुणाः ।**

"Aho Shrut Gyanam"

प्रसरन्ति जगत्पीठे, स्तवनुन्नवयं तव ॥ २ ॥

अव०—बद्धा० 'विबुधः पण्डिते सुरे' (हैम० अनेकार्थसङ्ग्रहः) इतिवचनात् वि० विद्वद्भिः। स्तवे नुन्ना:-प्रेरिता वयं यैस्ते। बद्धाः कथं प्रसरन्तीत्यापतिते विरोधाद्विरोधालङ्कारः ।२।

स्मृतमात्रा अपि घ्नन्ति, विघ्नं सङ्घजनस्य ये।
नामवर्णा न के जाप—रतास्मांस्तान् स्तुवन्ति ते ? ३

अव०—तान् ते नामवर्णान् के न स्तुवन्ति ? इत्युत्तरार्द्धेऽन्वयः। जापे रता वयं देवा येषां नामवर्णानां, तान् ॥ ३ ॥

पद्मसञ्चारसंरब्धा—स्माभिर्मोहतमोहरैः ।
रविणेव त्वया पादैः, को देशोऽद्योति न प्रभो ! ४॥

अव०—पद्मानां यः सञ्चारः—पदयोरधोन्यासस्तत्र संरब्धा वयं येषां तैः, पादैरिति 'गुरावेकश्चे'ति पूज्यत्वात् बहुवचनम्। पक्षे पादैः—किरणैः ॥ ४ ॥

निर्मितिमुदितास्मभ्यं तव समवसृतौ प्रदीपवप्रेभ्यः ।
द्वादशयोजन्या अपि धन्याः के के न गच्छन्ति ? ।५।

अव०—निर्मितिर्निर्माणं तया मुदिता—हृष्टा वयं येषां तेभ्यः, 'गतेर्नवानाप्ते' ।२।२।६३। इति चतुर्थी। यथा



"Aho Shrut Gyanam"

ग्रामाय गच्छतीत्यादि। द्वादशानां योजनानां समाहारे, तस्याः ॥ ५ ॥

पुरःस्थितास्मत्पर्षद्भ्यो, वर्षति त्वयि गीःसुधाम् ।
सबाह्याभ्यन्तरस्तापो, दवीयान् जायते प्रभो ! ॥६॥

अव०-पुरःस्थिता वयं देवा यासां ताभ्यः ' आराद‍र्थैः ।२।२।७८। इति पञ्चमी। सह बाह्येन वर्त्तते यः, स चासावभ्यन्तरश्च। अतिशयेन दूरो दवीयान् ' गुणाङ्ग० ' ।७।३।९। इति ईयसि 'स्थूलदूर०' ।७।४।४२ ।इति अन्तस्थालोपे गुणे च ॥६॥

चतुर्णामाननानां ते, मोहितास्माकमीक्षणे ।
तृप्तिर्न जायते देव ! लावण्यामृतवारिधे ! ॥७॥

अव०-मोहिता वयं यैस्तेषां, ईक्षणे-दर्शने ॥ ७ ॥

प्रातिहार्येषु निर्माण-सुहितास्मासु ते प्रभो ! ।
स्पष्टं दृष्टेषु सद्दृष्टिः, को न चित्रीयतेतराम् ! ।८।

अव०-निर्माणेन सुहिताः-प्रीता वयं येषां तेषु। सती-सम्यग्दृष्टिर्यस्य सः ॥ ८ ॥

अस्मत्पदबहुव्रीहि-बहुत्वरचनाञ्चितः ।
इत्यमर्त्यकृतो वीरस्तवः स्ताद् वास्तवश्रिये ॥९॥

इत्यस्मद्बहुव्रीहिबहुवचनमयः सुरासुरविज्ञप्तिरूपः स्तवो

"Aho Shrut Gyanam"

नवमः । एवं च समाप्ताऽस्मच्छब्दत्रिषष्टिरूपचार्वी नवस्तवी.

अव०–इत्यमर्त्यशब्दः सामान्येन देवाभिधायकः, तेन अमर्त्यशब्देन सुराणामसुराणां च ग्रहणान्न प्रक्रमभङ्गप्रसङ्गः । चास्तवश्रिये–शिवसम्पदे ।। ९ ।।

इति नवमस्तवावचूरिः परिपूर्णा ।।

श्रीदेवसुन्दरगुरूत्तमशिष्यमुख्य-
श्रीज्ञानसागरगुरुक्रमपद्मरेणोः ।
श्रीसोमसुन्दरगुरोरिति युष्मदस्म-
दष्टादशस्तवकृतिः कृतिनां मुदेऽस्तु ।।१।।

एतामष्टादशस्तोत्री–मुद्युक्तो गुरुभक्तितः ।
अशोधयच्छुद्धबुद्धिः, सोमदेवगणिर्गुणी ।।२।।

इतिश्रीतपागच्छाधिराजपरमगुरुभट्टारकपुरन्दरश्रीसोमसुन्दरसूरिभिः क्षुल्लादिबुद्धिव्युत्पत्त्युपकारकौतुकितया कृता अष्टादशस्तवाः चिरं जीयासुः ।

इत्यष्टादशस्तोत्र्या मुनिनिधिमनुमिते १४९७ वर्षे परमगुरुश्रीतपागच्छनायकभट्टारकपुरन्दरश्रीपूज्यश्रीसोमसुन्दरसूरिराजकृतायास्तच्छिष्याणुसोमदेवगणिरचिता संक्षिप्तावचूर्णिः ।।

"Aho Shrut Gyanam"

# पंचकल्लाणं थोत्तं । (२)

## ( अज्ञातकर्तृकम् )

तित्थं पयवण सुयदेवयं च नमिऊण सव्वभावेण ।
कल्लाणपंचएणं, आइजिणिंदं नमंसामि ॥१॥
चवणं जम्मणनिक्खमण, केवलं पंचमं च निव्वाणं ।
संखेववित्थरेणं, अहक्कमं कित्तइस्सामि ॥२॥
सिरिनाभिनरिंदसुओ, मरुदेवीनंदणो उसहसामी ।
जयइ पढमो जिणिंदो, सव्वट्ठमहाविमाणचुओ ॥३॥
पेच्छइ चोद्दस सुमिणे, मरुदेवीसामिणी सुहप्पसुत्ता ।
गब्भगए भगवंते, पहायसमयंमि वसहाई ॥४॥
परितुट्ठा य भगवई, नाभिनरिंदस्स ते निवेएइ ।
सोवि य आणंदिअंगो, सुमिणाण फलं परिकहेइ ॥५॥
होही तव वरपुत्तो, खायजसो तिहुअणस्स अब्भहिओ ।
अम्हं कुलप्पईवो, नरनाहो कित्तिगुणनिलओ ॥६॥
अवितहवयणं तुम्हं, देवी आणंदिया य सपणामा ।
भवणे सुहासणत्था, सक्कागमणं महामहिमा ॥७॥
अमराहिवो पणामं, काउं देवीएँ नाभिपत्तीए ।
संथुणइ हिट्ठतुट्ठो, नमोऽत्थु ते रयणकुच्छीए ॥८॥
भुवणब्भहियाए णमो णमो देवि भुवणलच्छीए ।
तिहुयणलग्गगखंभो, जीसे गब्भंमि अवयरिओ ॥९॥

"Aho Shrut Gyanam"

धन्ना तं सुकयत्था, सुजीवियं तुब्भ मणुयजम्मो य ।
जीए उयरेण धरिओ, तिहुयणचूडामणी पढमो ॥१०॥
एवं बहुप्पयारं, उववूहेउं दिवं गओ खिप्पं ।
सुरसहिओ विबुहवई समत्त कल्लाणयं पढमं ॥११॥
बीयस्स समारम्भे, मरुदेवी संथुया य सक्केणं ।
गब्भं वहइ सुहेणं, कमेण जाओ नरिंदवई ॥१२॥
दसदिसि उज्जोयंतो, दिसाकुमारीहिं जम्मकयकिच्चो ।
न्हविओ य सुरवरेहिं, वरकंचणसेलसिहरंमि ॥१३॥
दिव्वविलेवणआभरणमउडवरदामभूसियसरीरो ।
सुरवइवंदियचलणो, जणणीए समप्पिओ सिग्घं ॥१४॥
पंच दिव्वाणि तत्थ य, गंधोदगपुप्फवुट्ठिवसुहारा ।
दुंदुहिचेलुक्खेवो, जयजयरवबहिरियं भुवणं ॥१५॥
सुरवइ नट्टं सुरसुंदरीण पेक्खेवि विम्हिया देवा ।
पढमजिणजम्मकालेऽणेगविहं परमभत्तीए ॥१६॥
सक्कवयणेण धणओ, मणिकंचणरयणपंचवन्नेहिं ।
नाभिनरनाहभवणं, आऊरइ हट्ठतुट्ठो य ॥१७॥
तुट्ठेहिं मिहुणगेहिं, कयजम्ममहूसवो सह सुरेहिं ।
इय बीयं कल्लाणं, पढमजिणिंदस्स सम्मत्तं ॥१८॥

कयजम्माईमहिमा, देवा नंदीसरंमि गंतूणं ।
सासयजिणाण पूयं, नट्टं गीयं च कुव्वंति ॥१॥

"Aho Shrut Gyanam"

सुरमिहुणगपरियरिओ, कमेण संवड्ढिओ तियसमहिओ ।
सारयससिव्व भयवं, पयडंतो देहकंतीए ॥२॥

सुरवइआणाएँ सुरो, जगप्पहाणस्स दिव्वमाहारं ।
देवकुराए गहिउं, निवेयई उसभसामिस्स ॥३॥

अह जोव्वणंमि पत्ते, सुरिंदमहिए जिणंमि सुरनाहो ।
आगम्म विभूईए, विवाहकिच्चं कुणइ सव्वं ॥४॥

सह देवेहिं परिगओ, वंदित्ता तिहुयणच्चियं उसभं ।
पुच्छंतमिहुणगाणं, भयवं परिकहइ करणिज्जं ॥५॥

रायाभिसेयकाले, पुणरवि आगम्म भत्तिराएणं ।
सीहासणंमि पवरे, अहिसिंचइ कणयकलसेहिं ॥६॥

सुहगंधोदयदेवंगवत्थ आभरणदिव्वमउडाई ।
हरिचंदणगंधुक्कडविलेवियं कुणइ जगनाहं ॥७॥

वरसुरभिमल्लसुरतरु-सुयंधकुसुमच्चियं तियसणाहं ।
पवरपलम्बियमालं, गंधेणासत्तभमरउलं ॥८॥

पउमिणिपुडेहिं तोयं, आणेउं मिहुणगेहिं दट्ठूणं ।
पयगंकयंमि खित्तं, तुट्ठो सक्को य सुरराया ॥९॥

कंचणविणीयनयरी, तेसिं काऊण पत्तु सुरलोए ।
उग्गा भोगा राइन्नखत्तिया आणं पडिच्छंत्ति ॥१०॥

सत्तीएँ पालियजणो, संगहियतुरंगहत्थिगोरयणो ।
बहुगामनगरपट्टण, दंसिय कम्माण आयारो ॥११॥

"Aho Shrut Gyanam"

पढमं रायाहिराओ, निप्पडिवक्खो अणंतविरिओ य।
सयपुत्तनमियचलणो, नरनाहसहस्सपणिवइओ ॥१२॥
परिदंसियसिप्पकलो. पमुइय निच्चं सदेव लोगंमि।
वित्थरियदानविन्नाणरयण रयणायरो जयइ ॥१३॥
परिपालिऊण रज्जं, भवियाण हियट्ठयाएँ तो भयवं।
भरहाइदत्तपुहईरज्जं, रयणाणि सव्वाणि ॥१४॥
संवच्छरियं दाणं, कणगाइ पयच्छिऊण उद्दामं।
सहिओ पुरंदरेहिं, सव्वेहिं सुरासुरेहिं च ॥१५॥
मणिकणगरयणसीहा-सणंमि ण्हविओ सुरेहिं जगसामी।
कयकोउयमंगलगीयनट्टआउज्जसद्देणं ॥१६॥
वत्थाहरणविलेवण-कुसुमाइ जगेऽवि गरुयमोल्लाइं।
रेहंति विसेसेणं, जगगुरुणो अंगलग्गाइं ॥१७॥
उच्छलइ नंदिसद्दो, जय जय तेलोक्कभाणु सुरनाह !।
भवणस्स मोहतिमिरं, केवलकिरणेहिं अवणेहि ॥१८॥
जय जगपईव ! वच्छल ! जगबंधव ! जय तिहुयणमयंक !।
धम्मकहाजुण्हाए, पडिबोहसु भवियकुमुयाइं ॥१९॥
रयणदाणेण एवं, जह जम्मदालिद्दं फेडेसि।
तह दुहियजीवाण सामिय, चरित्तनिहिप्पयाणेणं ॥२०॥
सिबियाए सुदंसणाए, मणिमयसीहासणंमि उवविट्ठो।
सक्कीसाणसुराहिव उभओ चामरविहत्थेहिं ॥२१॥

"Aho Shrut Gyanam"

चउविहदेवनिकाएहिं, संथुयमाणो नरिंदपरियरिओ ।
सुरतूरगहिरजयजयरवेण सिद्धत्थवणसंडे ॥२२॥
निक्खमणमहिमअक्खित्ततिहुयणो नरवईसहस्सेहिं ।
चउहिं सहिओ महप्पा, तिलोयपुज्जो य निक्खंतो ॥२३॥
कयचउमुट्ठीलोओ, पंचममुट्ठी विरायमाणो य ।
दट्ठूण देवराया, अच्छउ सामीति विन्नविओ ॥२४॥
सावज्जजोगविरओ, गहियपइन्नो महामुणिदवई ।
विहरइ गामाइं तओ, देवावि गया य सट्ठाणे ॥२५॥
तइयंमि सम्मत्तंमी, चउत्थकल्लाणएण थोसामि ।
जं ण मए इह भणियं, तं सव्वं आगमा णेयं ॥२६॥
कयघोरतवचरणो, साहियइंदियअणंगसेणो य ।
जियरागदोसमोहो, परीसहारीहि अव्वहिओ ॥१॥
णिज्जियकसायमल्लो, पालियइरियाइपंचसमिइओ ।
भगवं तिगुत्तगुत्तो, तिदंडविरओ य णिस्सल्लो ॥२॥
जत्थऽत्थमियनिवासी, गिरिगुहकंदरतरुस्स पामूले ।
कत्थइ सिलायलगओ, चिट्ठइ भयवं सुहज्झाणे ॥३॥
सत्तभयविप्पमुक्को, अट्ठमयट्ठाणवज्जिओ भयवं ।
नवबंभचेरगुत्तो, परिवालइ दसविहं धम्मं ॥४॥
पुत्ताइचत्तनेहो, परिहरियासेससयणसंबंधो ।
विहरइ ममत्तरहिओ, पुरपट्टणगामनगराइं ॥५॥

"Aho Shrut Gyanam"

अमुणियभिक्खाइजणो, मणिकंचणरयणधणसमिद्धोवि ।
परमेसरो अदीणो, विहरइ वसुहं निराहारो ॥६॥
ते चत्तारि सहस्सा, भरहेण निवारिया य रायेणं ।
पढमपरीसहचइया, वणमज्झे तावसा जाया ॥७॥
नमिविनमिरायपुत्ता, न समीवे आसि दाणकालंम्मि ।
तिहुयणनाहस्स तओ, ओलग्गंती पयत्तेणं ॥८॥
धरणिंदस्सागमणं, जिणवरभत्तीएँ पूयसक्कारं ।
ते दिट्ठा पूयंता, दिन्नाओ ताण विज्जाओ ॥९॥
मा एएसिं सेवा, रिसहजिणिंदस्स निप्फला होइ ।
वेयड्ढस्साहिवई, जाया विज्जाहरा दोवि ॥१०॥
संवच्छरंमि पुन्ने, सेयंसनरिंदभवणसंपत्तो ।
दट्ठुं तिलोयनाहं, सहरिसमब्भुट्ठिओ सहसं ॥११॥
तिपयाहिणेवि वंदिय, जाईसरणेण मुणेवि दाणविही ।
सेयंसो पल्हत्थइ, इक्खुरसं कणयकलसेहिं ॥१२॥
करकमलअंजलीए, दिज्जंतं पडिच्छए भयवं ।
दि(द)व्वादिभावसुद्धं, नाउं निरवज्जमाहारं ॥१३॥
नरनारीहिं महियलं, गयणयलं छाइयं सुरगणेहिं ।
सियछत्तचमरऊसियधंटारवमणिविमाणेहिं ॥१४॥
सेयंस अहो ! दाणं, धन्नो धन्नो तुमं जगे जेणं ।
पाराविओ जिणिंदो, पवत्तिया पढमभिक्खा य ॥१५॥

"Aho Shrut Gyanam"

गंधोदयपुप्फाणि य, वुट्ठा य महग्घरयणवसुहारा ।
दुंदुहिचेलुक्खेवो, जयजयरवबहिरियं भुवणं ॥१६॥
वरतूरसंखकाहलनिग्घोसपणच्चियाउ देवीओ ।
एवं नरिंददइया, महामहो देवमणुयाणं ॥ १७ ॥
विहिणा पारेवि तओ, आहिंडइ वसुमइं गुणसमिद्धो ।
मेरुव्व निप्पकंपो, सीयाइपरीसहे सहइ ॥१८॥
आरामुज्जाणेसु य, गोपुरसुन्नहरजाणसालासु ।
बहुसंठियउस्सग्गो, धम्मज्झाणेण नवि खलिओ ॥१९॥
बहलीअडंबइल्ला—जोणगविसयाइ परिअडंतस्स ।
भद्दगमणुया जाया, वयणाणुट्ठाणहियहियया ॥२०॥
लंघेवि पव्वया तह, नईओ विहरेवि अणारियं खेत्तं ।
उवसामिया य मिच्छा, दुट्ठावि महाणुभावेणं ॥२१॥
कयकिच्चोवि हु भयवं, पवज्जाईय भवविणासाय ।
एवंविहि दंसितो, छउमत्थाणं य परिभमइ ॥२२॥
सपरिकमो य धीरो, भीसणरन्नेऽवि ठाइ उस्सग्गे ।
ज्झाणग्गिए दहंतो, निरुहइ कम्मिधणं पउरं ॥२३॥
पुन्ने वाससहस्से, पत्तो उज्जाणपुरिमतालंमि ।
नग्गोहदुम्मस्स हेट्ठि, उप्पन्नं केवलं नाणं ॥२४॥
सव्वं लोगालोगं, निस्संदिद्ध परिप्फुडं चेव ।
भयवं जाणइ पासइ, करयलगयसच्छरयणं व ॥२५॥

"Aho Shrut Gyanam"

चलियासणो य सक्को, पडिहारं आणवेइ सव्वसुरा ।
मेलेइ तक्खणेणं, घंटारवगहिरघोसेणं ॥२६॥
वरमउडकुंडलधरा, भूसियकेयूरहारकडएहिं ।
तुरयविमाणारूढा, सिग्घं च समागया विबुहा ॥२७॥
पज्जलिअविविहरयणा, उज्जोइयभुवणनट्ठतमनिवहा ।
गुरुयाणंदपहिट्ठा, मुक्का य कयंतदुट्ठेगं ॥२८॥
मिलिया सुरासुरगणा बत्तीससुराहिवा तओ तुरियं ।
केवलमहिमं काउं, विणीए नयरीए उइन्ना ॥२९॥
रइयं च समोसरणं, मणिमयसिंहासणं असोगतरुं ।
तत्थ उ पढमजिणिंदो, विहीएँ सीहासणे ठाइ ॥३०॥
भरहोऽवि चक्कवट्टी, केवलमहिमं जिणस्स नाऊणं ।
सव्विड्ढीए चलिओ, सियछत्तो गयवरारूढो ॥३१॥
पुत्तविओयसुदुक्खां, पुरओ मरुदेवीसामिणीं काउं ।
दट्ठुं जिणवररिद्धीं, विमाणसुरछाइयं गयणं ॥३२॥
पागारतियमणितोरणाइदुंदुहिनायजयसद्दं ।
सोउं जिणजणणीए, उप्पन्नं केवलं नाणं ॥३३॥
आउं च परिसमत्तं, सुरेहिं सक्कारिया पढमसिद्धा ।
भरहोऽवि सोगहरिसं, अणुहवई थेवकालंति ॥३४॥
उत्तिन्नो मयगलाओ, नरवई मोत्तण पंचकउहाइं ।
छत्तं वाहण खग्गं, मउडं तह चामराओ य ॥३५॥

"Aho Shrut Gyanam"

दारुत्तरेण पविसइ, दट्ठूणं जिणं तिलोगपरियरियं ।
दुंदुहिज्झयछत्तत्तय चामरसीहासणारूढो ॥३६॥
हरिसरोमंचजुत्तो, तिपयाहिण वंदिउं सपरिवारो ।
उवविट्ठो भरहवई, सक्काइ ठिया उ सट्ठाणे ॥३७॥
धम्मं कहेइ भयवं, नारयतिरियमणुयदेवाणं ।
जह होइ दुहसुहाइ, उप्पत्ती जेण कम्मेणं ॥३८॥
तह सव्वदेसविरई, पयासई वित्थरेण सुरमहिओ ।
भरहपुत्ताइ सोउं, बहवे तत्थेव पव्वइया ॥३९॥
बंभीपमुहा अज्जा, सावय तह साविया अणेगाओ ।
इय पढमसमणसंघो, उप्पन्नो उसभनाहस्स ॥४०॥
एवं तु अणेगाणं, पडिबोहं काउ उट्ठए भयवं ।
देवावि सभवणगया, समत्त कल्लाणयचउत्थं ॥४१॥
कम्मकलंकविमुक्को, जिणचंदो पंचमंमि पारद्धे ।
समणसीहेहिं सहिओ, परिवज्जियविसयपंकेहिं ॥१॥
धम्मवरचक्कवट्टी, सुसत्थवाहो य मोक्खनयरस्स ।
चउगइवाहिसु वेज्जो, सरणं भवघोरभीयाणं ॥२॥
दिप्पंतरयणसुरकयपउमेसु निहित्तचलणसयवत्तो ।
संचल्लइ मणिनिम्मल–पुरओ ठियधम्मचक्केणं ॥३॥
सुरविज्जाहरकिन्नर – नरवइगंधव्वजक्खपरियरिओ ।
रक्खंतो जमदंडाउ तिहुयणं जीवहरिणाओ ॥४॥

"Aho Shrut Gyanam"

नयरीपट्टणवेला–उलाइं आगरमडंबखेडाइं ।
परिसक्कइ जगजेट्ठो, छज्जीवहियंकरो भयवं ॥५॥
सुररइयसमोसरणो, अट्ठमहापाडिहेरसंजुत्तो ।
निरुवमरूवसिरीओ, चउतीसाइसयगुणकलिओ ॥६॥
नासइ अन्नाणतमं, जीवाण विवेगरयणदाणेणं ।
दसबारसभेएणं, धम्मेण जगं समुद्धरइ ॥७॥
तित्थस्स हेउ णाउं, पुंडरियं गणहरं सपरिवारं ।
पेसइ सिरि सेत्तुज्जे, पियामहो उसभसामित्ति ॥८॥
उग्गतवचरणरुई, गुरुआणाचरणकरणमुज्जुत्तो ।
गंतूण विमलसेले, भवियाण करेइ उवयारं ॥९॥
विरइयचोद्दसपुव्वो, संसयघणतिमिरसूरपज्जलिओ ।
भवसयसहस्सलक्खाण साहणं कुणइ जीवाणं ॥१०॥
निद्दलियघाइकम्मो, उप्पन्नअणंतकेवलुज्जोओ ।
पंचकोडीहिं सहिओ, निव्वाणमणुत्तरं पत्तो ॥११॥
भरहोऽवि णरिंदवई, कंचणभवणाइं जिणवरिंदाणं ।
सेत्तुज्जे कारवेइ पुंडरियसुए गए सिद्धिं ॥१२॥
पच्छा विहरेइ महिं, सुरसहिओ तं गिरिं समारुहइ ।
नाहिसुओ तित्थयरो, सुरागमो सरण धम्मकहा ॥१३॥
एवं बावीसजिणा ओसरिया कोडिलक्ख सिद्धा य ।
एएण कारणेणं सेत्तुज्जगिरी महातित्थं ॥१४॥

"Aho Shrut Gyanam"

नमिविनमिरामपंडव–नारयपज्जुन्नसंबपमुहाओ ।
दविडनरिंदाण समं, सिद्धाओ णेगकोडीओ ॥१५॥
सेसजिणाणं काले, जे सिद्धा तह जिणंतरे चेव ।
सेत्तुञ्जे ताण संखा, अइसयणाणी परिकहेइ ॥१६॥
णहु एत्थ समोसरिओ, नेमिजिणिंदो भवारिनिद्दलणो ।
बारवइमाइनयरीओ विहरिओ भव्वसत्ताणं ॥१७॥
पडिबोहं काऊणं, सक्काइदसारकण्हरामसुओ ।
नरवइमउडधराणं विहिपणओ चरमकालंमि ॥१८॥
उज्जितमहिहरम्मी, सहिओ अणगार पंचहिं सएहिं ।
छत्तीसब्भहिएहिं, पत्तो परमेसरो मोक्खं ॥१९॥
पुव्विं पच्छा य तहा, बहवे सिद्धा य लोगनाहस्स ।
बहुपावसंचयहरं, नमामि उज्जितवरतित्थं ॥२०॥
तित्थयरकेवलीहिं, गणहरपुव्वधरसाहुमाईहिं ।
जो कोइ सुहपएसो अक्कंतो सो महातित्थं ॥२१॥
पुणरवि भगवं विहरइ भारहे संजयाण लक्खाइं ।
नाऊण चरमकालं, अट्ठावयनगवरारूढो ॥२२॥
दसहिं सहस्सेहिं समं, मुणिवरतवचिन्नचरमदेहाणं ।
काऊण अणसणविहीं, सव्वेहिं समो गओ मोक्खं ॥२३॥
गोसीसचंदणागरुचियाए सक्कारिओ सुरवरेहिं ।
भरहागम जिणभवणं कणयमयं रयणमालाहिं ॥२४॥

"Aho Shrut Gyanam"

जयघंटागहिररवं सव्वेसि जिणाण तत्थ पडिमाओ ।
जो जहप्पमाणवन्नो तह निम्मविओ य जिणकहिओ ॥२५॥
चउवीसं तित्थयरा. फुरंतरयणेहिं पंचवन्नेहिं ।
एवं विहीएँ भाउयसयस्स थूभाणि कारवई ॥२६॥
पडिमाउ तत्थ तेसिं, पइट्ठिया ण्वहणमाइसक्कारं ।
पूयाइकयविहाणो. सपरियणो परमभत्तीए ॥२७॥
भरहो थुणइ पसंतो, जय जय देवाहिदेव ! जगतिलय ! ।
जयगुरु ! तिहुयणपालग !, ससुरासुरनमियपयकमल ! ।२८।
जय चिंतामणि ! जय कप्परुक्ख ! जय पढमपयडियसुधम्म ! ।
इक्खागवंसभूसण !, पढमजिणेसर ! नमो तुब्भं ॥२९॥
जय तेलोक्कपियामह !, बत्तीसपुरंदरेहिं थुयचलण ! ।
भवजलहिनिबुड्डाणं, जीवाण विसालदढपोय ! ॥३०॥
जय तित्थनाह ! सामिय !, दाउं णाणाइगं महामंतं ।
भीमभवरक्खसाओ. लोगतिगं रक्खियं सव्वं ॥३१॥
जय रागग्गहफेडण !, जय दोसभुयंगदुट्ठनिद्दवण ! ।
मोहपिसायवियारण ! वारण ! कोहाइभूयाणं ॥३२॥
असंमजसकलिघायग !, पमायतेणाण निग्गहसमत्थ ! ।
रोद्दपमुहा य नट्ठा, तुह दंसणसीहनाएणं ॥३३॥
जय पुरिसोत्तम ! को तुम्ह, संथवं अविगलं जगे कुणइ ? ।
उद्धरियं जेण जगं, निवडंतं भीमनरएसु ॥३४॥

"Aho Shrut Gyanam"

मिच्छत्ततिमिरनासण !, पडिबोहग ! भवियपउमकोडीणं ।
भुवणुज्जोयस्स तुमे, सामिय ! जिणसूर ! पणमामि ॥३५॥

जय जीवाइपयासग !, जय पंचत्थिकायमइयस्स ।
लोगस्स सुहुमभासग !, खयकारग ! जम्ममरणाणं ॥३६॥

एगंतहियं पत्थं, अतित्तिजणगं च तुम्ह वरवयणं ।
को पावइ महायस !, गुरुतरपुण्णेहिं परिहीणो ॥३७॥

मूलुत्तरपयडीओ, कम्मस्स कहेइ भव्वजीवाणं ।
तेण समं दुट्ठेणं कओ विओगो महामुणिणा ॥३८॥

जय कुगइपहनिवारण !, जय सोग्गइमोक्खपयडियावास ! ।
जय सयलसोक्खदायग !, जय सामिय ! तिहुयणुद्धरण ! ।३९।

सेसाइं जे य जिणा, अजियाई वद्धमाणपज्जंता ।
लोगस्स उज्जोयगरा, अणंतविरिया पुरिससीहा ॥४०॥

तीयाणागय तित्थं–करा य वंदामि तिहुयणवरिट्ठा ।
विहरंति जे य पुज्जा, अड्ढाइज्जेसु दीवेसु ॥४१॥

सिद्धाणि सव्वकज्जाणि, जेसिं निरुवमसुहं च संपत्ता ।
ते सिद्धा पणमामि, पारगया भवसमुद्दस्स ॥४२॥

आयरिया वि हु सव्वे, उवज्झाया साहु सीलगुणजुत्ता ।
आयारधरा लोगुत्तमा य मणवयणकाएहिं ॥४३॥

वंदइ भरहाहिवई, देवा वंदित्तु गया नियावासं ।
एवंपि महाइसयं सम्मत्त कल्लाणपंचमयं ॥४४॥

"Aho Shrut Gyanam"

आषाढचउत्थीए, वहुलाएँ चुओ जाओ चेत्तस्स ।
बहुलट्ठमीएँ भयवं एयाए तिहीए निक्खंतो ॥४५॥
फग्गुणबहुलेक्कारसि जिणिंदउसभस्स केवलुप्पत्ती ।
माहे य बहुलतेरसि संपत्तो सासयं ठाणं ॥४६॥
तत्तो भरहनरिंदो, रज्जं काऊण भुंजिओ भोए ।
आयंसघरे नाणं, पवज्ज कमेण निव्वाणं ॥४७॥
एयं जो पढइ नरो, पढमजिणिंदस्स पंचकल्लाणं ।
निसुणइ जो भावेण सोवि सुहं सासयं लहइ ॥४८॥
वाहिवेयालभाई नासइ दालिद्दुक्खदोहग्गं ।
एयं पावइ य लहुं पडिहणिउं सव्वविग्घाइं ॥४९॥
पवयणदेवीएँ नमो, जीएँ पसायेण पंचकल्लाणं ।
मंदमइणा विरइयं कल्लाणपरंपराहेउं ॥५०॥
पंचकल्लाणं सम्मत्तं ॥

## श्रीपादलिप्तसूरिविरचितः सुवर्णसिद्धिगर्भः

# श्रीमहावीरजिनस्तवः (३)

अवचूरिसंयुतः ।

गाहाजुयलेण जिणं मयमोहविवज्जियं जियकसायं ।
थोसामि तिसंघाएण तिन्नसंगं महावीरं ॥१॥

सुकुमालधीरसोमा रत्तकसिणपंडुरा सिरिनिकेया ।
सीयंकुसगहभीरू जलथलनहमंडणा तिन्नि ॥२॥
न चयंति वीर लीलं हाउं जे सुरहिमत्तपडिपुन्ना ।
पंकयगइंदचंदा लोयणचंकम्मियमुहाणं ॥३॥

अव०—यथाऽस्यातिलघीयस्त्वेपि स्तवनत्वं स्यादेव, आगमे पद्यचतुष्कादारभ्य यावदष्टोत्तरं पद्यशतं स्तवेषु सङ्ख्याभिधानाद् । अथ गाथार्थः कथ्यते, अस्य स्तवस्य गाथाचतुष्टयात्मकत्वेऽपि आद्यान्त्यगाथयोर्यथासङ्ख्यं प्रस्तावनानिगमनरूपत्वात्, गाथायुगलेनैव भगवतो लोचनचङ्क्रमितमुखानि वर्णयति,–' सुकु० ' ' न च० ' । ' वीर 'त्ति लुप्तषष्ठीविभक्तिकं पदं, प्राकृतत्वात् । श्रीवीरस्य सम्बन्धिनां ' लोयण० ' लोचनौ–नेत्रे, ' चङ्क्रमण ' पादविहरणात्मिका गतिरित्यर्थः, मुखं–चंद्रवदनं, द्वन्द्वः । तेषां लीलां–शोभां सादृश्यमित्यर्थः । ' हातुं ' गंतुं-प्राप्तुं ' न चयन्ति ' न शक्नुवन्ति. 'शकेश्चयतरतीरपारा' इति सिद्धहेमप्राकृतलक्षणात्, हातुमिति 'ओहाङ्क् गतौ' चित्यस्य धातोः प्रयोगः। 'जे' इति पादपूरणे, ' इजेराः पादपूरणे ' इति प्राकृतवचनात् । के न शक्नुवन्ति ? इत्याह–' पंकय० ' कमल-महागज-शशिनोऽत्र यथासङ्ख्यमलङ्कारः । पङ्कजं भगवन्नेत्रयोर्लीलां हातुं न शक्तं, तस्मादप्यत्यन्तरमणीये नेत्रे । गजेन्द्रश्चङ्क्रमितलीलां गन्तु-

"Aho Shrut Gyanam"

मशक्तः गजेन्द्रगतितोऽप्यनन्तप्रकर्षशालित्वाद्भगवद्गतेः । चन्द्रस्तु मुखलीलां गन्तु न शक्तः, तस्मादप्यात्यन्तिकगुणोपेतत्वाद्भगवद्वदनस्य । पङ्कजादयः किं वि० ? 'सुकु०' तत्र सुकुमारं –कोमलं, प्रकृत्या मृदुलं पङ्कजं । धीरो–निष्प्रकम्पः, शौण्डीर्ययुक्तत्वाद्गजेन्द्रो धीरः । 'सौम्यो' नेत्राह्लादकारी, चन्द्रोऽपि स्वभावात् तापनिर्वापणप्रवणत्वात् सौम्यः । पुनः किं वि० ते ? 'रत्त०' पङ्कजं हि कुमुदोत्पलादिविशेषनिर्देशं विना कविसमये रक्तमेव वर्ण्यते । 'नागेन्द्रो' अहिः, प्रायः कृष्ण एव स्यात् । चन्द्रस्तु पाण्डुर एव । पुनस्त्रयः किंवि० ? 'सिरिनि०' 'श्रीः' लक्ष्मीर्देवता, तस्या 'निकेता' निवासाः, लक्ष्मीर्हि पङ्कजे गजे चन्द्रे च वसतीति रूढिः, तथा च लक्ष्मीस्तवे–'गजे शङ्खे मधौ छत्रे, चन्द्रे पद्मे जिनालये । मौक्तिके विद्रुमे स्वर्णे, या नित्यं परमेश्वरी ॥१॥ पुनः किंवि० ते ? 'सीयंकु०' शीतं अङ्कुशो ग्रहश्च तेभ्यो 'भीरवः' कातराः । पङ्कजं हि तुषारेण दह्यते इति शीतभीरुः, गजेन्द्रस्त्वङ्कुशतोदनाद्भीरुः, चन्द्रः ग्रहात् सामर्थ्यात् राहुतो भीरुः, पुनः किंविशिष्टाः ? 'जलथल०' जलं च स्थलं च नभश्च तानि मण्डयन्ति–अलङ्कुर्वन्तीत्येवंशीला जल० मण्डनाः, 'तिन्नि' त्रयस्त्रिसङ्ख्याः । पुनः किंवि० ? 'सुरहि०' पङ्कजं सुगन्धि, गजेन्द्रः मत्त उन्मदिष्णुः, चन्द्रस्तु प्रतिपूर्णः सम्पूर्णमण्डलस्तस्यैव हि मुखेनौपम्यं ग्रहभीरुत्वं युज्यते ।

"Aho Shrut Gyanam"

एवंप्रकारनैसर्गिकौपाधिकगुणविशिष्टा अपि न शक्ताः इति गाथाद्वयार्थः ॥

अथ चतुर्थगाथया स्तुतिं निगमयन् प्रणिधानमाह-

**एवं वीरजिणिंदो अच्छरगणसंघसंथुओ भयवं ।**
**पालित्तयमयमहिओ दिसउ खयं सव्वदुरियाणं ॥४॥**

इति श्रीपादलिप्तसूरिविरचितः स्वर्णसिद्धिगर्भः
श्रीमहावीरजिनस्तवः ।

'एवं०' पूर्वोक्तप्रकारेण, जिनाः-रागादिजेतृत्वात् सामान्यकेवलिनस्तेषु इन्द्रः ३४ अतिशयसमृद्ध्यनुभवनाज्जिनेन्द्रः, वीरश्चासौ जिनेन्द्रश्च वीर० । 'अप्सरसो' देवाङ्गना गणयन्ति-भोगार्हत्वात् बहुमन्यन्ते, अप्सरोगणाः-देवास्ते च सङ्घश्च-चतुर्वर्णः श्रमणसङ्घस्ताभ्यां संस्तुतः, स्तवकर्त्तुरपि सङ्घान्तर्गतत्वात् मया च संस्तुत इति गम्यते । भगवान् 'ऐश्वर्यस्य सम०' षड्विधभगयुक्तः । 'पालि०' पालयन्ति-रक्षन्तीति पालिनः-पालकास्तेषां त्रयं पालित्रयं, तत उर्ध्वलोकपाला इन्द्रास्तिर्यग्लोकपाला नरेन्द्रव्यन्तरेन्द्रज्योतिष्केन्द्रा अधोलोक० भवनपतीन्द्रा इत्यनेन पालित्रयेण कर्त्रभेदेन करणभूतेन मदेन-'हर्षेऽप्यामोदवन्मदः' इत्यमरकोशवचनात् हर्षेण कृत्वा महितः-पूजितः, सर्वदूरितानां-दारिद्र्यरोगजरादीनां, क्षयं दिशतु, इति ॥४॥ अथाऽऽद्यगाथार्थमाह-गाथायुगलेन-मात्राछन्दोविशेषरूपद्वयेन, 'जिनं' रागादिजेतारं, 'भयमोह०'

"Aho Shrut Gyanam"

मद्यपानजनितो विकारो मदः—क्षीबता, मद इव मदः पारवश्यत्वात्, मदश्चासौ मोहश्च—मोहनीयकर्म्म च मदमोहः, ' जह मज्जपाणमूढो लोए पुरिसो परव्वसो होइ। तह मोहेण मूढो जीवोवि परव्वसो होइ ॥१॥' इति तेन विवर्जितं। मदशब्दस्याहङ्कारत्वे व्याख्यायमाने जितकषायमित्यनेन सह पौनरुक्त्यं स्यात्। कषायाणां मोहान्तर्गतत्वेऽपि पृथगुपादानं संसारकारणेषु प्राधान्यख्यापनार्थं। 'त्रिसङ्घातेन' सम्यग्दर्शनज्ञानचारित्ररूपरत्नमीलनेन साधकतमेन, तीर्णसङ्गं, तीर्णः सङ्गः—कर्मनोकर्मसम्बन्धरूपः संयोगो येन तं, शरीरमित्यर्थः। अथवा त्रिसङ्घातेन स्तोष्ये इति योज्यं, तत्र त्रयाणां वक्ष्यमाणलोचनादिवर्णवस्तूनां सङ्घातः तेन। अथाऽत्र स्वर्णसिद्धि ( प्रकरणे ) प्रकारेण व्याख्या—तिसृणामौषधीनां रक्तदुग्धिकासोमवल्लीबहुफलीनां सङ्घातेन – समवायेन 'थोसामि' त्ति, स्वेदनमुखोद्घाटनजारणादिविधिं विधास्यामि। तत्र स्वेदनं—गोमहिष्यजानरखरमूत्रैः काञ्जिकसहितैर्दोलायन्त्रेण, जारणं बिडनिष्पादनेन गोरोचनास्फटिकानवसारगन्धकहरितालस्यन्दसौभाग्यरूपं औषधषट्कचूर्णं समांशं अजापित्तके निक्षिप्य मासमेकं चूल्ह्या उपरि धार्यं। इत्थं बिडं निष्पाद्य मुखमुद्घाट्यते, तच्चेद्यं कृत्वा कृष्णाभ्रकपत्रं कृत्वा यवारनालमध्ये प्रहराष्टकं निक्षिप्य फागकन्दलैर्दूर्वानालैर्वा सह वस्त्रेण गाल्यते, तद्द्रव्यरूपं रसदोषविवर्जितं। रसस्य हि त्रयो दोषा मलं शिखी विषं चेति। ततो ' मयमोहविवज्जियं ' इति, अनेन

"Aho Shrut Gyanam"

मलविषलक्षणदोषद्वयवर्जितत्वं उक्तं। सम्प्रति दहनदोषनिरासार्थं विशेषणमाह–' जियकसायं 'ति, जितः–स्वात्मनि निलीनः कृतः, कषायस्त्रिफलाख्यो येन स तथा तं। अनेनेदं उक्तं भवति–यत्त्रिफलया तस्य शिखिदोषोऽपनीत इति। तथा च रसग्रन्थः–' मलशिखिविषनामानो रसस्य नैसर्गिकास्त्रयो दोषाः। गृहकन्या हरति मलं त्रिफलाऽग्निं चित्रकस्तु विषम् ॥१॥ ' इति। 'थोसामि' स्तम्भयिष्यामि, केन कृत्वा ? त्रिसङ्घातेन सिताभ्रकं तालकं तारय (?) तेषां त्रयाणां सङ्घातेन योगेनेत्येके। अन्ये तु व्याचक्षते–दुग्धिकादीनां स्वरसं रसमध्ये दद्यात्, औषधानां शुष्कत्वे तु तासां क्वाथं कृत्वा तद्रसं निक्षिपेत्। अत्र च रक्तदुग्धिकासोमवल्लीबहुफलीनां अन्यतमयापि कार्याणि सिद्ध्यन्ति, तथापि तिस्रो ग्राह्या इत्याम्नायः। पुनः कथम्भूतं ? जिनं–पारदं, तीर्णसङ्गं–मृत सप्तगुणसङ्गोत्तीर्णं, अस्य सम्प्रदायो गुरुमुखाच्छ्रोतव्यः। एतावता श्वेत ओलि दर्शिता। अधुना पीतविधिमाह–'महावीरं' 'म' इति हेममाक्षिकं 'हा' इति हाटकं 'वी' इति कृष्णाभ्रकं 'र' इति रसः, तं स्तोष्यामि। शेषा औषधयः समाना एव इति प्रथमगाथार्थः। ' सुकुमाल ' इति नाइणि, 'धीर' इति नाइ, 'सोमा' इति सोमवल्लीत्रयं सोमा वा कुवी ' रत्त ' इति रक्तदुग्धिका ' कसिण ' इति कृष्णा बहुफली काञ्चनिका ' पण्डुरा ' इति देवदाली 'सि' इति शृङ्गिकविषं 'रि' इति

"Aho Shrut Gyanam"

लघुरींगिणी ' निकेया ' इति केतकी तन्नियांसः, ' सियं ' इति लाङ्गुलिका, ' कुसगह ' इति अहिखराबीजानि अपामार्गबीजानि वा, 'भीरु' इति लज्जालुका 'जलमण्डनिका' मण्डूकब्राह्मी 'स्थलमण्डनिका' अंबावनी अम्ब्रचङ्गेरी 'नभोमण्डनिका' सुनाली आकाशवल्ली चेत्येके। एतास्तिस्र औषधयः। औषधीनां बहुत्वेपि ' तिन्नि 'त्ति, अभिधानं मण्डनशब्दयोजनासाम्यात्। इति द्वितीयगाथार्थः॥ इदानीं रोचनक्रमेणोद्घाटनविधिमाह—

' न चयंति ' वीरो—अग्निः, तस्य लीलां—अग्निरूपतां हातुं—त्यक्तुं न शक्नुवन्ति, भास्वरकार्त्तस्वररूपत्वात्। के ते ? ' पंकय गइंद चंदा ' ' पंकय ' इति गगनम्—अभ्रकमित्यर्थः। ' गइंद ' इति मृतनागं, ' चंद ' इति हेम त्रितयमपि वा। एते च पङ्कजादयः कीदृशाः सन्तो वीरलीलां न त्यजन्ति ? इत्याह—' सुरहिमत्तपडिपुन्ना ' सुरभिमात्राप्रतिपूर्णा। 'सुरभिर्हेम्नि चम्पके। जातीफले मातृभेदे, रम्ये चैत्रवसन्तयोः॥ सुगन्धौ गवि सल्लक्या' ( हैम०—१०५९ ) मित्यनेकार्थवचनात्, सुरभिः—रसगन्धानुसारितया रम्या या मात्रा—परिमाणनियतिस्तया प्रतिपूर्णाः—समग्रा, यथोक्तमात्रोल्लङ्घने हि न सिद्धिः, अतस्ते सुरभिमात्राप्रतिपूर्णा इति। केषां कार्याणां सम्पादयित्री या मात्राऽत आह—' लोयणचंकम्मियमुहाणं ' ति, ' लोयण ' इति रलयोरैक्यात् ' रोचनं ' वेध इत्यर्थः,

"Aho Shrut Gyanam"

'चंकमिय' इति क्रमणं 'चुंचुंधरि सव्वंगं महिलामयदंकणेण कयलेवं। सव्वट्ठु (ढुं) देसु कमणं निद्दिट्ठं वीयरागेण ॥१॥' 'मुह' इति उद्घाटनं श्वेते नागोत्तरणं पीते पुटदानं, यदुक्तं-सूतसंहितायाम्-उद्घाटने पुटो नान्यः, क्रामणे कान्तमिच्छति। न शुल्वाद्रञ्जकः कश्चिन्न माक्षीकात् प्रकाशकः ॥१॥' इत्यत्राप्युक्तम् 'तारिहिं तारुसुवन्नुसुवन्निइं सूओरे न हु बज्झइ अन्नइं। कामणवेह उघाडणनाइं दव्वीकरणु होइ रसराइं (?) ॥१॥ इति तृतीयगाथार्थः ॥३॥ अथ निगमयन्नाह -एवं पूर्वप्रकारेण 'वी०' रसेन्द्रः-रसज्ञः, अच्छः, अः अम्लवर्गः, छः क्षारवर्गो मूत्रलवणादिः, 'रः' रसवर्गः, एषां त्रयरूपो गणस्तस्य: 'सङ्घ' समवायस्तेन 'सं०' परिचितः-संस्तुत्य स्तम्भितः. 'भगवान्' ऐश्वर्यात्पूज्यः 'पालि०' पादलिप्तो-रसविद्यासिद्धः सूरिः, तस्य मतेन-अभिप्रायेण, मथितः, अणसेइओ न तरलो न निम्मलो होइ मद्दणारहिओ। सोरणरहिओ पसरइ कामे ओ नेय कमलोहेसु (?) ॥१॥ इत्यादियुक्त्या परिकर्म्मितो, दिशतु क्षयं 'सर्व०' दारिद्र्यरोगजरादीनां। पाठान्तरे-पादलिप्तस्य मत्या मथितः, (इति) चतुर्थगाथार्थः। इत्थं स्तवरूपतया लवतः सितपीतसिद्धिरूपतया। श्रीपादलिप्तरचिते रचिता वीरस्तवे मया वृत्तिः ॥ इति श्रीजिनप्रभसूरिभिः संवत् १३८० वर्षे कृतायाः श्रीवीरस्तववृत्तेः सङ्क्षिप्यावचूरिः। ग्रन्थाग्रम् ९८ ॥

"Aho Shrut Gyanam"

श्रीआगमोद्धारक ग्रन्थमालाया द्वादशं रत्नम्

ॐ नमो जिनाय

आगमोद्धारक—आचार्यप्रवर श्री—आनन्दसागरसूरीश्वरेभ्यो नमः

# जैनस्तोत्रसञ्चयस्य

## द्वितीयो विभागः ।

७११

संशोधकः

प. पू. गच्छाधिपति—आचार्य—श्रीमन्माणिक्यसागरसूरिः

द्रव्यसहायक :

झवेरी कालिदासात्मजजमनादासद्वारा वटपद्रीय—
श्रीआत्मानन्दजैनउपाश्रयः ।

प्रतय ५००—मूल्यम् १–५०

वीर संवत् २४८६ वि संवत् २०१६

प्रकाशक :
रमणलाल जयचन्द शाह
ठे. शेठ मीठाभाइ कल्याणचन्दनी
पेढी, कपडवंज (जि. खेडा)

मुद्रक :
मंगळभाई वेरीभाई पटेल
मेनेजर
सहकारी छापखानुं रावपुरा, वडोदरा.

"Aho Shrut Gyanam"

# किञ्चिद्वक्तव्यम्

अयि विबुधाः! जिनवरभक्तिरससक्तचेतसां भवतां करसरोरुहे जैनस्तोत्रसञ्चयस्य द्वितीयोऽयं विभागः सादरं समर्प्यते। अत्र आचार्य-श्रीसोमसुन्दरसूरीणां तच्छिष्यरत्नश्रीमुनिसुन्दरसूरीणां च कृतयः सन्ति।

श्रीसोमसुन्दरसूरेः जन्म प्रल्हादनपुरे सज्जनश्रेष्ठिनो माल्हणदेव्याः कुक्षौ विक्रमसंवत् १४३० वर्षे, दीक्षा सं. १४३७ वर्षे, वाचकपदं १४५० वर्षे, सूरिपदं सं. १४५७ वर्षे, विधायानेकधर्म्यकर्माणि सं १४९९ वर्षे दिवं जगाम। श्रीमतः श्रीमुनिसुन्दरसूरिप्रमुखा बहवः शिष्याः आसन्। एतदर्थे विशेषजिज्ञासुभिर्विलोकनीयं श्रीसोम-सौभाग्यकाव्यम्।

श्रीमुनिसुन्दरसूरेः जन्म वि. १४३६ वर्षे, दीक्षा सं. १४४३ वर्षे, १४४६ वर्षे वाचकपदं, सूरिपदं १४७८ वर्षे, स्वर्गवासः १५०३ वर्षे कार्तिकशुक्लप्रतिपद्दिने।

एतासां कृतीनां मुद्रणयोग्यपत्राणि (प्रेसकोपी) पू. आगमोद्धारक-आचार्यप्रवर-श्रीआनन्दसागरसूरीश्वरैः मत्पार्श्वे वि. २००५ वर्षे कारितानि स्वयं च शोधितानि जैनानन्दपुस्तकालयात् प्राप्तानि तदाधारेण संशोध्य प्रकाशीकृताः कृतयः इति निवेदयति

२०१६ मार्गशीर्ष—
शुक्लपञ्चमी राजनगरे

—चन्द्रसागरगणिः

"Aho Shrut Gyanam"

# अनुक्रमणिका


| | | |
|---|---|---|
| १ | श्रीअर्बुदस्थश्रीऋषभजिनस्तवनम् | १ |
| २ | श्रीगिरिनारगिरिमण्डनश्रीनेमिजिनस्तवनम् | ७ |
| ३ | श्रीस्तम्भनपार्श्वनाथपञ्चविंशतिका | ९ |
| ४ | श्रीनवखण्डपार्श्वनाथस्तवः | १२ |
| ५ | श्रीच्यवनकल्याणकस्तवः साधारणः | १४ |
| ६ | श्रीजन्मकल्याणकस्तवः | १५ |
| ७ | श्रीदीक्षाकल्याणकस्तवः | १७ |
| ८ | श्रीज्ञानकल्याणकस्तवः | १८ |
| ९ | श्रीनिर्वाणकल्याणकस्तवः | १९ |
| १० | साधारणः श्रीजिनकल्याणकस्तवः | २१ |
| ११ | श्रीजिनकल्याणकस्तवः | २१ |
| १ | मङ्गलशब्दार्थस्तवनम् | २३ |
| २–३–४ | ,, स्तवः | २३–२४–२४ |
| ५ | सकलजिनस्तवनम् | २५ |
| ६–७ | श्रीयुगादिदेवस्तवनम् | २५–२६ |
| ८ | श्रीसीमन्धरस्वामिस्तवनम् | २७ |
| ९ | श्रीवर्द्धमानजिनाष्टकम् | २७ |
| १० | साहपुरश्रीपार्श्वनाथस्तवनम् | २८ |
| ११–१२ | चतुर्विंशतिजिनस्तवः | २९–३९ |
| १३ | श्रीचतुर्विंशतिविहरमाणशाश्वतजिनस्तवनम् | ४० |
| १४ | मङ्गलस्तोत्रम् | ४० |
| १४ | चतुर्विंशतिजिनमङ्गलस्तवनम् | ४१ |
| १६ | श्रीजिनमङ्गलस्तवः | ४२ |
| १७ | श्रीजिनब्रह्मस्तवः | ४२ |
| १८ | श्रीजिनमहिमस्तवः | ४३ |
| १९–२० | श्रीजिनमङ्गलस्तवः | ५३ |
| २१ | श्रीजिनभक्तिस्तवः | ४४ |


"Aho Shrut Gyanam"

२२ श्रीजिनराजभक्तिमङ्गलस्तवः ४५
२३ श्रीमङ्गलशब्दस्तवः ४५
२४ श्रीशान्तिजिनस्तवनम् ४६
२५ श्रीवीरजिनस्तुतिः ४७

## त्रिदशतरङ्गिणी

४ श्रीअभिनन्दनजिनस्तोत्ररत्नम् ४९
५ श्रीसुमतिजिनस्तोत्ररत्नम् ४९
६ श्रीपद्मप्रभजिन ,, ५०
७ श्रीसुपार्श्वजिन ,, ५१
८ श्रीचन्द्रप्रभजिन ,, ५२
९ श्रीसुविधिजिन ,, ५४
१० श्रीशीतलजिन ,, ५४
११ श्रीश्रेयांसजिन ,, ५५
१२ श्रीवासुपूज्यजिन ,, ५६
१३ श्रीविमलजिन ,, ५६
१४ श्रीअनन्तजिन ,, ५७
१५ श्रीधर्मजिन ,, ५८
१६ श्रीशान्तिजिन ,, ५९
१७ श्रीकुन्थुजिन ,, ६०
१८ श्रीअरजिन ,, ६१
१९ श्रीमल्लिजिन ,, ६२
२० श्रीमुनिसुव्रत ,, ६३
२१ श्रीनमिजिन ,, ६४
२२ श्रीनेमिजिन ,, ६५
२३ श्रीपार्श्वजिन ,, ६६
२४ श्रीवर्द्धमानजिन ,, ६७
२५ श्रीवर्द्धमानजिन ,, ६८
२६ श्रीवीरस्तवः ,, ६९

"Aho Shrut Gyanam"

ॐ नमो जिनाय ॥

आगमोद्धारक-आचार्यप्रवरश्री० आनन्दसागरसूरीश्वरेभ्यो नमः

# जैनस्तोत्रसञ्चयः।

## आचार्यसत्तमश्रीसोमसुन्दरसूरिकृतं

### श्रीअर्बुदस्थश्रीऋषभजिनस्तवनम् (१)

श्रीअर्बुदाचलविभूषण ! दूषणाली–
वन्ध्यार्जुनाभविभ ! नाभिभवाऽऽद्यदेव ! ।
स्वामिंस्तव स्तवपथे पथिकीकरोमि,
वाचं शुचीकरणकारणतोऽहमर्हन् ॥१॥

कौतूहलान् न न च काव्यकलावलेपान्
नामुष्मिकैहिकफलाऽऽप्त्यभिलाषतो वा ।
किन्त्वीश ! ते स्तुतिविधावधियामधीशो–
ऽप्यस्मिन् प्रवृत्तमतिरस्मि भवाभिभूत्यै ॥२॥

वेगादगं जिगमिषामि तदङ्गपङ्गु–
र्गत्या जिगीर्गगनगप्रबलानिलस्य ।
मातुं मरुत्पथमथो विदधे तदिच्छां,
मित्स्यामि चान्तिमसमुद्रजलं पलैस्तत् ॥३॥

स्प्रष्टुं करेण तरणिं स्पृहयामि वाऽहं,
सर्वोर्वरामपि पदैर्यदिवा पिपित्स्ये ।
यत्सर्वथा मितिकथापथहृद्गुणस्य,
स्तुत्यां यतेऽहमिह ते सहसा किलैवम् ॥४॥ युग्मम्

शक्तिं निजामनवधार्य तथापि कार्ये–
ऽमुष्मिन्नुपक्रमवतो भवतः प्रसादात् ।

"Aho Shrut Gyanam"

कर्मक्षयैकफललाभमभीप्सतो मे,
नूनं जिनेश ! सफलो भविता श्रमोऽसौ ॥५॥
यत:–नानाभवोपजनितं भविनामनन्तं,
वश्यं कयापि वितथाकुरुतेऽघसङ्घम् ।
निर्णिक्तभक्तिभरजस्य महामहिम्नो,
देव ! स्तवस्य तु तवात्र विधौ कथा का ? ॥६॥
नो मत्सरः स्फुरति कोऽपि परामरेषु,
चेतोऽनुरागवशगं त्वयि देव ! नैव ।
सन्तस्तथापि निबिडाद् गुणपक्षपातात् ,
त्वामेव सेवकतया प्रभुमभ्युपेताः ॥७॥
स्वामिन्नसङ्ख्यसुखदं भवभीभिदं त्वा,
हित्वाऽऽरिराल्स्यति सुरानपरान् नरो यः ।
विश्वोत्तमामृतरसं सरसं व्यपास्या–
सन्तोषमेष विषमं विषमापिपासेत् ॥८॥
रागोऽङ्गनाङ्कपरिषङ्गविधिप्रसिद्धः,
क्रोधोऽपि हेतिततिसङ्गतिबुद्धिबोध्यः ।
मोहोऽट्टहासनटनक्रिययाऽवसेयः ।
कामं कमण्डलुधृतिप्रथितं ह्यशौचम् ॥९॥
स्फाराक्षसूत्रकरधारणलिङ्गगम्य–
मज्ञानमप्यखिलमातृमुखैरपीक्ष्यम् ।
मूर्त्तिष्वपीति भगवन् ! भवतः परेषां,
हा हा ! महानिबिडदोषविडम्बनैव ॥१०॥ युग्मम् ॥
दूरादपास्तवनितातनुसङ्गशस्त्राऽ–
क्षाभिशङ्क्यमदनादिकविक्रियायाम् ।
शान्ताकृतौ प्रतिकृतावपि ते यतीन्द्र !,
नीरागतैव जगताऽपि विभाव्यतेऽलम् ॥११॥

"Aho Shrut Gyanam"

आस्तां भवान् भुवननाथ ! दृषन्मयीयं,
त्वन्मूर्तिरप्यसुमतां तनुते प्रमोदम् ।
साक्षादवेक्षितवपूंष्यपि सौख्यदानि,
न स्युर्नृणां मतिमतां परदैवतानि ॥१२॥
दूरेऽथवेन्दुरुदकप्रतिबिम्बितापि,
तन्मूर्तिरेव तनुते मुदमीश ! यद्वत् ।
तद्वद्विलोकितविभास्वरमण्डलाऽपि,
किं तारकावलिरलं प्रमदप्रदाने ? ॥१३॥ युग्मम् ॥
एकान्तशान्तरससागरमग्नमूर्ते–
र्या ते जगत्त्रयपतेऽद्भुतसाम्यमुद्रा ।
रोषादिदोषकलुषीकृतविग्रहाणां,
क्व स्यादसौ हरिहरप्रमुखामराणाम् ? ॥१४॥
विश्वत्रयातिशयिविस्मयकारिरूपं,
देवं भवन्तमवलोकयतोऽपि न स्यात् ।
यस्याऽऽस्यमुल्लसितलोचनयुग्ममीश !,
काष्ठं पशुः किमथवा दृषदेष साक्षात् ॥१५॥
यन्न प्रसीदसि विभोऽद्भुतभक्तिभाजि,
निन्दापरे च नरि नैव करोषि रोषम् ।
त्वां लक्षणेन खलु विश्वविलक्षणेनाऽ–
नेनैव दैवतधिया मुनयः प्रपन्नाः ॥१६॥
देवाऽन्यदैवतगणादगुणान् नृणां या,
सामान्यसत्त्वसदृशत्वभृतोऽमृतेच्छा ।
साऽत्यन्तनिर्धनजनादतिभूरिभूति–
प्रासावतीव महती मनसः समीहा ॥१७॥
विश्वत्रयप्रकटदैवतचेष्टितं ये,
देवं मदादवपदन्ति भवन्तमेतम् ।

"Aho Shrut Gyanam"

ते सूरबिम्बमभि रेणुभरं किरन्ति,
दन्तैरदन्ति गिरिसारभरं च दर्पात् ॥१८॥
त्वं देव ! मोहितजगत्त्रयमानसोऽपि,
मिथ्यादृशो ददसि नो मनसः प्रमोदम् ।
आप्यायिताखिलमहीतललोचनोऽपि,
किं कोकलोकमुखमुज्ज्वलयेत् ! कलावान् ॥१९॥
योऽनेकशोपि ददृशे न भवान् दृशेश !,
स्यादस्य देव ! परतीर्थकरेऽनुरागः ।
आजन्मतोऽप्यनवलोकितरत्नजाते—
श्चेतोरतिर्भवति हि प्रति काचखण्डम् ॥२०॥
देवान्तरस्य भगवँस्तव चान्तरं यो,
नो बुध्यते विबुध बोधकबुद्धिवन्ध्यः ।
निम्बाम्रकाचमणिसर्षपमन्दराद्रि—
भावोत्करे किमु भिदां स विदांकरोतु ? ॥२१॥
देवाः परे परमडम्बरधारिणोपि,
नो लेशतोऽपि तिरयन्ति तव प्रभावम् ।
खद्योतका द्युतितर्तिं दधतोऽपि किं वै,
वैवस्वतं मुकुलयन्ति किल प्रतापम् ? ॥२२॥
नैकप्रकल्पितविकल्पशता अपि स्यु-
र्जोषं जुषः सदसि ते जिन ! तेऽन्यतीर्थ्याः
किं घोरघूत्कृतिपरा अपि नैव घूका,
मूका भवन्ति सवितुर्महसां समूहे ? ॥२३॥
ये त्वन्मतामृतरहस्यरसैकचित्ता,
नूनं मतिर्न रमतेऽन्यमतेषु तेषाम् ।
आस्वादितामृतरसस्य नरस्य किं स्यात्,
पातुं स्पृहापि सलिलान्यपि पङ्किलानि ? ॥२४॥

"Aho Shrut Gyanam"

चेत्कस्यचिद् गतमतेर्न मतं मतं ते,
स्यादस्य विश्वमहितस्य ततः क्षितिः का ? ।
रुच्या न चौरजनचेतसि चन्द्रिका चे–
च्छोच्या भवेत् किमियतापि जगत्प्रियेयम् ॥२५॥

पश्यन्त्यभव्यभविनो नहि दूरभव्या–
श्चाशेषविश्वविदितं भगवन् ! भवन्तम् ।
किं वा जगत्प्रकटमम्बुजबन्धुबिम्ब–
मालोकयन्ति जनुषान्धजनाः कदाचित् ? ॥२६॥

मिथ्यात्वमोहविषमाहिमहाविषेण,
ग्रस्तस्य विश्वजगतो गतचेतनस्य ।
अस्य प्रबोधनविधावनुपाधिशुद्धं,
न त्वन्मतामृतमृते ह्यपरोऽस्त्युपायः ॥२७॥

तप्तं तपो न विततं न जपोऽपि जप्तः,
क्लृप्ता न दैवतशतक्रमपर्युपास्तिः ।
नानाक्रिया अपि कृता नहि मुक्तये स्यु–
स्त्वच्छासनं जिन ! विना भविनां कदाचित् ॥२८॥

तप्त्वा तपांस्यपि परैः शरदां शतानि,
या यत्नवद्भिरपि सम्पदवाप्यते नो ।
चित्रं जना जिनपते ! त्वदुपज्ञपुण्या–
दन्तर्मुहूर्त्तविहितादपि तां लभन्ते ॥२९॥

त्वद्दर्शनं जगति न प्रतिभाति किञ्चि–
दन्तर्गतं तव यदीश ! न शासनस्य ।
किं सम्भवेदिह भवेऽपि महन्महस्त–
दन्तर्भवेन्न यदहर्पतिकान्तिपुञ्जे ! ॥३०॥

या वागगोचरसुरासुरसौख्यसम्पद् ,
या मानुषा सुखसमृद्धिरतिप्रवृद्धा ।

"Aho Shrut Gyanam"

मोक्षैकमुख्यफलभृद्भवदीयभक्तेः ।
प्रासङ्गिकं फलमिदं प्रवदन्ति सन्तः ॥२१॥
स्वामिन् श्रीगुरुदेवसुन्दरगुणास्त्वय्यैव सर्वे व्यधुः,
स्थानं नूनमशेषदोषनिवहाश्चान्येष्वथो नाकिषु ।
तन्मा भूज्जननान्तरेऽपि हि कदाप्येतेषु देवत्वधीः,
स्वप्नेपि प्रतिजन्म सम्भवतु मे नित्याऽऽप्तबुद्धिस्त्वयि ॥२२॥
एवं सर्वान्यदेवानधिगतमहिमश्रीसमालिङ्गिताङ्गः,
श्रीनाभेयो जिनेन्द्रोऽर्बुदगिरिशिखरोत्तंसभूतोऽभिनूतः ।
भक्त्युत्कर्षात् सहर्षं तनुतरमतितोऽप्याभवं मेऽव्ययश्री,
कैवल्यातुल्यमोदोदयसुखनिचये बोधिलाभाय भूयात् ॥२३॥

इति तपागच्छेशश्रीसोमसुन्दरसूरिकृतं श्रीअर्बुदस्थश्रीऋषभजिनस्तवनम् ॥

"Aho Shrut Gyanam"

# श्रीगिरिनारगिरिमण्डनश्रीनेमिजिनस्तवः (२)

श्रीमद्रैवतकाभिधाननगभूभूषैकभूषामणे !,
श्रीमन्नेमिविभो ! भवारिभवभीनिर्भेदभेदस्वल ! ।
भक्तिव्यक्तिवशोल्लसद्बहुलमुद्रोमाञ्चचञ्चद्वपुः,
स्वामिन्नज्ञतमोऽपि विज्ञपयति त्वां किञ्चनाऽयं जनः ॥१॥
निस्सीमोत्तमचङ्गिमा गुणगणः क्वासौ तवासौख्यहृन्
निस्सारा वचसां भराः क्व च ममेमेऽस्वच्छतुच्छात्मनः ।
एवं सत्यपि भक्तितः प्रलपितान्येतानि वाक्यानि मे,
देवाकर्णयितुं त्वमर्हसि यतो जातोऽसि सर्वंसहः ॥२॥
एतावन्तमनेहसं त्वयि विभो ! याऽभूदद्दष्टे पुरा,
त्वत्पादाब्जदिदृक्षया परमयोत्कण्ठा गरिष्ठा मम ।
भूयो भूय इह त्वदीक्षणविभौ लावण्यवारांनिधे !
दृष्टेऽपि त्वयि सम्प्रति प्रतिदिनं सा वर्द्धते सन्ततम् ॥३॥
गङ्गाऽगान्मरुमण्डले स्थलभुवि प्रादुर्बभूवाम्बुजं,
मध्ये क्षारपयोनिधेः समुदभूत् कूपोऽमृताम्भोभृतः ।
तद् ध्वान्तौघमये निशीथसमये जज्ञे दिनेशोदयो,
यत्त्वं दृक्पथमागतोऽसि सहसा मेऽत्रापि काले कलौ ॥४॥
निःस्वः स्वर्णनिधिं यथाऽऽप्य लभते स्वान्ते नितान्तं मुदं,
तृष्णाक्रान्त इव प्रपामनुपमां घर्मातुरो वा तरुम् ।
शीतार्त्तो ज्वलितं हुताशनमिव स्थानं पथो वा च्युत-
स्तद्वत्त्वामुपलभ्य भाग्यवशतो जातोऽस्मि मोदास्पदम् ॥५॥
श्रीनेमे ! जगदेकनायक ! मुहुस्त्वां निर्निमेषेक्षणं,
पश्यन् श्यामतनुच्छविं जिनवर ! प्राज्यामृतश्रीपदम् ।
प्रावृट्कालघनाघनाभमनिभं सारङ्गवद्रङ्गभाग् ,
नश्यत्तापतृषाभरव्यतिकरः सद्यः प्रपद्ये रतिम् ॥६॥

"Aho Shrut Gyanam"

निर्नाथोऽपि सनाथतामहमगामद्य प्रभो ! भाग्यतः,
सम्प्राप्तेन जगत्त्रयाधिपतिना नाथेन नाथ ! त्वया
निष्पुण्योपि शरण्यवत्सल ! पुण्यैकपूतात्मनां,
धुर्यश्चाहमभूवमत्र भवतस्ते पादपद्मेक्षणात् ॥७॥
भूयो जन्मजरामृतिप्रभृतिकक्लेशोर्मिमालाकुले,
भीमेऽस्मिन् भववारिधौ निरवधौ मज्जन्तमेतं जनम् ।
किंकर्त्तव्यतया विमूढहृदयं हीनं च दीनाशयं,
स्वामिन् ? स्वीयतरीसमाननयनप्रक्षेपतः प्रीणय ॥८॥
गाढागाधभवापगापयसि ही हीनात्मनामग्रणी;
श्रीनेमीश्वर ! पश्यतोपि भवतो मज्जामि मज्जाम्यहम् ।
तन्मां तारय तारयाशु करुणापण्याऽऽपगाभ ! प्रभो !,
नोपेक्षा तव युज्यते यतिपते ! विश्वत्रयीतारक ! ॥९॥
यावद्देव ! तव श्रुतोक्तिसरसस्त्रोतस्विनीश्रोतसि,
क्रीडां क्वापि तनोत्ययं मम मनोमीनोऽतिहीनोद्यमः ।
रागद्वेषमदादिका बकगणा आदातुकामा इमं,
धावन्ति त्वरितं तदैव परितोऽप्येते हहा ! दुस्सहाः ॥१०॥
लब्धाप्यत्र भवे तवेश ! सुकृतैराज्ञा विहीनात्मना,
स्वाधीनापि मया प्रमादवशतो नाराध्यते हाऽधुना ।
पश्चाद्दुर्गतिदुर्गकूपकुहरावर्त्तप्रपाते प्रभो !,
तत्तद्दुःखपरम्परापरिगतः स्थाताऽस्मि दुःस्थः कथम् ॥११॥
माद्यन्मृत्युदवानले जनिजरादुःखौघदुःश्वापदे,
भ्रामं भ्राममनेकधा भववने निस्सीमभीभाजने ।
श्रान्तोऽत्यन्तमहं महामयमये तत्त्वं जिनेशात्मनः
कारुण्याम्बुनिधे ! विधेहि सविधे वासं स्वदासस्य मे ॥१२॥
नेमे ! ज्ञानपदं न वेद्मि किमपि प्रज्ञाप्रकर्षोज्झितो,
ध्यातुं ध्यानमपि क्षमो नहि मनःस्थैर्याद्यभावादहम् ।

"Aho Shrut Gyanam"

स्फूर्जज्ज्ञाननभोमणिप्रसृमरज्योतिःसमुज्जृम्भिते,
विद्वन्मानसवारिभूरुहवने लीलां वितन्वन्नलम् ।
प्रोद्यत्तालतमालकज्जलकलच्छायैककायद्युते ! ,
श्रीनेमे ! वरचञ्चरीकतुलनामालम्बसे त्वं विभो ! ॥१४॥
कालेऽस्मिन् कलिनामके सुरतरुः स्वर्गाङ्गणं सङ्गतः,
कामं कामगवी न वीक्षणपथेऽप्यायाति केषां क्वचित् ।
नष्टः कामघटोपि दृष्टिपदवीभ्रष्टश्च चिन्तामणि—
स्तेषामेव पदेऽस्ति सम्प्रति भवानेव प्रभो ! भूतले ॥१५॥
एवं मन्दधिया मयाऽपि किमपि स्वामिन् स्तुतेर्गोचरं,
नीतोऽसि स्वमतिप्रकल्पितवचोन्यासैरसारैरपि ।
त्रैलोक्यैकगुरुं भवन्तमपरं याचे न किञ्चिद्वरं,
किन्त्वेका भवदीयपादयुगलोपास्तिर्दृढैवाऽस्तु मे ॥१६॥
इतिगिरिगिरिनारोत्तुङ्गशृङ्गावतंसं,
जिनवरमिह नेमिं यो जनोऽनन्यचेताः ।
निजहृदयजभक्तिप्रेरितः स्तौति नित्यं,
शिवसुखमचिरेणाप्यश्नुतेऽसावनन्तम् ॥१७॥ मालिनी
इति श्रीसोमसुन्दरसूरिकृतः श्रीगिरिनारगिरिमण्डनश्रीनेमिजिनस्तवः।

---

## अथ श्रीस्तम्भनपार्श्वनाथपञ्चविंशतिका (३) ( भुजङ्गप्रयातम् )

स्फुरत्केवलज्ञानचारुप्रकाशं, फणामण्डपाडम्बरोद्योतिताशम् ।
महाकर्मपङ्कौघनाशे दिनेशं, स्तुवे स्तम्भनाधीशपार्श्वं जिनेशम् ॥१॥
प्रभो ! सद्गुणश्रेणिलक्ष्मीनिवासं, भवन्तं प्रदत्तान्तरारिप्रवासम् ।
जगद्वन्द्यपादाम्बुजं कोऽस्तहासं, जनः स्तोतुमीष्टे लसद्देवदासम् ॥२॥
महानन्दलीलाविलासैकगेहं, तथापि प्रभो ! किञ्चन त्वां स्तुवेऽहम् ।
महाभक्तिरागेरितो नीलदेहं, जिनाऽज्ञोऽपि भव्यावलीपूरितेहम् ॥३॥

"Aho Shrut Gyanam"

जय त्वं प्रभो ! प्राप्तसंसारतीर !, स्फुरत्पापधूलीप्रणाशे समीर ! ।
महामानमायावनीसारसीर ! ज्वलत्क्रोधदावानले मेघनीर ! ॥४॥
अहं त्वां निरीक्ष्याद्य जज्ञे कृतार्थः, सनाथीकृताशेषभव्याङ्गिसार्थ ।
तथा धन्यभावो ममाधीश ! जातः, सदा सेवकीभूतदेवेन्द्रजात ! ॥५॥
ममाद्याऽभवन् नेत्रयुग्मं पवित्रं, महादोषमालातृणालीलवित्रम् ।
यतो दृष्टमेतद्गुणश्रेणिपात्रं, त्वदीयं मया भाग्ययोगेन गात्रम् ॥६॥
वचः स्यात्तदेवात्र लोके प्रधानं, भवन्तं स्तुते यद्गुणानां निधानम् ।
मनोऽपि प्रशस्यं भवेदेतदेव, त्वमानन्दतो ध्यायसे येन देव ! ॥७॥

सदा देवलोके सुरेशा भवन्तं,
मुदाऽभ्यर्चयन्त्यद्भुतज्ञानवन्तम् ।
तथा पन्नगा नागलोके स्तुवन्ति,
प्रभो ! मर्त्यलोके नरेन्द्रा नुवन्ति ॥८॥
प्रमोदेन येनार्च्यसे नाथ ! नित्यं,
विहाय प्रभाते समस्तान्यकृत्यम् ।
असौ संसृतौ नो घनं बम्भ्रमीति,
क्षणात् सिद्धिवध्वा समं रंरमीति ॥९॥
जिन ! त्वां जनो यः सदा तोष्टवीति,
त्रिलोकीस्तुतोऽसौ क्रमाद्बोभवीति ।
तव ध्यानतः स्वं च यः पोपवीति,
स्वकर्माणि सर्वाण्ययं लोलवीति ॥१०॥
मनो यो विधत्ते तव ध्यानवश्यं,
जनोऽयं मनोऽभीष्टमाप्नोत्यवश्यम् ।
लभेताऽथवा कामितं को न कल्प-
द्रुमं संश्रितः पुण्यलक्ष्म्येकतल्पम् ? ॥११॥
महामोहमिथ्यात्वघोरान्धकारे,
प्रभो ! दुष्षमाकालरात्रिप्रचारे ।

"Aho Shrut Gyanam"

मया भाग्ययोगेन दीपोपमान–
स्त्वमद्याऽसि दृष्टो गुणैर्दीप्यमानः ॥१२॥
तथाऽऽलोकनादेव मे देव ! कष्टं,
समग्रं जिन ! स्तम्भनाधीश ! नष्टम् ।
प्रभातेऽथवा भानुबिम्बेऽपि दृष्टे,
तमोजालमुर्व्यां किमु स्थातुमीष्टे ? ॥१३॥
गुणागार ! संसृत्यरण्यान्तराले,
भवानन्यतीर्थावलीवृक्षजाले ।
मयेतस्ततो भ्राम्यता सार्थनाथ !,
शिवाध्वन्यवापे भवोत्ताभिपाय: ॥१४॥
सुपर्वद्रुमस्वर्गवीकामकुम्भ–
स्फुरद्देवरत्नादिका अप्यदम्भम् ।
न भावा विभो ! दुर्लभाः किन्त्ववापं,
त्रिलोकीतले शासनं ते दुरापम् ॥१५॥
तथाभव्यताऽऽदित्यकान्तिप्रयोग–
प्रबुद्धेषु विध्वस्तरागादिरोग ! ।
सतां मानसाब्जेषु खेलत्सहेलं,
प्रभो ! भृङ्गसि श्यामलाङ्गाऽनुवेलम् ॥१६॥
त्वदीयोरुमाहात्म्यवन्नाममन्त्र–
स्मृतेरप्यनन्ताद्भुतज्ञानसत्र ! ।
करिव्याघ्रसिंहोरगारातिभूता–
द्यभीतिः क्षणात् क्षीयतेऽपि प्रभूता ॥१७॥
भवापारवारांनिधौ विश्वनेत–
र्महादुःखनीरेऽन्तरङ्गारिजेतः ! ।
नृणां मज्जतां तारणायोरुकाष्ठ–
तरण्डायते शासनं ते गरिष्ठम् ॥१८॥

"Aho Shrut Gyanam"

चरीकर्त्ति तेऽर्चां जनो यो वरिष्ठा–
म्वरीभर्त्ति भक्तिं च चित्ते पटिष्ठाम् ।
नरीनर्त्ति कीर्त्तिर्जने तस्य वर्य्य,
सरीसर्त्ति वा चिन्तितं सर्वकार्यम् ॥१९॥
प्रसर्पत्प्रभावस्य तेऽल्पस्व (प्र) भावा,
विभो ! नैव साम्यं श्रयन्तेऽन्यदेवाः ।
प्रभाभ्राजमानस्य भानोः किमेते,
लभन्ते तुलां तारका अप्यनन्ते ? ॥२०॥
स्वचित्ताऽऽलवालप्ररूढा वरेण्य–
क्रियातोयपूरेण सिक्ता शरण्य ! ।
तवाज्ञामहाकल्पवल्ली जनानां,
फलैः पुम्फुलीतीप्सितैः सज्जनानाम् ॥२१॥
सदाऽचीचरद्देवराजैः स्वदास्यं,
तथाऽचीकरद्यो महेशेन लास्यम् ।
जनेऽवीवृतत् स्वामिहाज्ञां च कामं,
त्वमर्हन्नजैषीस्तमप्याशु कामम् ॥२२॥
विभो ! कल्पवृक्षस्यभीष्टार्थदाने,
सुधाम्भोदसि क्षेमवल्लीविताने ।
दिनेशायसे भव्यराजीवचक्रे,
त्वमिन्दूयसे वा सुहृग्दृष्टिचक्रे ॥२३॥
अदीपिष्ट भूमौ भवानीश ! विश्वं,
स्वतोऽबोधि सज्ज्ञानयोगेन विश्वम् ।
अपूरिष्ट कीर्त्या समस्तं त्रिलोकं,
तथाऽतायि सूक्ष्मेतरं जीवलोकम् ॥२४॥
श्रीस्तम्भनाभरण ! पार्श्व ! भवन्तमेवं,
प्रातः स्तुते प्रतिदिनं घनवासनो यः ।

"Aho Shrut Gyanam"

वश्याः श्रयन्ति भगवन् ! मनुजाधिराज–
श्रीदेवसुन्दररमा शिवसम्पदस्तम् ॥२५॥ (वसन्ततिलका)

इतिश्रीसोमसुन्दरसूरिभिरेकरजन्यां कृता श्रीस्तम्भनकपार्श्वनाथपञ्चविंशतिका ।

---

## श्रीनवखण्डपार्श्वनाथस्तवः (४) (शार्दूल.)

स्फूर्जन्नागफणामणीगणसमुद्भूतप्रभूतप्रभा–
भारोद्भासितभूमिमण्डलमहं मन्दोऽपि मोहोदयात् ।
स्वामिंस्त्वां नवखण्डपिण्डिततनुं श्रीपार्श्व! विश्वेश्वरं,
घोघासन्नगरप्रधानवसुधालङ्कारभूतं स्तुवे ॥१॥

नागैः संवलितान् निधीन् नव तत्र स्वामिन्नमून् सङ्गतान्,
मूर्त्तौ खण्डमिषाद्विभिन्नवपुषोऽप्येकात्मतामागतान्,
मन्येऽहं यदि चैतदेवमिह न स्यात् तत्कथं प्राणिना–
मेतेभ्यः परमा रमा निरुपमाः स्युः सर्वदा शर्मदाः ॥२॥

स्वर्गस्थानि मतान्यमूनि सुमनोनाथस्य नाऽहिप्रभोः,
पातालालगितानि पन्नगपतेर्नो स्वर्गभूमीभुजः ।
सञ्चिन्त्येति विधिर्न्यधान्नव सुधाकुण्डानि भूमण्डले,
मन्ये त्वत्तनुखण्डमण्डलमिषात्तुल्ये तयोः श्रीविभोः ॥३॥

चञ्चच्चारुनवोरुखण्डवपुषस्त्वत्तोऽनिशं सेवकी–
भूयाऽऽप्तं नवभिर्ग्रहैरिह महास्वामिन् महीयो महः ।
जाने तेन विहायसि प्रसृमरस्वज्ज्योतिरस्तापर–
ज्योतिर्मण्डलभाः प्रभान्ति भुवने प्रत्यक्षलक्ष्या अमी ॥४॥

विश्वेऽस्मिन्नधुना कलौ विरसतामासे समस्ते विभो !,
लक्ष्याः खण्डमिषान्निराश्रयतया श्रृङ्गारमुख्या रसाः ।
त्वद्रूपे न्यविशन्नमी शममये श्रित्वा स्वयं शान्तितां,
नो चेत्तद्भविनो विभिन्नरसिनस्तोष त्वयीयुः कथम् ? ॥५॥

"Aho Shrut Gyanam"

विष्वग्दोषाकलुषपरमब्रह्मरूपैकमूर्ते !,
स्वामिन् मूर्त्ति त्वमसमतमज्योतिरुद्योतिताशाम् ।
स्वीयां बिभ्रन्नवनवमहाखण्डरूपस्वरूपां,
स्वस्मिन् नाविर्जनयसि नवब्रह्मगुप्त्यात्मकत्वम् ॥६॥ (मन्दाक्रान्ता)
मन्ये नूनं त्वया यद्रिपुबलमखिलं रागदोषादिमुख्यं,
जिग्ये देवाऽन्तरङ्गं समरभुवि महातेजसाऽप्येककेन ।
तेनाङ्गेष्वेषु जातान्यभवत च नवस्वप्यमूनि क्षतानि,
प्रत्यक्षं वीक्षितानि क्षितिमुकुटमहावीरतां व्यञ्जयन्ति ॥७॥ स्रग्धरा
नवभ्यः खण्डेभ्यः स्वयमयमुपादाय चरणे-
र्विधाताऽणून् सारान् व्यधित नियतं किं किल तनुम् ।
अभूवंस्तेनाङ्गे तव नव विभागाः पृथगिति,
प्रभो ! मन्ये यस्मात्क्वचिदपि न हीदृक् परवपुः ॥८॥ (शिखरिणी)
इति प्रातर्भक्त्या प्रतिदिनमधीते तव नवं,
स्तवं यः श्रीपार्श्व ! प्रथितनवखण्डाभिध ! विभो ! ।
नवोदग्रग्रैवेयकमुखमहासौख्यविभवं,
विभुज्यासौ भुङ्क्ते ननु नवभवान्तः शिवसुखम् ॥९॥
इतिश्रीसोमसुन्दरसूरिकृतः श्रीनवखण्डपार्श्वनाथस्तवः ॥

---

## श्रीच्यवनकल्याणकस्तवः साधारणः ॥ (५) (उपजाति.)

गर्भावतीर्णं भववार्द्धितीर्णं, स्तुवे जिनेन्द्रं प्रणतामरेन्द्रम् ।
पापापनोदत्रिजगत्प्रमोद- हेतुं तमोहं गुरुभक्तितोऽहम् ॥१॥
स्वर्द्धर्या त्रिलोक्यामपि निस्समाना-द्दिवो विमानान् ननु नाथ ! तस्मात् ।
कथं महीयं न महीयसी स्यात् ?, निरस्य यद्यां स्वयमाश्रयस्त्वम् ॥२॥
मत्यादिकज्ञानवरत्रयर्द्धि-र्या यावती पूर्वभवे तवासीत्,
गर्भागतस्यापि सहैव साऽऽगात्, सौभाग्यभङ्गी तव काप्यपूर्वा ॥३॥

"Aho Shrut Gyanam"

त्वय्यागते कुक्षिसरो मरालवत् , स्वप्नानपश्यज्जननी चतुर्दश ।
भावित्वदीयोरुगुणश्रियां किल, स्वस्वानुरूपं दिशतः समुच्छ्रयम् ॥४॥
नानानिधानानि पदे पदेऽपि, प्रकाशयन् गर्भपदस्थितोपि ।
भृत्यादिकस्यापि न कस्य कस्य, प्रमोदहेतुर्भगवन्नभूस्त्वम् ? ॥५॥
त्वां कुक्षिकोणे जननी दधाना, सौन्दर्यतेजःसुषमामवाप ।
यथैव बिभ्रत्यमलाऽभ्रमाला, स्वाभ्यन्तरे दीप्तसहस्ररश्मिम् ॥६॥
कथं स राजा त्रिजगज्जनानां, न श्लाघनीयोऽनघसर्वभाव: ? ।
त्वं पूरको विश्वमनोरथानां, प्राप्तोऽवतारं जिन ! यस्य गेहे ॥७॥
महीगृहग्रामपुराकराद्यं, तद्वासवस्यापि न किं नमस्यम् ? ।
त्वयेश ! विश्वैकसुखाकरेण, निजावतारेण पवित्रितं यत् ॥८॥
इन्द्रादिदेवैर्महित: प्रमोदाद्, गर्भावतारोऽजनि ते यदाऽर्हन् ।
आविर्भवद्भूरिशुभानुभावा, भूरप्यभूद्देव ! तदैव सर्वा ॥९॥

इतिच्यवननामकं जिनवरेन्द्रकल्याणकं,
तव स्तवनगोचरं विनयभक्तिभावादहम् ।
नयन् न परमैहिकं किमपि नाथ ! नैवार्थये,
परं कुरु ममाक्षयं प्रवरबोधिलाभोदयम् ॥१०॥ (पृथ्वी)

इति साधारणः च्यवनकल्याणकस्तव: ॥ ॥

---

## श्रीजन्मकल्याणकस्तव: (६)

भुवनमोहनरूपसुसम्पदः, प्रणतवासवमौलिमिलत्पदः ।
जनिमहस्तवनेन तव प्रभो !, सफलतां गमयामि निजां गिरम् ॥१॥(द्रुत०)
तव जन्मनि चेतनावतां, कतुकं किं यदि सम्मदः सताम् ।
चतुरङ्गुलकौमुदश्वसद्य–दचैतन्यवती धरित्र्यपि ॥२॥ (वैतालीयम्)
समिरः सुखकृद्ववौ तदा, तरवः फेलुरकाल एव च ।
अभवंश्च दिशोऽतिनिर्मला–स्तव जन्माजनि भारते यदा ॥३॥

"Aho Shrut Gyanam"

तव जन्मनि सूत्यऽगारतः, परितो योजनमानभूतले ।
वरगन्धजलाभिषेचनं, चेलक्नोपमरीरचन् सुराः ॥४॥
अभवद्दिवि दुन्दुभिध्वनिः, सुमवृष्टिश्च जनुःक्षणे तव ।
समलाः सकला जलाशयाः, स्वापः प्रापुरतिप्रसन्नताम् ॥५॥
शिखिनोऽपि च दक्षिणार्चिषो, निखिला जन्वलुरुज्वलस्थिते ।।
ऋतवश्च षडप्यवातरन् , वनदेशेषु विशेषतः स्वयम् ॥६॥
तव सूतिविधेर्विधायिकाः, पुरतश्चामरदीपधारिकाः ।
ददिरे जिन ! शान्तिकारिका, न मुदं कस्य दिशां कुमारिकाः! ॥७॥
सकले समकालमेव ते, जनुषि प्रादुरभून्महामहः ।
त्रिजगत्यथवाऽस्ति वास्तवं, न किमेकं चरितं तवाद्भुतम् ॥८॥
निजकुक्षिसुरत्नधारिकायै, जगदुद्योतकदीपदे ! नमस्ते ।
इति शंसति यां पुरा सुराधा-डुपमेया तव केन सा प्रसूः स्यात् ? ॥९॥
जनुषा तव ये पवित्रिता, दिनमासाऽयनहायनर्त्तवः
जगदेकजयावहा विभो ! सुखदास्तेऽद्य ममापि संस्मृताः ॥१०॥
ददृशेऽशनमम्बयापि ते, नहि नीहारविधिश्च जन्मतः ।
शुचिता भुवनेऽप्यनुत्तरा, यदहो ! स्तन्यमपीश ! नापिबः ॥११॥
तव जनुःसमये जिन ! नारकाः, अपि भवन्ति समे सुखिनः क्षणम् ।
तदपराऽसुमतां तु किमद्भुतं, ननु सुखानुभवे भुवनेश्वर ! ॥१२॥ द्रुत०
तव जनुःस्वपनोदकपावितं, दिविजराजसमाजकृतोत्सवम् ।
सुरगिरेः शिखरं जिन ! कस्य तन् , न जनयेत्त्रिजदर्शनवासनाम् ?॥ १३॥
कनकरूप्यमणीगणवर्षणैः, सुरकृतैस्तव जन्मनि मोदतः ।
जनकराजगृहाङ्गणभूमिका-ऽभवदिह स्फुटरोहणभूरिव ॥१४॥
वपुषि ते रुधिरामिषमुज्ज्वलं, जिन ! निकाममनामयवर्ष्मणः ।
श्वसितमप्यनुपाधिसुगन्धि यत् , क इव वास्त्यपरोऽतिशयोऽमुतः ॥१५॥
इतिजनुःसमयस्मृतिहेतवे, तव नवं स्तवनं जिन ! यः पठेत् ।
विगतविघ्नभरः प्रतिवासरं, स लभते वरमङ्गलमालिकाम् ॥१६॥

इति जन्मकल्याणकस्तवः ॥२॥

"Aho Shrut Gyanam"

## अथ दीक्षाकल्याणकस्तवः ७ (भुजङ्गप्रयातम्)

स्तुवे चारुचारित्रमार्गं चरन्तं, जने सम्मदाद्वैतमुत्पादयन्तम् ।
महेन्द्रादिदेवैर्मुदाऽभ्यर्च्यमानं, जिनं ध्वस्तनिश्शेषभावारिमानम् ॥१॥
जगुर्ये पुरस्ते तपस्यां प्रपित्सोस्तदुत्साहकानीश! वाक्यानि भक्त्या
पदातिप्रवेका इवोद्यद्विवेका, न लोकान्तिकास्ते सुराः कस्य शस्याः?॥२॥
ददानो महादानमिच्छानुरूपं, मणिस्वर्णदुर्वर्णकुप्यादिरूपम् ।
प्रजानां प्रभो! निर्विशेषं सहर्षं, भवे कल्पवृक्षायसे स्मैकवर्षम् ॥३॥
रयाश्वेभशुद्धान्तपत्त्यादिपूर्णं, परित्यज्य राज्यं सुदुर्मोचमन्यैः ।
भवान् संयमैश्वर्यमीशोर्यकार्षीद्विशेषज्ञ! तेत्थं तवैवात्रभाति ॥४॥
त्वयि प्रस्थिते देव! दीक्षां जिघृक्षावुदूहुर्मुदोद्भिन्नरोमोद्गमा ये ।
अहंपूर्विकातो जना याप्ययानं, त एव स्वकार्यैकसिद्ध्येकतानाः ॥५॥
मृगेन्द्रासनच्छत्रसच्चामरादि-श्रिया संयमार्थं पुरान्तर्व्रजंस्त्वम् ।
विमानाधिरूढः प्ररूढाधिकश्री-र्नतः संस्तुतः प्रेक्षतोऽधीश! धन्यैः ॥६॥
वनं पावनं तन् मुने! यस्य मध्यं, त्वयाऽध्यापि चारित्रलक्ष्मीविवाहे।
द्रुमो निस्समोऽसौ महातीर्थमुर्व्यां, तलेऽस्थापस्त्वं निजौ यस्य पादौ॥७॥
विमुच्याखिलाङ्गाद्यलङ्कारवारं, स्वयं मुष्टिभिः पञ्चभिर्लोचमुच्चैः ।
सृजन्तं भवन्तं जना येऽभ्यपश्य-न्नवश्यं दृशःश्लाघनीयास्तदीयाः ॥८॥
स्वयम्बुद्धभावस्य सिद्धप्रणामोत्तरं सर्वसामायिकं गृह्णतस्ते ।
मुदाऽवन्दिषातां पदाम्भोरुहे यैः, सुजन्मान एते ध्रुवं भाविभद्राः ॥९॥
पुरा ज्ञानलब्धित्रयद्धर्या समृद्धं, द्रुतं योगमारूढवन्तं भवन्तम् ।
स्वसङ्केतहूतेव तुर्याऽतिवर्या, प्रपेदे मनःपर्ययज्ञानलक्ष्मीः ॥१०॥
यया केशरोमादिकां सत्क्रियां ते, नरा निर्मिमाणा मुने! सौवभक्त्या।
तपस्यां प्रपन्नस्य साऽस्यात्तयैवेत्यहो! योगमाहात्म्यजा तेऽङ्गसिद्धिः ॥११॥
इति नुतिविषयं त्वां यो नयत्यात्मभावा-
चरणविधिविधूताशेषकर्मप्रपञ्चम् ।

"Aho Shrut Gyanam"

सुलभसुकृतलाभः सोऽल्पकालादधीश !,
क्षयति निहतकर्मा मोक्षसौख्यं सुखेन ॥१२॥ (मालिनी)

इति साधारणो दीक्षाकल्याणकस्तवः ॥३॥

---

## अथ ज्ञानकल्याणकस्तवः ८ ( स्रग्विणी )

केवलालोकसङ्क्रान्तविश्वत्रय-स्यैकवाक्याऽस्तनैकप्रजासंशय! ।
बाढमप्यक्षमाङ्कां निजां गामिमां, गोचरे चारयाम्यद्य ते संस्तुतेः ॥१॥
ध्यातवांस्त्वं यदा शुक्लभेदद्वयी-मादिमां मोहनीयक्षयैकक्षमाम् ।
आविरासीत्तदा देव! ते केवलं, प्रातरैन्द्र्यां दिशीवांशुमन्मण्डलम् ॥२॥
वर्षमेतन्मुने! ऽद्वैतहर्षं जने, दत्तदुःखप्रवासः स मासस्तथा ।
वासरः सौख्यभाभासुरश्चाभवत्, केवलं लेभिषे येषु संवेदनम् ॥३॥
शक्रचक्र्यादिलोकस्य साऽर्ह्या मही, यामधिष्ठाय शुक्लं भवान् ध्यातवान् ।
पादपोऽप्येष सङ्ख्यावदर्च्यः स यच्छायमास्थाय संविच्छ्रियं भेजिवान्॥४॥
विश्वमन्तर्गताशेषभावोत्करं, केवलज्ञानतः सर्वतः पश्यतः ।
गोप्यमन्तर्हितं दूरमभ्यन्तरं, वस्तु नास्त्येव किञ्चित्तवाऽनीक्षितम् ॥५॥
ज्ञानभाजः सुयोगैकरूपात् मनो, जातु माभूत् कुयोगोऽस्य किञ्चिद्विभोः ।
पादभूम्यन्तराले किल स्वर्गिणः, स्वर्णपद्मान्यधुस्तेन ते सर्वदा ॥६॥
विश्वविश्वाधिपत्यैकसंसूचकं, प्रातिहार्याष्टकं चैत्यवृक्षादिकम् ।
दैवतैर्देव! ते निर्मितं भक्तितः, कस्य नाश्चर्यकृज्जायते वीक्षितम् ॥७॥
अन्यदेवेष्वदृष्टाश्रुतामद्भुतां, सम्पदं रत्नरैरूप्यवप्रादिकाम् ।
वीक्षमाणोऽपि हृष्येन् न यस्तावकी-मेष काष्ठं दृषन् नाथ! चञ्चाऽथवा ॥८॥
केऽपि देवाऽसुराः कर्तुमन्यत्र ये, त्वत्समं नाङ्गमङ्गुष्ठमात्रं क्षमाः ।
देशनायाः क्षणे तेऽपि रूपत्रयीं, त्वादृशीं तन्वते ते प्रभावादहो! ॥९॥
देवतिर्यङ्नरश्रेणिसाधारणं, पुण्यपीयूषकुल्यैकतुल्यं विभो! ।
वाक्यमायोजनागामुकं तावकं, कं न कुर्यात् समुत्कर्णमाकर्णितम्? ॥१०॥

"Aho Shrut Gyanam"

नूनमासन्नमोक्षा इमा द्वादश, स्युर्न कस्य प्रभो ! हर्षदाः पर्षदः ॥
या मुखालोकने देशनाकर्णने, दत्तचित्तोपयोगाः पुरस्ते स्थिताः ॥ ११ ॥
हस्तिसिंहं मृगव्याघ्रबभ्रूरगं, श्येणरक्ताक्षताक्ष्यखुमार्जारकम् ।
मुक्तवैरं मिथः स्नेहभृत्ते विभो ! देशनासङ्गमे कं न चित्रीयते ? ॥ १२ ॥
योजनोर्वीमिते देव ! ते स्थानके, मान्ति तिर्यग्नृदेवा असङ्ख्या अपि ।
वागतिक्रान्तमाहात्म्यभाजस्तवै-तादृशामद्भुतानां न सङ्ख्याऽस्ति वा ॥ १३ ॥

तत्रां नमन्ति द्रुमाः सर्वं एवत्तव—

श्राश्रयन्त्याशुगा वान्ति पृष्ठानुगाः ।

पक्षिणो दक्षिणं यान्ति देवाऽखिलाः,

कण्टकाः स्युस्तथाऽधोमुखास्तेऽध्वनि ॥ १४ ॥

रोगदुर्भिक्षमारीतिराजोद्भवा, नोद्भवन्ति प्रजानामिहोपद्रवाः ।
योजनानां सपादे शतेऽवस्थिते, त्वय्यहो ! ध्वान्तसङ्घा यथोष्णद्युतौ ॥ १५ ॥
श्रीगणाधीश्वराणां त्रिपद्यर्पणात् , त्वं जगन्नाथ ! तीर्थप्रवृत्तिं यदा ।
आतनोषि स्म विस्मापितेन्द्रव्रजं, भूरशेषा बभासे सनाथा ततः ॥ १६ ॥

इत्येवं केवलश्रीरभसभरपरीरम्भलाभात्तशोभं,

भक्तिप्रह्वामरेन्द्रासुरनरनिकरारब्धपादाब्जसेवं ।

देवं यः स्तौति भक्त्या प्रतिदिवसमसौ पञ्चमज्ञानलक्ष्मी—
लीलासौख्यानि भुक्त्वा परमपदसुखान्यप्यवाप्नोति तूर्णम् ॥ १७ ॥ (स्रग्धरा)

इतिज्ञानकल्याणकस्तवः ॥ ४ ॥

---

## अथ श्रीनिर्वाणकल्याणकस्तवः ५ (स्वागता)

प्राप्तमुक्तिवनितामुखसङ्गं, ध्वस्तकर्मपटलं विकलङ्कम् ।

रूपगन्धरसहीनमनन्तं, श्रीजिनं नुवतिकर्म करोमि ॥ १ ॥

मुक्तिमाश्रितवति त्वयि नाथे, भूरियं जिन ! बभूव गताभा ।

अस्तमाप्तवति भास्वति किं नो, द्यौर्भवेद् गलितकान्तिविताना ॥ २ ॥

"Aho Shrut Gyanam"

देव ! मुक्तिललनासुखलिप्सो–र्यत्र तेऽनशनमीश ! किलाऽऽसीत् ।
तत्पदं तव पदैः परिपूतं, पूजनीयमिह कस्य न विश्वे ? ॥३॥
वीतराग ! तव निर्वृतिकाले, त्वद्वियोगजनितातुलदुःखात् ।
एककालममरासुरनॄणां, क्रन्दनध्वनिरभूदनिवारः ॥४॥
देव ! दूरतरमुक्तिपदं ते , केवलार्ककलितस्य गतस्य ।
व्यानशेऽन्धतमसैः समकालं, विश्वमेतदखिलं क्षणमात्रम् ॥५॥
त्वद्विनास्थि शुचि निर्जरराजो, मामहुर्मुहुरहो ! अविनाकम् ।
भस्मरत्नमपि देव ! तनोस्तं, नाऽऽपि राजभिरपीह महार्घ्यम् ॥ ॥
आपतद्भिरभितः परियद्भि–र्देवदानवसुरीनिकुरम्बैः ।
मोक्षपर्वरजनी तव जज्ञे, केवलद्युतिमयी सकलाऽपि ॥७॥
तीर्थकृत्त्वकमला विमलाऽपि, त्यज्यते स्म भवता गतरूपा ।
आदृता सपदि सिद्धिवधूः किं, विज्ञता तव विभोऽभिनवेयम् ॥८॥
नैव जन्म न जरा न च रोगाः, क्षुत्तृषामृतिमुखा अपि भावाः ।
क्षिप्तकर्मपटलस्य कदाचिद्देव ! निर्वृतिगतस्य तव स्युः ॥९॥
सिद्धिसौधमधिरूढवतस्ते, ज्ञानदर्शनबलप्रमदानाम् ।
सम्पदोऽनुभवतोऽखिलकालं, नान्तरं जिनपतेऽस्ति न चान्तः ॥१०॥
ज्ञानतोऽनवरतं जगदेतन् , निर्वृतौ तव सुखं यदनन्तम् ।
लेशतोऽपि बत तस्य समस्ते, नास्ति विष्टपतलेऽप्युपमानम् ॥११॥
सिद्धबुद्धपरिनिर्वृतमुक्त-क्षीणदुःखकृतकृत्यमुखास्ते ।
संस्मृता बहुविधा अभिधाः स्युः, पापपङ्कविगमाय न केषाम् ? ॥१२॥
इति विशृङ्खलयाऽपि गिरा मया, जिन ! नुतोऽसि महोदयमाश्रितः ।
त्वमिह तत् कुरु येन जिनेश ! मे, भवति ते पदवी नदवीयसी ॥१३॥

इति श्रीजिननिर्वाणकल्याणकस्तवः ॥५॥

कृताः पञ्चापि स्तवाः तपागच्छेन्द्रश्रीसोमसुन्दरसूरिपादैः ॥

"Aho Shrut Gyanam"

## अथ साधारणः श्रीजिनकल्याणकस्तवः २ (उपजातिः)

कल्याणकारीणि जिनेश्वराणां, पञ्चापि कल्याणदिनानि वन्दे ।
आह्लादिताशेषजगज्जनानि, महोत्सवाद्वैतरमामयानि ॥१॥
हरिप्रकलृप्तोत्सववन्दनप्रसू-सुस्वप्ननिध्यागमसूचितोदयम् ।
गर्भागमाख्यं निखिलार्हतां सतां, कल्याणकं यच्छतु मोदमादिमम् ॥२॥
जगत्त्रयोद्योतनमिन्द्रनिर्मिताभिषेचनं नारकलोकशर्म च ।
इत्यादिभावैर्भुवनाद्भुतैर्युतं, श्रीजन्मकल्याणकमर्हतां स्तुमः ॥३॥
संवत्सरोत्सर्जनविश्वतोषणै-र्लोकान्तिकामर्त्यसभक्तिभाषणैः ।
सम्प्राप्तशोभं शिबिकादिकैस्तथा, जिनेन्द्र ! दीक्षादिनमस्तु नः श्रिये ॥४॥
चतुर्निकायामरनिर्मितस्फुरत्-सत्प्रातिहार्यातिशयर्द्धिबन्धुरम् ।
साऽलोकलोकाकलनैककौशले, हेतुर्जिन ! ज्ञानदिनं सुखाय नः ॥५॥
ऐकान्तिकात्यन्तिकसौख्यभाजनं, ज्ञानाद्यनन्तर्द्धिचतुष्टयान्वितम् ।
येष्वर्हतां सिद्धपदं बभूव तान्, स्मरामि निर्वाणदिनान्मुदा सदा ॥६॥
तीतादिकालत्रितयेऽखिलार्हतां, श्रीभारतैरावतभाविनां सना ।
गर्भादिकल्याणकपञ्चके ध्रुवान्, स्मरामि मासोडुतिथीन् यथाक्रमम् ॥७॥
कल्याणकानामिति ये नवं स्तवं, दिने दिने पापठति प्रमोदतः ।
तेषामशेषाः सुखसम्पदोऽद्भुता, भवे भवे बोभुवति प्रभास्वराः ॥८॥

इति साधारणः श्रीजिनकल्याणकपञ्चकस्तवः ।
कृतिः श्रीसोमसुन्दरसूरिपादानामियम् ॥

---

## श्रीजिनकल्याणकदिनस्तुतयः (३)

यद्योगतः शम्भवतीर्थनाथः, सत्केवलोद्योतरमामवाप ।
सा पञ्चमी कार्त्तिकमास आसीत् , श्यामापि शुक्ला सुतरां कथं न ? ॥१॥
इन्द्रवज्रा

"Aho Shrut Gyanam"

द्वादश्यशुक्लाऽपि किलोर्जमासः प्रासाधि जन्मच्यवनोत्सवाभ्याम् ।
याभ्यां निजाभ्यां जिननायकौ तौ, नमामि पद्मप्रभनेमिनाथौ ॥२॥ उप०

यद्वा— निजच्यवनजन्मभ्यां, कार्त्तिकद्वादशीश्रियम् ।
श्यामाप्यऽलम्भ याभ्यां तौ, नेमिपद्मप्रभौ भजे ॥२॥ पथ्यावक्त्रम्

पवित्रिता येन सितेतरा व्रतस्वीकारतः कार्त्तिकत्रयोदशी ।
तत् सर्वशुद्धेति दधे प्रथां नु सा, सर्वापि पद्मप्रभमानमामि तम् ॥३॥
इन्द्रवंशा उपजातिः

यन्मोक्षपर्वप्रभवेन दीपोत्सवेन, वैशद्यमिता जिगाय ।
राकाः कुहूः कार्तिकस्य सर्वाः, सार्वः स वीरः शिवतातिरस्तु ॥४॥ उपजातिः

बाहुलस्य धवले तृतीयके, सत्तिथावतिथिताऽऽसकेवलम् ।
विश्वविश्वजनताहितावहं, श्रीजिनं सुविधिमर्चयाम्यहम् ॥५॥ रथोद्धता

कार्तिकस्योज्ज्वलद्वादशीवासरे, केवलज्ञानमासादयामास यः ।
स्फातिमत्प्रातिहार्यातिशेषश्रियं, श्रीअरं सादरं तं स्मरामीश्वरम् ॥६॥
स्रग्विणी । कार्तिकः १ ॥

कर्पूरगौरवपुषः सुविधेर्जिनस्य,
या जन्मनोऽजनि जगत्सुखदस्य कर्त्री ।
सा पञ्चमी शितिसहस्य कथं नमस्या,
न स्यात् सुरासुरनृणां जननीव रामा ? ॥७॥ वसन्ततिलका

सुविधिं विधिवत् स्तुमो जिनं, नवमं येन जगन्नवं कृतम् ।
निजसंयमराज्ययोगतः सहषष्ठीदिनमाद्यपक्षगम् ॥८॥ वैतालीयम्

मार्गकृष्णदशमीदिने शमी-भावमासमहमासमन्तिमम् ।
ज्ञातनन्दनमनन्तसंविदं, दम्भवर्जितहृदा मुदा स्तुवे ॥९॥ रथोद्धता

प्रभुं पद्मरागप्रभं देवपद्म-प्रभं भग्नसर्वान्तराराातिगर्वम् ।
सहस्यासितैकादशीप्राप्तमोक्षं, सुखज्ञानसाम्राज्यभाजं भजेयम् ॥१०॥
भुजङ्गप्रयातम्

"Aho Shrut Gyanam"

येन जन्मशिववर्त्मगमाभ्यां, भूषिता किल मणीवलयाभ्याम् ।
मार्गशुक्लदशमी रमणीव, श्रीअरो भवहरोऽस्तु ममाऽसौ ॥११॥ स्वागता
श्रीमल्लिजन्मव्रतकेवलानि, तथा नमिज्ञानमरत्नतं च ।
यस्यामजायन्त सिता सहस्य, सैकादशी स्यान्नहि कस्य शस्या ? ॥१२॥
उपजातिः

मार्गमासि विशदा चतुर्दशी शम्भवस्य जनुषाऽर्हतोऽजनि ।
इन्द्रवृन्दमहिता हितोल्लसन्- नारकावधिजगज्जनोत्सवा ॥१३॥ रथोद्धता
सा मार्गशीर्षस्य कथं न राका, स्याच्चित्रकृद्यत्र बभूव भाग्यात् ।
गुणैर्दृढः संयम एव मुक्ते-र्निबन्धनं श्रीजिनशम्भवस्य ॥१४॥
उपजातिः । मार्गशीर्षः ॥२॥

यत्राश्वसेननरनाथगृहं महर्द्ध्या,
स्वर्ग्यागमेन च जितत्रिदिवं विरेजे ।
सा पौषकृष्णदशमी जिनपार्श्वजन्म—
पूता पवित्रयतु मानसमस्मदीयम् ॥१५॥ वसन्ततिलका

राज्यं परित्यज्य बभार सारं, पार्श्वो जिनो यत्र चरित्रभारम् ।
पौषस्य कृष्णामपि पुण्यरूपामेकादशीं तां मनसा स्मरामि ॥१६॥ इन्द्रवज्रा
तैषस्याद्यद्वादशीलब्धजन्मा,
योऽभूद्भूमेर्भूषणं भारतस्य ।
सेवे श्रुत्याऽपास्तचन्द्रप्रभस्ये,-
त्यस्यां ह्री श्रीदेवचन्द्रप्रभस्य ॥१७॥ शालिनी
पौषमास्यविशदत्रयोदशीप्राप्तसंयमरमासमागमम् ।
अष्टमं जिनमहा(था)ष्टकर्मभीवारणं शरणमाश्रयाम्यहम् ॥१८॥ रथोद्धता
चतुर्दशी शीतलकेवलाप्त्या,
पौषस्य कृष्णाऽसुमतां मताऽभूत् ।
मन्ये ततः सर्वजनेऽपि भूते—
इति प्रसिद्धा सकलाऽपमाऽऽसीत् ॥१९॥ उपजातिः

"Aho Shrut Gyanam"

पौषे जनसौख्यपोषके, सितषष्ठीदिनलब्धकेवलम् ।
विमलं सकलज्ञशेखरं, वरभक्त्या समुपास्महेऽन्वहम् ॥२०॥ वैतालीयम्
पौषशुक्लनवमीदिनलब्धप्राज्यकेवलमहोमहिमाढ्यः ।
शान्तितीर्थकर ! किंकरतां ते, सर्वदैव भगवन् करवाणि ॥२१॥ स्वागता
पौषशुक्लैकादशीलब्धजन्मा, यस्य प्रोद्यत्केवलज्ञानभानुः ।
तुर्यांशस्यादीदिपन् मध्यमार्गं, द्वैतीयीकस्तीर्थनाथः स जीयात् ॥२२॥
शालिनी

सहस्यशुक्लैकचतुर्दशीजे, यज्ज्ञानतेजः सकलां त्रिलोकीम् ।
अपूपुरत् संवरराजजन्मा-ऽभिनन्दनस्तुर्यजिनः स नोऽव्यात् ॥२३। उप०
या श्रीमतो धर्मजिनेश्वरस्य, तं ज्ञानचन्द्रं प्रकटीचकार ।
गम्यो न योऽम्भोदविधुन्तुदादे-स्तां पौषराकामिह कामयेऽहम् ॥२४॥
इन्द्रवज्रा । पौषः ॥३॥

माघस्य षष्ठ्यां विशदेतरस्यां, यत्रावतीर्णो युगपच्चकार ।
हर्षं विषादं च भुवो दिवश्च, पद्मप्रभं तं प्रभुमाद्रियेऽहम् ॥२५॥
इन्द्रवज्रा

श्रीशीतलः स्वीकृतवान् द्वयोः स्व-कल्याणयोर्जन्मतपस्ययोर्याम् ।
सा द्वादशी श्यामतमा न माघी, मान्या भवेत् कस्य सचेतनस्य ? ॥२६॥
इन्द्रवज्रा

असिता तपसस्त्रयोदशीयं, शिवहेतुर्भवति स्म यस्य नेतुः ।
दशसाधुसहस्रसंयुतस्य, प्रथमः तीर्थपतिः पृणातु सोऽस्मान् ।२७॥
॥ औपच्छन्दसिकम् ॥

यत्केवलज्ञानरमाप्रयोगादमाऽपि माघस्य बभूव सश्रीः ।
एकादशस्तीर्थकरो नराणामेकां शुभामेव दशां स दिश्यात् ॥२८॥
उपजातिः

यत्र जातमभिनन्दनजन्म, ज्ञानमाप वसुपूज्यसुतश्च ।
सा द्वितीयकतिथिः सितमाघे, नित्यमेतु मनसोऽतिथितां मे ॥२९॥
स्वागता

"Aho Shrut Gyanam"

विमलधर्मजिनेश्वरयोरहो!, जनिमहोऽजनि यत्र महाद्भुतः ।
सुविशदा तपसोऽस्तु तृतीयिका, तिथिरसौ शिवसौख्यनिबन्धनम् ॥३०॥
द्रुतविलम्बितम्

पक्षे वलक्षे तपसश्चतुर्थी-दिने मुनित्वं प्रतिपन्नवान् यः ।
श्यामाङ्गभूः श्रीकृतवर्मभूप-कुलप्रदीपो विमलः स जीयात् ॥३१॥
उपजातिः

जितशत्रुक्षितिपाललालिताङ्गं, विजयाकुक्षिसरोजराजहंसम् ।
अजितं माघसिताष्टमीन्द्रवृन्द- प्रकृतप्राज्यजनुर्महं महामि ॥३२॥
औपच्छन्दसिकाऽपरान्तिका

माघस्य शुक्लनवमीदिवसे विसृज्य, राज्यं चरित्रकमलामुररीचकार ।
यः स्वर्णवर्णवपुरङ्कगहस्तिमल्लः, शैवं सुखं स तनुतामजितो जिनो नः ॥३३॥
वसन्ततिलका

तपोद्वादशीवासरे शुक्लपक्षे, परिव्रज्य नैर्ग्रन्थनाथो य आसीत् ।
जिन संवरक्ष्मापजन्मा तुरीयः, स आर्यस्तपो वर्यवीर्यं वितीर्यात् ॥३४॥
भुजङ्गप्रयातम्

माघमासविशदत्रयोदशी—वासरे समजनिष्ट यो व्रती,
भानुभूपतिकुलाभ्रभानुमान्, धर्मतीर्थकर एष शर्मणे ॥३५॥
रथोद्धता । माघः ४

फाल्गुने बहुलषष्ठवासरे, ज्ञानरत्नमुदपादि पञ्चमम् ।
यस्य शस्यमहिमाम्बुधेर्दधे, तं सुपार्श्वजिनमात्ममानसे ॥३६॥ रथोद्धता ।
सप्तमाष्टमजिनावनापतु—र्यत्र मुक्तिपदकेवलश्रियौ ।
फाल्गुनस्य शितिपक्षसप्तमी, सा प्रमोदपदवीं न कं नयेत् ? ॥३७॥
रथोद्धता

तपस्यमासस्य सितेतरस्यां, जातं द्युलोकच्यवनं नवम्याम् ।
स्वबोधये श्रीसुविधिं जिनेन्द्रं, ध्यायामि शुद्धात्मवपुःस्वरूपम् ॥३८॥
उपजातिः

"Aho Shrut Gyanam"

यैकादशी फाल्गुनिकस्य कृष्णा, सत्केवलज्ञानसमृद्धिलाभे ।
नाभेयदेवस्य निदानमासी-दाराधयेत्तां खलु धन्य एव ॥३९॥ इन्द्रवज्रा

श्रीसुव्रतस्याजनि केवलश्रीः, श्रेयांसनाथस्य जनिश्च यस्याम् ।
सा द्वादशी फाल्गुनमासि कृष्णा, मुष्णातु तृष्णातुरतां नतानाम् ॥४०॥
इन्द्रवज्रा

मासे तपस्ये बहुलत्रयोदशी–गृहीतचारित्रभरं जिनेश्वरम् ।
श्रेयांसनामानममानमत्सरं, भुजिष्यवन्निर्भरभक्तितो भजे ॥४१॥ उपजातिः

फाल्गुनासितचतुर्दशीतिथौ, देवक्लृप्तजनिमज्जनक्षणम् ।
पूजयामि वसुपूज्यनन्दनं, पापतापशमनैकचन्दनम् ॥४२॥ रथोद्धता

यः प्राव्राजीत् फाल्गुने कृष्णपक्षे–ऽमावास्यायां विश्वरक्षैकदक्षः ।
तस्य श्रीमद्वासुपूज्यस्य नाम–स्मृत्या नित्यं स्वं कृतार्थीकरोमि ॥४३॥
शालिनी

तपस्यस्य शुक्लद्वितीयादिने द्यो-र्भुवं भारतीं भूषयामासिवान् यः ।
अरं पारगं सर्वसंसारवार्द्धे-र्दधे ध्यानमार्गे सुवर्णद्युतिं तम् ॥४४॥
भुजङ्गप्रयातम्

धराधीशकुम्भप्रभावत्यपत्यं, जिनं मल्लिनामानमानौमि नित्यम् ।
चतुर्थ्यां तिथौ फाल्गुने शुक्लपक्षे, क्षपार्द्धे दिवोऽत्रावतीर्णो भुवं यः ॥४५॥
भुजङ्गप्रयातम्

तपस्यमासस्य सिताष्टमी सा, न कं जनं प्रापयति प्रमोदम् ? ।
श्रीशम्भवो यत्र जितारिभूप–वंशेऽवतारं रचयाञ्चकार ॥४६॥ उपजातिः

तपस्यस्य सद्द्वादशी सा द्वितीया–ऽद्वितीयैव यत्रेति कल्याणयुग्मम् ।
शिवं मल्लिरेकोनविंशो जिनेशश्चरित्रश्रियं सुव्रतश्चाप विंशः ॥४७॥
भुजङ्गप्रयातम् ॥ फाल्गुनः ।

श्लाघ्यैव कृष्णापि मधोश्चतुर्थी, पार्श्वश्च्युतिज्ञानमहात्मकेन ।
निजेन कल्याणयुगेन यत्रा-वातीतरत् स्वर्गरमामिहोर्व्याम् ॥४८॥ उप०

"Aho Shrut Gyanam"

चैत्रे शितौ पञ्चमिकातिथौ यः, श्रीलक्ष्मणाकुक्षिमलञ्चकार ।
चन्द्रप्रभः श्रीमहसेनभूप-कुलाब्जहंसः स सतां श्रियेऽस्तु ॥४९॥उपजातिः
कृष्णचैत्राष्टमीजातजन्मव्रतं, दर्शितन्यायधर्मव्यवस्थं धुरि ।
नाभिराजाङ्गजन्मानमाद्यं जिनं, ध्यानसेवानमस्कारमार्गं नये ॥५०॥
स्रग्विणी

यस्य शुक्लमधुमासतृतीया—वासरे विमलकेवलमासीत् ।
तस्य सप्तदशकुन्थुजिनेन्द्र—स्यांह्रियुग्ममहमन्वहमीडे ॥५१॥ स्वागता
धवलचैत्रिकमासगपञ्चमी—समुपजातमहोदयसङ्गमान् ।
अजितशम्भवतीर्थपती तथा, जिनमनन्तमपि प्रणिदध्महे ॥५२॥
॥ द्रुतविलम्बितम् ॥

चैत्रशुक्लनवमीसमवाप्ता—नन्तमोक्षसुखसङ्गममीशम् ।
शीलयामि सततं सुमतिं श्री-मङ्गलोदरदरीहरितुल्यम् ॥५३॥ स्वागता
चैत्रिकैकादशी सा सिता नो मता, कस्य यस्यामसौ पञ्चमस्तीर्थकृत् ।
मेघभूपाङ्गभूर्भूतलप्रीतिदः, केवलज्ञानलक्ष्मीसुपार्श्वोद्विसुः ॥५४॥स्रग्विणी
मधुमाससितत्रयोदशी-रजनीजातजनुर्महामहम् ।
त्रिशलातनयं नयाम्यहं, जिनमन्तर्मनसं सुवर्णभम् ॥५५॥ वैतालीयम्
यस्यां सुसीमाधरराजनन्दनः, पद्मप्रभो ज्ञानमवाप पञ्चमम् ।
सा पौर्णमासी मधुमासमण्डनं, विखण्डनं नो वितनोतु कर्मणाम् ॥५६॥
उपजातिः। चैत्रः ॥६॥

वैशाखकृष्णप्रतिपत् पवित्रा, कथं न यत्राऽजनि मोक्षलक्ष्मीः ।
श्रीकुन्थुनाथस्य सुवर्णकान्तेः, श्रीसुरराजेन्द्रतनूद्भवस्य ॥५७॥
इन्द्रवज्रा उपजातिः

यो राधमासस्य शितौ द्वितीया-दिने महानन्दपदं प्रपेदे ।
श्रीशीतलं भूतलतायिनं तं, नन्दातनूजं परिपूजयामि ॥५८॥ उपजातिः
स्वयशसा पृथवे जिनकुन्थवे, नृपतिपूरसुताय नमो नमः ।
असितमाधवपञ्चमिकातिथौ, य उदुवाह महाव्रतसम्पदम् ॥५९॥
॥ द्रुतविलम्बितम् ॥

"Aho Shrut Gyanam"

वैशाखषष्ठ्यां बहुले द्युलोकान्, नन्दोदरे योऽवततार सारे ।
श्रीशीतलः कोपदवानलेन, प्लुष्टं जगच्छीतलयत्वलं सः ॥६०॥इन्द्रवज्रा
राधकृष्णदशमी नमनीया, सा न कस्य विदुषः पुरुषस्य ।
या मुनिं नमिजिनं शिवपुर्या, वर्यराज्यपदभाजमकार्षीत् ॥६१॥स्वागता
माधवस्य बहुलत्रयोदशी-जातजन्ममहिमं महाद्युतिम् ।
सिंहसेननृपनन्दनं नमेः, कर्मतां जिनमनन्तमानये ॥६२॥ रथोद्धता

(अनन्तो व्रतं केवलं चाप यत्रामलं,
तथा कुन्थुनाथो जिनो जन्मकालोत्सवम् ।
इह त्रीणि कल्याणकान्येवमासन्मुदे
चतुर्दश्यशुक्लाऽपि सा माधवी वः श्रिये ॥६३॥
॥ शक्वर्यो छन्दोविशेषः) ।

चतुर्दश्यशुक्ला मुदे माधवीया, त्रिकल्याणकीयं बभु(वे)ति यस्याम् ।
अनन्तो व्रतज्ञानलक्ष्म्याववापत्, तथा कुन्थुनाथो जनेरुत्सवं च ॥६३॥
॥ भुजङ्गप्रयातम् ।

यः शुद्धराधस्य तिथौ चतुर्थ्यां, श्रीसंवरक्ष्मापकुलेऽवतीर्णः ।
सुवर्णवर्णः स भिनत्तु भूयो, भयं भवार्त्तेरभिनन्दनो वः ॥६४॥ उपजातिः
सप्तमी सपदि माधवमासः, प्रीतिदा न न भवेद्वदाता ।
यत्र धर्मपरमेष्ठ्यवतारात्, भानुभूपकुलमुज्ज्वलमासीत् ॥६५॥ स्वागता
वैशाखे विशदाष्टमीदिने यौ, लेभाते जननोत्सवं शिवं च ।
सुमतिश्री अभिनन्दनौ जिनौ तौ, तनुतामातनुतां ममाघराशेः ॥६६॥
औपच्छन्दसिकाऽपरान्तिका ।

राधशुक्लनवमीदिवसे यो-ऽशिश्रियच्चरणभारमुदारम् ।
मेघराजतनुजः स जिनेन्द्रो, न्यक्करोतु सुमतिः कुमतीर्नः ॥६७॥
स्वागता

वर्द्धमानजिनराट् चरणर्द्धिं, नेनयीतु चरमः परमां नः ।
माधवस्य विशदा दशमी यं, प्रापयत् प्रवरकेवललक्ष्मीम् ॥६८॥ स्वागता

"Aho Shrut Gyanam"

राधमाससितपक्षगता सा, द्वादशी शमयताद्दुरितं वः ।
श्रीमती वसुमती विमलस्या-भूद्दिव१च्यवनपर्वणि यस्याम् ॥६९। स्वागता
त्रयोदशीमाधवमाससत्का, सित सतां संतनुतां मतिं सा ।
* यत्राजितः श्रीजितशत्रुभूप-कुले द्युलोकादुपपादि देवः ॥७०॥
उपजातिः वैशाखः ।

ज्येष्ठे मासे कृष्णे पक्षे, षष्ठ्यां गर्भोत्पत्तिर्यस्य ।
विष्णो राज्याः कुक्षौ देवं, श्रेयांसं तं नित्यं सेवे ॥७१॥ विद्युन्माला
ज्येष्ठाष्टम्यां कृष्णपक्षे यदीयं, जज्ञे जन्माऽऽखण्डलश्रेणिपूज्यम् ।
श्रीमन्तं तं सुव्रतं तीर्थनाथं, पद्मासूनुं नूनमाराधयामि ॥७२॥ शालिनी
ज्येष्ठमासनवमीदिनसिद्धं, श्रीसुमित्रनरराजतनूजम् ।
कूर्मलाञ्छनमतुच्छतमाल-च्छायकायमपमत्सरमीडे ॥७३॥ स्वागता
ज्येष्ठमासबहुलत्रयोदशी-जातजन्ममहनिर्वृतिक्षणः ।
प्रार्थितार्थघटनासुरद्रुमः, शान्तितीर्थपतिरस्तु शान्तये ॥७४॥ रथोद्धता
नमत शान्तिजिनं कनकद्युतिं, दुरितसन्ततिशान्तिकहेतवे ।
बहुलपक्षगशुक्लचतुर्दशी, व्रतमहारमया यमरीरमत् ॥७५॥
द्रुतविलम्बितम्

ज्येष्ठमासि सितपञ्चमीतिथौ, मौक्तिकं फलमुपार्जयत् किल ।
ज्ञानलक्ष्मिसमलङ्कृतेः कृते, यः स धर्मजिनराड् विजेजिताम् ॥७६॥
रथोद्धता

ज्येष्ठस्य शुक्ला नवमीतमी यं, दिवोऽवतार्याऽऽर्यममूमुदत्क्ष्माम् ।
श्रीवासुपूज्यो वसुपूज्यसूनु-र्जिनः प्रवालद्युतिरेष जीयात् ॥७७॥ उपजातिः
द्वादश्यां सितशुक्रमासगायां, जन्माजायत यस्य विश्वशस्यम् ।
श्रीपृथ्वीनृपतिप्रतिष्ठसूनुः, स सतां यच्छतु वाञ्छितं सुपार्श्वः ॥७८॥
औपच्छन्दसिकाऽपरान्तिका

---

* वरं वृणीते स्म चरित्रलक्ष्मी-र्यस्यां प्रशस्यं विमलं सुरेशैः इति प्रत्यन्त

"Aho Shrut Gyanam"

ज्येष्ठमासविशदत्रयोदशी, यं युयोज चरणश्रिया वरम् ।
श्रीसुपार्श्वजिनराट् सप्तमः, सत्तमां गतिमयं ददातु नः ॥७९॥
रथोद्धता । ज्येष्ठः ॥

आषाढपक्षे बहुले चतुर्थ्यां, यस्याऽऽगमाद् भारतभूर्बभ से ।
श्रीनाभिभूपालकुलावतंसः, श्रीआदिदेवस्तनुतां शिवं सः ॥८०॥ इन्द्रवज्रा
मासे शुचावसितसप्तमीदिने, यं मोक्षसौख्यपदवी समीयुषी ।
विश्वेश्वरं विमलमातनोमि तं, ध्यानाधिरूढमनिशं मनोऽन्तरे ॥८१॥
ललिता

नवमीदिवसे शुचिसितपक्षे, तपसः कमला यमलमकार्षीत् ।
विजयक्षितिपामलकुलदीपं, नमिमिन्द्रनतं नमत जिनं तम् ॥८२॥
जगत्यां छन्दोविशेषः

निजावतारात् शुचिशुक्लषष्ठ्यां, तुर्यारकप्रान्तमदीदिपद्यः ।
श्रीवर्द्धमानः परिवर्द्धमानाः, स सम्पदो यच्छतु वाञ्छिता वः ॥८३॥ उप०
शुक्लाष्टमीप्राप्तशिवं शुचौ तं, शैवेयदेवं स्वशिवाय सेवे ।
मौक्तिक्यभूद्यो यदुराजवंशे, नैर्मल्यविभ्राजि सुवृत्तताढ्यः॥८४॥ इन्द्रवज्रा
आषाढमासस्य वलक्षपक्षे, चतुर्दशीजातमहोदयश्रीः ।
श्रीवासुपूज्यो जगदेकपूज्यो, जिनातु दुष्कर्मपरम्परा नः ॥८५॥
॥ उपजातिः । आषाढः ॥

श्रावणमासे कृष्णतृतीया-वासरलब्धानन्तशिवर्द्धिः ।
विष्णुसुतः श्रीतीर्थंकरः, श्रीमोक्षसुखं नम्राङ्गेषु देयात् ॥८६॥
॥ रुक्मवती चम्पकमाला वा ॥

नभसोऽसितसप्तमीं स्तुवे, बत यत्राऽऽसमनन्तनामकम् ।
सुयशा निजकुक्षिकोणकेप्यधरन्मेरुगिरेर्गुरुं गुणैः ॥८७॥ वैतालीयम् ॥
श्रावणेऽष्टमतिथावसितायां, मेरुमूर्ध्नि जननोत्सवमाप्तम् ।
* वप्रया धृतमिनं निजकुक्षौ, श्रीनमिं नमतिकर्म करोमि ॥८८॥ स्वागता

* भूषणं विजयभूपकुलस्य इति प्रत्यन्तरे ॥

"Aho Shrut Gyanam"

स्वस्तश्च्युतिः श्रावणकृष्णपक्षे, तस्यां नवम्यामरिहस्य यस्य ।
तं कुन्थुनाथं नृपसूरराज्ञी—श्रीपुत्रमाराधयत त्रिकालम् ॥८९॥ इन्द्रवज्रा
श्रावणस्य सितया द्वितीयया, सिंहवद्य इह मेघभूपभूः ।
मङ्गलोदरदरीमवातरत्, सन्मतिं स सुमतिस्तनोतु नः ॥९०॥ रथोद्धता
पञ्चमी नभसि मासि सिता सा, मानसं मुदमवापयतान् मे ।
नेमिनोन्नतिमनीयत यस्यां, जन्मना यदुकुलं निजकेन ॥९१॥ स्वागता
यः प्राव्राजीत् श्रावणे शुक्लषष्ठ्यां, मुक्त्वा राज्यं राजमत्या सनाथम् ।
नेमिः स्वामी श्यामलच्छायकायो, मायामुक्तं स्वं पदं स प्रदेयात् ॥९२॥
शालिनी

अश्वसेनतनयं विनयेना-नौमि कामितफलाप्तिसुरद्रुम् ।
श्रावणस्य विशदाष्टमपक्षे, यो विमुक्तिसुखसङ्गममाप ॥९३॥ स्वागता
द्योर्यश्च्युत्वा श्रावणे पौर्णमास्यां, पद्माकुक्ष्यम्भोरुहे हंसति स्म ।
देवः स श्रीसुव्रतः स्वांह्रिपद्मे, नित्यं दद्याच्चञ्चरीकव्रतं मे ॥९४॥
शालिनी । श्रावणः १०

भाद्रमास्यऽसितसप्तमीदिनं, स्यान्न कस्य ननु सम्मदास्पदम् ? ।
यत्र षोडशजिनो दिवश्च्यु(श्च्य)वं, मोक्षमष्टमजिनोऽप्यवापतुः ॥९५॥
रथोद्धता

भाद्राष्टम्यां बहुलगतायां, स्वर्गाद्भूमौ समवततार यः ।
स श्रीमान् जयति सुपार्श्वः, पृथ्वीसूनुः कनकनिभाङ्गः ॥९६॥ मत्ता ।
शुक्लनवम्यां भाद्रपदस्या-गाद्भवाब्धेः पारमगाद्यः ।
भानुसमानं भुवनालोकं, श्रीसुविधिं तं ध्यायत धन्याः ॥९७॥
रुक्मवती । भाद्रपदः ११

अमाऽपि सूद्योतमयी कथं न, तिथिः पवित्राश्विनमाससत्का ? ।
यत्रोदगान्नेमिनि केवलार्कः, समग्रकर्मावरणाऽभ्रमुक्तः ॥९८॥ उपजातिः
तद्युक्तमेवाश्विनपौर्णमासी, यदुज्ज्वला सर्वजनैर्न्यगादि ।
नमेर्भुलोकागमनेन यस्यां, महोमयी ! द्रागखिलाप्यऽभूद् भूः ॥९९॥
उपजातिः । आश्विनः

सर्वे द्युलोकाऽऽगमजन्मदीक्षा–ज्ञानापवर्गाप्तिदिना जिनानाम् ।
महोत्सवोद्योतमया मयाऽमी, स्मृताः समाधिं ददतां च बोधिम् ॥१००॥
उपजातिः

च्यवनजननदीक्षाकेवलज्ञानमोक्षा–
गमसमयविशेषेषूत्सवाद्येषु येषां ।
क्षितिवलयमपास्तस्वर्गशोभं बभस्ति,
प्रददतु मुदमासास्तेऽत्र कालत्रयेऽपि ॥१०१॥ मालिनी

उत्सर्पिण्यवसर्पिणीषु भरतेष्वैरावतेष्वर्हतां,
सर्वेषामपि भूतभाविभवतां कल्याणकेषु क्रमात् ।
मासान् भानि तिथींश्च शाश्वततया तान्येव विज्ञा जगु-
र्यस्मात्तज्जिनभाषितं प्रवचनं भक्त्या नमामोऽन्वहम् ॥१०२॥
शार्दूलविक्रीडितम् ॥

ये श्रीतीर्थाधिपानां समसमयभुवां विंशतेर्वा दशानां,
तावद् रूपैरुपेता इह महिमभरं पञ्चकल्याणकेषु ।
अर्हद्भक्तिप्रमोदात् तृणतुलितदिवः कुर्वते सर्वकालं,
ते सर्वेऽपीन्द्रमुख्या विदधतु विबुधाः सङ्घलोकाय भद्रम् ॥१०३॥
स्रग्धरा ॥

इति कार्तिकादिमासानुक्रमेण श्रीजिनकल्याणकदिनस्तुतयः कृताः श्रीतपागच्छाधिराजपरमगुरुभट्टारकप्रभुश्रीसोमसुन्दरसूरिपादैः ।



"Aho Shrut Gyanam"

ॐ नमो जिनाय ॥

सहस्रावधानिश्रीमुनिसुन्दरसूरिवरविरचिता

# स्तवपञ्चविंशतिका ।

## अथ मङ्गलशब्दार्थस्तवनम् १ ( अनुष्टुप् )

जय श्रीजिनकल्याण-वल्लीपल्लवनाम्बुद ! ।
मुनीन्द्रहृदयाम्भोज-विलासवरषट्पद ! ॥१॥
तव नाथ ! पदद्वन्द्व- सपर्यारसिका जनाः ।
सर्वसम्पत्सुखश्रीभि- र्विलसन्ति सदोदयाः ॥२॥
नृलोके चक्रिताद्या याः, स्वर्लोके चेन्द्रताद्यः ।
शिवेऽनन्तसुखाद्यास्ता-स्तव भक्तिवशाः श्रियः ॥३॥
सर्वश्रेयःश्रियां मूलं, ददद्धर्मं समग्रवित् ।
योगक्षेमकरो नाथस्त्वमेव जगतामसि ॥४॥
त्वमेव शरणं बन्धुस्त्वमेव मम देवता ।
तन्मां पाहि भवात्तात !, कुरु श्रेयःसुखास्पदम् ॥५॥

इति मङ्गलशब्दार्थस्तवनम् ।

## अथ मङ्गलशब्दार्थस्तवः २ ( उपजातिः )

जयश्रियां धाम सुधामधारिन् !, सुत्रामदामार्चित ! देवदेव ! ।
त्रिलोकपूजातिशयाभिराम !, प्रकाममानन्दननन्दनेतः ॥१॥
वर्गत्रयस्यार्जनबद्धचेतसः, सुचेतसः कर्मसु सत्सु सूद्यमाः ।
ददात्यदो नाथ ! तव स्तवोऽत्र तद्, बुधा यतन्ते सकलाः फलार्थिनः ॥२॥
अयं महानन्दपदाऽऽसये सतां, हेतुर्विशुद्धः प्रथितो मनीषिषु ।
इति प्रवीणा मुनयोऽपि ते स्तवे, रतिं दधन्ते भवभोगनिःस्पृहाः ॥३॥
प्रवर्द्धमानोत्तममङ्गलावली, श्रियः सदानन्दरसोर्मिवर्मिताः ।
सुखानि विश्वाशयविश्रमास्पदं, प्रभो ! वशत्वं नयते तव स्तवः ॥४॥

"Aho Shrut Gyanam"

त्रातारमेकं परम वदन्ति यं, मनस्विनोऽभीष्टदधर्मदानतः ।
जिनेन्द्र ! तस्मै भवते सदा जग-त्पितामहाय प्रभुतात्मने नमः ॥५॥
इति मङ्गलशब्दार्थस्तवः ।

## अथ मङ्गलशब्दार्थस्तवः ३ ( वैतालीयम् )

समवाप्य जयश्रियं जग- त्त्रितयीजित्वरमोहभूपतेः ।
त्रिजगत्प्रभुताश्रियां पदं, समभूद्यस्तमहं जिनं स्तुवे ॥१॥
इदमौपयिकं शिवश्रियां, कृपणानामपि मादृशां सुखम् ।
जगदे कृपया महात्मभिः, करवै तेन तव स्तुतिं विभो ! ॥२॥
त्वयि ह्युदिते सतां रवा-विव खे स्युः कमला विकस्वराः ।
वितमःप्रसराः प्रभो ! धियः, पुनराशा इव सर्वतो जिन ! ॥३॥
वशगा धृतिकान्तिकीर्त्तयो, नरदेवप्रभुतादयः श्रियः ।
विभवो विभवस्तवाऽपि यः, स्तुतिवल्लेर्भवतः फलानि ते ॥४॥
सुपरीक्ष्य समग्रदातृषु, प्रभुरेकोऽर्थितदायकः श्रितः ।
मयकाऽर्थितया त्वमेव तत, परमानन्दपरं ददस्व मे ॥५॥
इति मङ्गलशब्दार्थस्तवः ।

## अथ मङ्गलशब्दार्थस्तवः ४ ( अनुष्टुप् )

जगतां प्रभुतां प्राप, यो भावारिजयश्रिया ।
शाश्वतानन्दरूपं तं, श्रीसर्वज्ञं स्तुवे मुदा ॥१॥
प्रातिहार्यश्रिया वाणी–गुणैश्चातिशयोच्चयैः ।
योऽनन्तज्ञानऋद्ध्या च, त्रैलोक्यस्योपकारकः ॥२॥
शाश्वतं मङ्गलं नित्य–सुखं तं विश्वदैवतम् ।
त्रिलोक्याः शरणं त्राणं, नाथमेकं जिनं भजे ॥३॥ युग्मम् ।
यस्य नेतुः पदाम्भोज-पूजयाऽभीष्टसम्पदः ।
जायन्ते सर्वतोऽम्भोद-वृष्ट्येव भुवि विरुधः ॥४॥

"Aho Shrut Gyanam"

मम देवाधिदेवोऽयं, प्रभुरेको भवे भवे ।
भूयादेयाच्च कल्याण-मचिराच्छाश्वतं परम् ॥९॥

इति मङ्गलशब्दार्थस्तवः ।

## अथ सकलजिनस्तवनम् ५ ( वैतालीयम् )

त्रिजगत्प्रभुताप्रतिष्ठितं, सकलान्तर्द्विषतां जयश्रिया ।
भुवनोपकृतिक्षमं स्फुरत्सदनन्तातिशयं जिनं स्तुवे ॥१॥
सततं विषयानुचिन्तना-चितदुष्कर्ममलाऽऽविलं मनः ।
मम नाथ ! तव स्तवामृत-ह्रदमग्नं विशदीभवत्वदः ॥२॥
तपसा विविधेन योगतः परमाच्चापि यदर्थ्यते बुधैः ।
तदनन्तचतुष्टयात्मकं परमं ब्रह्म तव स्तुतेर्वशम् ॥३॥
मदनाद्यरिशल्यनिर्गमे, त्वदयस्कान्तनिभानुचिन्तनात् ।
अचिरान्मम विन्दतां सुखा-द्वयमात्मा तव शार्वत्रिकाम् ॥४॥
शरणं भुवनार्थितप्रदः, परमैश्वर्यमयस्त्वमेव मे ।
कलुषोऽस्मि यदीश ! दुष्कृतै-स्तदपि प्रापय मां निजां श्रियम् ॥५॥

इति सकलजिनस्तवनम्

## अथ श्रीयुगादिदेवस्तवनम् ६ (स्वागता)

श्रेयसां पद ! जिनेन्द्र ! जय श्री-नाभिनन्दन ! जगत्त्रयवन्द्यो ! ।
भव्यलोचनसुधारसवर्षिन् , हर्षतः स्तुत ! नरेशसुरेशैः ॥१॥
संस्तुतिस्तव विभो ! नृपताद्याः, सम्पदो वितनुते कियदेतत् ? ।
तां त्रिलोकविभुतामपि दत्ते, याऽनुभूतिविषयो हि तवैव ॥२॥
एकशोऽपि जिन ! यत्र पुष्करा-वर्त्तवृष्टय इवाभवंस्तव ।
सुप्रसादमधुरा दृशो भवेत् , तत्र शस्यकमलोद्भवश्चिरम् ॥३॥
संस्थिते त्वयि हृदीश ! नराणां, दूरमेव विपदः खलु यान्ति ।
किं हि तिष्ठति सुते विनतायाः, मन्दिरे फणभृतो विलसन्ति ? ॥४॥

"Aho Shrut Gyanam"

त्वं पिताऽथ जननीगुरुरेक-स्त्वं प्रभुर्मम तथा जगतोऽपि ।
त्वां ततः शरणमेकमुपेतः, किञ्चिदस्मि भगवन्नभिवाञ्छन् ॥५॥
ज्ञानदर्शनचरित्रसमृद्धिः, प्राग् न मेऽस्ति विशदा सति चैवम् ।
यो भवेत् तव मतः सदुपाय-स्तेन मां शिवरमां नय नाथ ! ॥६॥

इति युगादिदेवस्तवनम्

## अथ श्रीयुगादिदेवस्तवनम् ७

( उपजातिः ) :

जयश्रियामेकपदं यदीयं, बभूव राज्यं जगतां सुखाय ।
विमुक्तये च व्रतकेवलश्रीः, श्रीमद्युगादीशमिमं स्तवीमि ॥१॥
हितानि कुर्वन् पितरत्यनिन्दितो, य एव धर्मो जगतामपि स्फुटम् ।
सूतेरमुष्यापि च यः पितामहो, मतः पुराणं पुरुषं स्मरामि तं ॥२॥
यतः स्म सर्वाः प्रभवन्ति नीतयो, जनानुगा मुक्तिपथानुगा अपि ।
घनाघनौघादिव सर्वतो लता-स्तमादिमं देवमुपास्महे विभुम् ॥३॥
गृहीतिनां कर्मसु न स्फुटेष्वपि, स्वभावशुद्धाऽऽर्जवभक्तिशालिनाम् ।
बभूव शास्ता वृषभप्रभुः पुरा, येषां स्तुमस्तानपि युग्मिनो जनान् ॥४॥
अयं विवर्त्तोऽस्ति यदेकहेतुकः, शरीरिणां क्लेशविचित्रतामयः ।
निरस्य यो मोहतमस्तदप्यगात्, पदं परं तं वृषभप्रभुं भजे ॥५॥
उपाधिजान् यः प्रविधूय विप्लवान् , सदोदितब्रह्मतनुःसुयोगिनाम् ।
निरिन्धनो वह्निरिवावभासते, निरञ्जनं तं पुरुषं स्मराम्यहम् ॥६॥
प्रभुः प्रजानां प्रथमं जिजीविषू-र्नियोजयन् कर्मसु ता बभूव यः ।
क्रमात् प्रबुद्धः परमार्थदेशना-स्तथैव तेभ्यश्च वियोजयन्नपि ॥७॥
युगादिमं देवमनन्तवेदनं, प्रवर्त्तकं सत्पुरुषार्थसम्पदाम् ।
प्रणौमि तं बोधिपदाप्तयेऽखिल-द्विषो व्यतिक्रम्य जयश्रियेऽपि च ॥८॥

इति युगादिदेवस्तवनम्

"Aho Shrut Gyanam"

## अथ श्रीसीमन्धरस्वामिस्तवनम् ८ (उपजातिः)

जयश्रियाऽढ्यं कनकाभदेहं, सर्वज्ञलक्ष्मीकलकेलिगेहम् ।
सीमन्धरं पूर्वमहाविदेहं, विभूषयन्तं जिनपं स्तुवेऽहम् ॥१॥
रूपं परं सन्ततमङ्गलाली, महत्त्वमुच्चैः परमा यशःश्रीः ।
ततिः सुखानां जिनसम्पदां च, तव प्रसादस्य जनेषु लीला ॥२॥
विलोकसे येन जगत्समग्रं, ज्ञानेन तेनैव जिनाऽसि गम्यः ।
तथापि विश्वोत्तरऋद्धिमान् ये-र्विलोक्यसे नाथ ! त एव धन्याः ॥३॥
भीतो भवक्लेशततेर्भवन्तं, शरण्यमीशं शरणं प्रपद्ये ।
यदर्थयन्ते मुनयः सुयोगै-र्यत्रासि गन्ता नय तत्र तन्माम् ॥४॥
यदर्थितं येन तदेव तस्य, त्वया ददे वत्सरमर्थ्यसे तत् ।
जन्मैव मा दा मम देव ! जन्म, चेत् तत्र यत्रास्यऽविता प्रभुस्त्वम् ॥५॥
इति सीमन्धरस्वामिस्तवनम्

## अथ श्रीवर्द्धमानजिनाष्टकम् ९ (वंशस्थम्)

जयश्रिये कर्ममहारिसन्ततेः, स्तुवन्ति यं विश्वगुरुं सुयोगिनः ।
तदर्थितायाः वशतोऽहमप्यजं, निरञ्जनं वीरजनं स्मरामि तम् ॥१॥
न केवलं नाथ ! स सान्वयाभिधो, बभूव सिद्धार्थधराधवः क्षितौ ।
तवावतारेण जगत्त्रयीजनोऽप्यवाप सिद्धार्थतयैव सम्मदम् ॥२॥
त्वाट्कृ सुताप्त्यै त्रिशलां ततं स्त्रियः, श्रितां स्तुमस्तां किल विश्वदेवताम् ।
बभूवुषी या तव जन्मकर्मणा, सुरेश्वराणामपि संस्तुतेः पदम् ॥३॥
तुल्ये कुरङ्गक्षितिकर्मणि प्रभो !, कथं शिवे ते नरके तु मे गतिः ।
ममाप्यदो देहि जगच्छिवङ्कर!, त्वामर्थयेतेति हरिः किलाङ्कभाक् ॥४॥
भयं हरन्तं भगवन् ! भवोद्भवं, श्रयन्ति ये त्वां शरणं मनस्विनः ।
कत्रीं त्वदीयामचिरादवाप्य ते, जगत्सु वृत्तिं दधते सुपालिनीम् ॥५॥
स्थैर्यतस्त्रिजगतीजयिनो मे, र्नोपमानमिममाहुरिहाऽऽर्याः ।
कम्पयन् सुरगिरिं न्विति तान् योऽबूबुधज्जयति वीरजिनोऽयम् ॥६॥

स्वागता

भवभयहरणं जगच्छरण्यं, शरणमहं तमुपैमि वर्द्धमानम् ।
कलियुगघनदुर्दिनेऽधुनापि, स्फुरयति तत्त्वपथान् यदाऽऽगमार्कः ॥७॥
औपच्छन्दसिकम्

एवमानुत ! भवारिजयश्री-प्राप्तये निरुपधिं मम बोधिम् ।
वर्द्धमानजिन ! देहि यतः स्या-मर्थतस्तव पितुः समनामा ॥८॥ स्वागता

इति वर्द्धमानजिनाष्टकम्

## अथ साहपुरश्रीपार्श्वनाथस्तवनम् १० (वंशस्थम्)

जयश्रियां सङ्गममाप्तुमिच्छवः, स्तुवन्ति यं सर्वसुरेश्वरा अपि ।
जगत्त्रयत्राणकरं तमानुमः, पार्श्वप्रभुं साहपुरे कृतस्थितिम् ॥१॥

यथा निशायां प्रसृतांस्तमोभरान्,
निहन्तुमेवोदयते दिवाकरः ।
दुःखोत्करान् नाथ ! तथोद्गतान् जग-
त्यपासितुं प्रादुरभूस्ततोऽव माम् ॥२॥

वृथैव ताम्यन्ति जनाः समीहया,
सुसम्पदामौपयिकैरनेकशः ।
तासां परं ह्यौपयिकं वशीकृतौ,
त्वन्नाममन्त्रप्रणिधानमेककम् ॥३॥

दुरासदास्ता जगदीह्यमानाः, सुखश्रियः प्राणिषु तावदेव ।
यावन्न लब्धा तव पादसेवा, कल्पद्रुमाप्तौ हि सुदुर्लभं किम् ॥४॥
उपजातिः

भवन्ति ते स्नानजलेन सिक्ता, ग्रस्ता महाऽऽमैरपि दिव्यदेहाः ।
भजन्ति किं सिद्धरसानुभावात्, सुवर्णभावं नहि लोहपिण्डाः ? ॥५॥
त्राताऽमरेन्द्रादिजगत्त्रयस्य, त्राणं कियन् मे लुठतस्तवांह्र्योः ।
धौताद्रिवृन्दस्य कियद् घनस्य, प्रक्षालनं वा सिकताकणस्य ॥६॥
प्रसरन्नभितोऽशिवोच्चयः, प्रहतो यद्भवता किमद्भुतम् ।
अतिवर्षति दुर्द्धरोत्तरो-न्नतवार्दे हि दवाग्रयः कियान् ॥७॥ वैतालीयम्

"Aho Shrut Gyanam"

त्वयि रक्षति केऽप्युपद्रवा, उचितं नाभिभवन्ति यज्जगत् ।
हरिणा हरिणारिपालितं, वनखण्डं किमु भङ्क्तुमीशते ? ॥८॥
एवं जगद्रक्षणे दक्षिण ! स्तुतः, पार्श्वप्रभो ! साहपुरावतंसक ! ।
निरस्य सर्वद्विषतो जयश्रियं, सबोधिमारोग्यपदं च देहि मे ॥९॥
वंशस्थम्

इति साहपुरश्रीपार्श्वनाथस्तवनम्

## अथ चतुर्विंशतिजिनस्तवः ११

जयश्रीदायिनः श्रीमद्—वृषभाजितशम्भवान् ।
अभिनन्दनमानौमि, सुमतिं च जिनाधिपान् ॥१॥ ( अनुष्टुप् )
पद्मप्रभः सुपार्श्वश्चन्द्रप्रभसुविधिशीतलाः श्रेयान् ।
श्रीवासुपूज्यविमलाऽनन्ता धर्मश्च मां पान्तु ॥२॥ (आर्या)
शान्तिः कुन्थुररः श्रीमल्लिर्मुनिसुव्रतो नमिर्नेमी ।
पार्श्वो वीरश्च जिना भवभीरोः सन्तु मे शरणम् ॥३॥
इतिभुवनकल्पतरवो नतसुरराजा नुता मयापि जिनाः ।
शिवपदसम्पदमतुलां, ददतां मम शुद्धबोधिकृते ॥४॥
[ मघवमहामुनिसुन्दरनुतितितिविश्रामभूमिगुणविभवाः ।
इति संस्तुता जिनेन्द्रा ददतां मे शर्म निजमेव ॥५॥

## अथ चतुर्विंशतिजिनस्तवः १२ ( अनुष्टुप् )

जयश्रीसङ्गिनो नौमि, चतुर्विंशतिमर्हतः ।
श्रीयुगादीशमजितं, शम्भवं चाभिनन्दनम् ॥१॥
सुमतिं सुमतिप्राप्त्यै, नौमि पद्मप्रभं प्रभुम् ।
सुपार्श्वं विश्वकल्पद्रुप्रभं चन्द्रप्रभुं तथा ॥२॥ ]
सुविधिं शीतलं सार्वं, श्रेयांसं श्रेयसे भजे ।
वासुपूज्यं च विमलानन्तौ धर्मं च बोधिदान् ॥३॥
श्रीशान्तिं कुन्थुसर्वज्ञं, वन्देऽरं मल्लिसुव्रतौ ।

"Aho Shrut Gyanam"

नमिं नेमिं जिनं पार्श्वं, वर्द्धमानं च बोधये ॥४॥
एवं जिनवरा भक्त्या, कीर्त्तिता वन्दिता मया ।
सम्यग्ज्ञानक्रियाशुद्ध्या, सन्तु मे शिवसम्पदे ॥५॥

## अथ श्रीचतुर्विंशतिविहरमाणशाश्वतजिनस्तवनम् १३ (आर्या)

जयश्रिये भवशत्रोर्नौमि चतुर्विंशतिं जिनाधीशान् ।
ऋषभमजितं च शम्भवमभिनन्दनसुमतिपद्मभान् ॥१॥
वन्दे सुपार्श्वचन्द्रप्रभसुविधीन् शीतलं जगन्नाथम् ।
श्रेयांसवासुपूज्यौ विमलानन्तौ तथा धर्मम् ॥२॥
शान्तिं कुन्थुं चारं मल्लिमुनिसुव्रतौ नमिं नेमिं ।
पार्श्वं वीरं च विभुं नौमि श्रेयःश्रिये सततम् ॥३॥
सीमन्धरं युगन्धरबाहुसुबाहुजिनानिह सुजातं ।
स्तौमि स्वयम्प्रभेशं जिनवरवृषभाननं च सदा ॥४॥
जिनपतिमनन्तवीर्यं सुरप्रभजिनविशालवज्रधरान् ।
चन्द्राननं च सर्वानित्यष्टौ धातकीखण्डे ॥५॥
श्रीचन्द्रबाहुनाथं भुजङ्गजिनमीश्वरं त्रिजगदर्च्यम् ।
नेमिप्रभुतीर्थपतिं श्रीमन्तं वीरसेनं च ॥६॥
तीर्थेशमहाभद्रं देवयशो नाथमजितवीर्यविभुम् ।
प्रणमामि पुष्करार्द्धे विंशतिमिति विहरतः सार्वान् ॥७॥
अथ ऋषभवर्द्धमानौ चन्द्राननवारिषेणौ च ।
शाश्वतजिनांश्च वन्दे ददतु शिवं ते च मे सर्वे ॥८॥
भवभवमहामुनिसुन्दरनुतिततिविश्रामभूमिगुणविभवाः ।
इति संस्तुता जिनेन्द्रा ददतां मम शर्म निजमेव ॥९॥

## अथ मङ्गलस्तोत्रम् १४ शक्षाणां पूर्वं पाठनार्थम्

जयामेरिजिणवरतिहुयण- जणमणवंछिअसुहत्थकप्पतरू ।
सिरिवद्धमाणसामिअ ! हो पहू मम तुमं निच्चं ॥१॥

"Aho Shrut Gyanam"

भविआण थुणिअचरणो सामित्त देसि तिहुअणस्सावि ।
कप्पतरुस्सेविच्छिअदाणे एसो तुह सहावो ॥२॥

सयला हुंति रिद्धी भद्दकरा गहणिमित्तसउणसुरा ।
वड्ढंति नाणदंसणचरणा तुह पयपसाएण ॥३॥

दंसणनाणचरित्ते दाउं जह गोअमाइगणवइणो ।
सिवसुहलच्छीसहिआ विहिआ तह नाह ! कुणसु ममं ॥४॥

इय सुरनरनाहमहामुणिसुंदरसंथवारिहो वीरो ।
सामी कुणउ पसायं नियपयसुहदाणओ अइरा ॥५॥

इति मङ्गलस्तोत्रम् ।

## अथ चतुर्विंशतिजिनमङ्गलस्तवनम् १५ ( आर्या )

सिरिआइजिणं वंदे अजिअजिणं सिरीइ दायारं ।
संभवमभिनंदणमवि सुमइं पउमप्पहं चेवं ॥१॥

वंदामि सिरिसुपासं चंदप्पहसुविहिसीअलजिणे य ।
सिज्जंसवासुपुज्जे विमलमणंतं तहा धम्मं ॥२॥

सिरिसंतिं कुंथुपहुं अरनाहं मल्लिसुव्वयजिणिंदे ।
नमिनेमिपासनाहे वंदे सिरिवद्धमाणं च ॥३॥

इय चउवीसजिणिंदा सुरिंदसंथुअपया भुवणनाहा ।
मम दिंतु नाणदंसणचरित्तगुणसंपयं विउलं ॥४॥

इय सुरनरनाहमहामुणिसुंदरसंथवारिहे सययं ।
जो थुणइ जिणवरिंदे स होइ सासयसुहसमिद्धो ॥५॥

इति चतुर्विंशतिजिनमङ्गलस्तवनम् ।

एतानि सर्वाण्याप्यामूलचूलानि श्रीमुनिसुन्दरसूरिभिः कृतानि चिरं जयन्तु जयश्रीपदलाञ्छितानि ॥

"Aho Shrut Gyanam"

## अथ श्रीजिनमङ्गलस्तवः १६ ( अनुष्टुप् )

आनन्दाद्वैतदातारं, जयश्रीद्धं जगत्पतिम् ।
श्रीजिनं भक्तितः स्तौमि, दिष्टविष्टपमङ्गलम् ॥१॥
तानाऽऽयुश्चिरमारोग्य-मष्टावपि महर्द्धयः ।
इन्द्रश्रीः शिवसम्पच्च, श्रयन्ति त्वां स्तुवन्ति ये ॥२॥
सुराः किङ्करतां यान्ति, मन्त्राः सिद्ध्यन्त्यभीष्टदाः ।
ग्रहाः स्युर्वरदास्तेषां, येषां त्वं हृदि तिष्ठसि ॥३॥
दुःस्वप्नं दुर्निमित्तं वा, दुष्टा भूपाः सुरादयः ।
अनुकूलत्वमेवाशु, त्वन्नतेर्दधतेऽङ्गिनाम् ॥४॥
सर्वे श्रेयोऽर्थिनो विज्ञाः, श्रेयोमूलं च ते स्तुतिः ।
इति त्वां स्तुवतो मेऽर्हन्निष्टश्रेयःप्रदो भव ॥५॥
(स्तुतिमिति तनुते जिनेन्द्र ! यस्ते, मघवमहामुनिसुन्दरस्तुतांह्रेः ।
स भवति गुणसम्पदा समस्ते, फलमिति तद्वितराऽचिरान्ममापि ॥६॥)
इति श्रीजिनमङ्गलस्तवः ॥

## अथ श्रीजिनब्रह्मस्तवः १७ ( अनुष्टुप् )

परानन्दपदायार्हन् भवाऽमित्रजयश्रिया ।
त्वदनन्तगुणाम्भोधौ, रमयामि निजां गिरम् ॥१॥
विकल्पास्पृष्टरूपाय, निर्द्वन्द्वपरमेष्ठिने ।
निरुपाधिपरानन्द-शालिने ते विभो ! नमः ॥२॥
ध्यानेन त्वन्मयीभावं, कथञ्चिद्याति यः सुधीः ।
तत्त्वदैक्यपथेनैव, स महानन्दमश्नुते ॥३॥
तव सम्यक्स्वरूपस्याप्यनुभूत्यक्षमा वयम् ।
कविडम्बरिणोऽनन्तांस्त्वद्गुणान् स्तुवतः स्तुमः ॥४॥
तात ! तत्प्रार्थये देहि, मम काञ्चन तां कलाम् ।
याथात्म्यात्त्वत्स्वरूपस्यैवानुभूतिर्भवेद्यया ॥५॥
इति जिनब्रह्मस्तवः ॥

"Aho Shrut Gyanam"

## अथ श्रीजिनमहिमस्तवः १८ ( द्रुतविलम्बितम् )

शिवपदप्रभुतां दधतं जय-श्रियमवाप्य महाऽऽन्तरविद्विषाम् ।
जिनपतिं भवभीतिविभेदनं, सकलवाञ्छितसिद्धिकरं स्तुवे ॥१॥
त्रिभुवनोपकृतिक्षमवैभवा, जिनपतेऽतिशयादिगुणोच्चयाः ।
इह वदन्ति तवैव शिवश्रियां, वितरणे शतधा स्तवनार्हताम् ॥२॥
किमपि नाथ ! तवाद्भुतमङ्गना-गणवशीकृतिपाटवमीक्ष्यते ।
त्वदभिधाऽपि हि यत्र भवेदिमं, भजति मुक्तिरपीष्टसमृद्धिवत् ॥३॥
तव दृगम्बुजयोरखिला रमा, जिन ! वसन्त्यनुभूतिमियर्त्यदः ।
निपततः खलु ये पुनरेधि मे, प्रविलसन्ति सदापि यदेषु ताः ॥४॥
दृगतिथिस्त्वमभूर्मम शैवलो–ल्बणमहाह्रदवासितिमेरिव ।
जिनशशीव विमोहतमोहृते–र्वितर केवलबोधसुखोदयम् ॥५॥

इति जिनमहिमस्तवः ॥

## अथ श्रीजिनमङ्गलस्तवः १९ ( औपच्छन्दसिकम् )

प्रभुतां शिवसम्पदामवाप्या–न्तरविद्वेषिजयश्रिया कृतार्थम् ।
स्मृतिवन्दनपूजनस्तवेभ्यो, भुवनाभीष्टकरं जिनं स्तवीमि ॥१॥
सुरपादपधेनवः फलं यद्, विविधाराधनतोषिता ददन्ते ।
ददते स्मृतिमात्रमीश ! किञ्चित्, तव नामाप्यवहीलना यतोऽस्मिन् ॥२॥
सकलेप्सितशर्मदानदक्षं, स्पृशति त्वां मनसापि यो मनीषी ।
विपदो न कदापि संस्पृशन्तिस्पृशतोऽर्कं न तमांसि भीतये यत् ॥३॥
तव रूपमनन्तमेव शर्म–त्युदितं योगिवरैर्विभाति चेदम् ।
त्वयि येन हृदैकतां प्रपन्नेऽनुभवः स्यात्किल तस्य भक्तिभाजाम् ॥४॥
अखिलं प्रवितर्क्य दैवतौघं, त्वयि देवाऽध्यगमं प्रभुत्वबुद्धिम् ।
इति संस्तुवतः पदौ तव द्वौ, मम देयाः पदमेकमेव तेऽर्हन् ॥५॥

इतिजिनमङ्गलस्तवः ॥

"Aho Shrut Gyanam"

## अथ श्रीजिनमङ्गलस्तवः २० ( अनुष्टुप् )

परं श्रियःपदं प्राप्तं, सकलारिजयश्रिया ।
स्तुवेऽर्हन्तं स्वजन्मादि, सुखाकृतजगत्त्रयम् ॥१॥
संस्पृशत्कृतिनां चेतो, यं शुद्धैकगुणात्मकम् ।
रज्यते नितरां रक्तानप्यन्यांस्तु विरज्यते ॥२॥
केवलं केवलं यस्य, ज्ञातुं महिमवैभवम् ।
क्षेमतेऽक्षमतेर्नैव, विषयस्तत्परं हि यत् ॥३॥
यस्य नेतुः पदाम्भोजं, संस्मरन्तोऽपि भाविनः ।
सर्वापत्तापनिर्मुक्ताः, शीतीभावं भजन्त्यहो ! ॥४॥
जिनः स जगतां नेता, प्रणेता पुण्यसम्पदाम् ।
शरणं शरणं शैव–सुखस्याभीष्टदोऽस्तु मे ॥५॥

इति श्रीजिनमङ्गलस्तवः ।

## अथ श्रीजिनभक्तिस्तवः २१ ( वैतालीयम् )

प्रभुरक्षरशर्मसम्पदं, भगवान् मोहजयश्रियाऽऽप यः ।
भुवनार्थितकल्पपादपं, तमहं स्तौमि जिनं जगद्गुरुम् ॥१॥
जिन ! कल्पितसम्भवे फले, स्पृहया केऽपि परान् स्तुवन्ति चेत् :
स्तवने तव तत् सुनिश्चिता–ऽक्षरशर्मौघफलेऽपि कोऽलसः ? ॥२॥
पशवोऽपि मुदोल्लसन्ति यां, गिरमद्वैतगुणां निशम्य ते ।
हृदयं न तयापि तोष्यते, जिन ! येषां तु न वेद्मि के तु ते ! ॥३॥
जगतामसि पालने प्रभुः, करुणा क्वापि न हीयते च ते ।
जहतो विषयं तयोस्तथाऽप्यधियः क्लेशजुषः कथं भवे ? ॥४॥
तव लाययतां मनः स्तवे, कृतिनां किन्तु तपस्क्रियादिभिः ?।
कनकोद्भवकर्मवेदिनां, धनलाभौपयिकैर्हि किं परैः ! ॥५॥
तव गोचरतां स्तुतेर्गुणा, दधतेऽनन्ततया न कस्यचित् ।
सफलोऽत्र मम श्रमः पुन–र्जनुषः स्वस्य फलेग्रहित्वतः ॥६॥

"Aho Shrut Gyanam"

भगवन् ! प्रमितापि ते स्तुतिः, सकलेष्टार्थविधायिनीति मे ।
कलयन्नसि यां स्वयं कलां, परमानन्दमयीं प्रयच्छताम् ॥७॥

इति जिनभक्तिस्तवः ॥

## अथ श्रीजिनराजभक्तिमङ्गलस्तवः । २२ ( रथोद्धता )

यैर्भवन्ति हृदयस्थितैर्बुधा, मोहराजविजयश्रियां पदम् ।
तान् स्मरामि जिननाथ ! ते गुणान् , कांश्चनाऽर्थितकरस्तवाध्वना ॥१॥

कामधेनुमणिपादपादयो, गौरवा जगति ये प्रतिष्ठिताः ।
त्वत्प्रसादजनितोच्चसम्पदां, तेऽपि भान्ति पशुशार्करोपमाः ॥२॥

यः समृद्धिनिचयोऽत्र चक्रिणो, यो भरोऽपि सुरराजशर्मणाम् ।
भक्तिरागनृपतेस्तव प्रभो !, तौ सदापि भजतो भुजिष्यताम् ॥३॥

चेद्भवन्ति तव सन्निधानतोऽ-चेतनेष्वपि फलर्द्धयो द्रुषु ।
उल्लसन्ति भुवनोत्तराः श्रियः, सेवकेष्वपि किमद्भुतं ततः ? ॥४॥

सन्ति यद्यपि महोदयश्रियां, साधका अपि तपोजपादयः ।
भक्तिरेव विभुतां तु तेऽश्नुते, तेष्वबादिषु सुबीजवत् कृषेः ॥५॥

विश्वरक्षणचणस्य तेन ते, संश्रितोऽस्मि शरणं पदद्वयम् ।
यत्पदं भवभियः स्पृशन्ति नो, देहि नाथ ! तदनन्तशर्म मे ॥६॥

इति जिनराजभक्तिमङ्गलस्तवः ।

## अथ श्रीमङ्गलशब्दस्तवः । २३ ( द्रुतविलम्बितम् )

त्रिभुवनाधिप ! मोहजयश्रिया, परमसौख्यमनन्तमुपेयुषः ।
स्तवनतस्तव नाथ ! समीहिताः, शिवरमा विदधेऽद्य करस्थिताः ॥१॥

सकललोकहितानि विधित्सता, व्यरचि यत्समयौपयिकं त्वया ।
भुवननाथ ! तवैव सुनाथतां, सहृदयस्तत एव न वेद कः ? ॥२॥

"Aho Shrut Gyanam"

भुवनपालक ! केवलसंविदा, कलयताऽप्यखिलार्थगणं त्वया ।
किमहकं कलितो न सुदुःखितो, मदवने भविता किमथ क्रमः ? ॥३॥
सममशेषविदो न भिदादिमा, क्रमजुषं जिन ! मामव तद्भवात् ।
न करुणा तव विष्टपगोचरा, सुगुणवद्विगुणेऽपि हि हीयते ॥४॥
भुवि यथोपकृतो रविशीतरुग्–जलधरा गुणदोषदृशो न वै ।
त्वमसि नाथ ! तथाऽऽश्रितपालने, भवभयादियतैव धृतिर्मम ॥५॥
समधिगम्य विशेषमशेषतः, शरणमेष भवन्तमथाऽऽगमम् ।
इति मयाऽऽर्त्तिभृतोचितमादधे, त्वमथ नाथ ! जिनोचितमाचर ॥६॥

इति मङ्गलशब्दस्तवः ॥

## अथ श्रीशान्तिजिनस्तवनम् । २४ (वंशस्थम् )

जयश्रियं यस्तनुते स्मृतेरपि, प्रणेमुषां कर्मभटारिसङ्कटे ।
स्तवीमि तं शान्तिजिनं जगद्गुरुं, शिवाप्तये टिम्बकनामके पुरे ॥१॥
विवेकवैधुर्यपरिप्लुताशयै–र्न यैः स्तवस्ते भगवन् ! विधीयते ।
विधीयते शर्मसु तैः स्पृहापि किं ?, विना हि बीजं नहि शस्यसम्भवः॥२॥
तव स्तुतिं येऽपि जिनाऽऽहता बुधा, न तैः प्रयत्नः क्रियतां सुखाप्तये ।
अपेक्षते कल्पलता किमुद्यमं, समीहया या ददतेऽर्थिनां फलम् ॥३॥
समग्रशर्माभ्युदयैकहेतवे, भवार्णवोल्लङ्घनसारसेतवे ।
जिनाय तुभ्यं सकृदानताः पुन-र्नमन्ति न त्वामपरं च कञ्चन ॥४॥
फलं विभाव्येत्यलपः परानतौ, नतौ प्रवृत्तस्तव दुर्विधोऽप्यहम् ।
प्रसीद तन्नाथ ! भवाम्यभीष्टभाक्, समो हि सर्वेष्वपि ते कृपारसः ॥५॥
स्तुतिमिति तनुते जिनेन्द्र ! यस्ते, मघवमहामुनिसुन्दरस्तुतांह्रेः ।
स भवति गुणसम्पदा समस्ते, फलमिति तद्वितराऽचिरान्ममापि ॥६॥

इति शान्तिजिनस्तवनम् ॥

"Aho Shrut Gyanam"

## अथ श्रीवीरजिनस्तुतिः । (भुजङ्गदण्डकः) २५

त्रिभुवनविभवीप्सितार्थप्रथाप्रत्यलत्वातिकल्पद्रुमोग्रप्रभावस्फुरत्-सौरभाद्यक्रमाम्भोजरोलम्बलीलावलम्ब्युल्लसद्भक्तिसंनम्रनाकाधिराट्, नरपतिततिमौलिसन्मौलिभास्वत्प्रभाजालविद्योतितोपान्तदेशस्त्वमर्हंस्त्रिलोकैकबन्धो ! धराधीशसिद्धार्थवंशाग्रभूषामणे ! वर्द्धमानप्रभो ! ।

कुवलयवनकोकिलश्यामलागाधमोहान्धकारप्रकारापहारार्कबिम्बोपमापारकारुण्यपाथोनिधे ! धामधाम्नां विधेहि प्रसद्याऽऽशु मे बिभ्रतः, सुकरुणरसगोचरत्वं चिरं भीष्मसंसारकान्तारवासोद्भवैर्दुःखपुरैः श्रितस्याधुना पादयुग्मं त्वदीयं कथञ्चित् पुराणैरगण्यैः शिवम् ॥१॥

वितरतु मम निर्वृतेः शर्म सा सन्ततिस्तीर्थराजां विचक्रे सुपर्वेश्वरैर्देशनासद्मयस्यास्तदेकश्रिया भ्राजितं भामराभ्रंलिहादभ्रवप्रत्रयी, परिगतमुरुकिन्नरस्त्रीसमारब्धगीतप्रतिश्रुन्निनादौघवाचालिताऽऽशान्तरालं प्रमोदात् प्रनृत्यत्सुरालीकमाघातसङ्क्षुब्धगोत्राचलम् ।

त्रिदशततिभिराहतोद्दामवादित्रचक्रोद्गतैर्यत्र कोलाहलैः स्फातिमुर्वीश्रितैर्नाकिनाथोच्छ्रितोद्यत्पताकावलीनद्धसत्किङ्किणीनिक्वणैः सङ्गतैः, तरलिततरतारमीयुस्तुरङ्गाः किलाहर्मणेर्यानयुग्यास्तथा त्रासमत्यद्भुतं नैव कुत्राप्यवस्थानमेकत्र सम्प्राप्नुवुस्ते यथाद्यापित्रस्ता इव ॥२॥

भवतु भवभिदे ममानन्तसङ्ख्यार्थवाच्याक्षरालीजलागाधमध्ये जिनेन्द्रूक्तसिद्धान्तपाथोनिधिर्नीवरैरप्यगम्यस्तनूत्मकूपोल्लासिवेलाकुलो, बहुविधनयभङ्गकाप्रत्नरत्नोत्करभ्राजितोऽप्राप्तपारः सुपाठीनमालाभिरप्युल्लसद्धेतुरङ्गत्तरङ्गावलीमालितः प्राज्ययुक्तिप्रथाशुक्तिभृत् ।

पृथुचतुरनुयोगदीव्यत्तटःस्पष्टदृष्टान्तमुक्ताकलापाञ्चितान्तः प्रदेशो मुनीन्द्रादिसद्वृत्तिसम्पत्तिमिश्रेणिभिः, सङ्कुलः श्रीनिवासो गभीरत्वभू-

"Aho Shrut Gyanam"

विबुधजनमनो मुदुल्लासनप्रत्यलप्रेङ्खवदिद्ध प्रमाणौघकेलीमहाभूमिभृद्धो-
रणीबन्धुरः सूक्तसन्दोहभास्वत्प्रवालालयो देवताधिष्ठितः ॥३॥

अपहर भयमञ्जसा सम्भृतस्य भ्रमोद्रेकरूपेण संसारपाथोनिधेर्वीतरागोक्त-
सिद्धान्तबोधप्रशायानपात्रप्रदानेन वाग्देवि !, विश्वार्चिते !, सुमधुरगतिनिः-
स्वनं हंसमारूढवत्यङ्गिनां त्वं शिवाऽऽकाङ्क्षिणां लोलरोलम्बझंकाररावै-
रिवोद्गीयमानाल्लसत्सौरभं बिभ्रती पुण्डरीकं करे।

सितकरहरहारनीहारशुभ्रप्रभाभासमाने समानेतरोल्लासिभक्त्यानमन्नाकि-
नायाङ्गनाचक्रवालोत्तमाङ्गच्युतोदारसिन्दूररेणूत्करै-ररुणितमभिवारयन्ती
क्रमद्वन्द्वमज्ञानविद्वेषिणि ! क्रोधपूरादिवाशेषविश्वत्रयीबोधिरत्नापहारप्र-
गल्भस्फुरद्विक्रमोद्दण्डदर्पोत्कटे ॥

इति श्रीवीरदण्डकस्तुतिर्भुजङ्गच्छन्दसा श्रीमुनिसुन्दरसूरीणां कृतिरियम् ॥



"Aho Shrut Gyanam"

सहस्रावधानिश्रीमुनिसुन्दरसूरिसत्तमनिर्मिता

# त्रिदशतरङ्गिणी ॥

## श्रीअभिनन्दनजिनस्तोत्ररत्नम् ४

*........चापलम् , त्वया जिनेन्दो ! मनसः समन्ततः ।
ममापि तद्दोषमिमं हरेति यं, कपिर्भजन्नर्थयतेऽङ्कदम्भतः ॥५॥ वंशस्थम्
न नाममात्रेण बभूव सिद्धार्थेति प्रसिद्धा जननी यदीया ।
पुमर्थसीमाऽव्ययशर्मलाभात् , तत्त्वार्थतोऽपि त्ववताज्जिनोऽयम् ॥६॥
उपजातिः
न दैवतानां मितिरत्र वर्त्तते, य एव तु स्तोत्रममीषु चार्हति ।
अभीष्टदानाव्यभिचारनिर्णयात् , तमाभवं श्रीअभिनन्दनं स्तवै ॥७॥ वंश०
महर्षयो यस्य गुणाननेकशो, मुदा स्तुवन्तः समतां ययुः प्रभोः ।
विभिद्य सद्यो ममतां स सर्वतो, ददातु देवो मम तां प्रणेमुषः ॥८॥ वंश०
एवं श्रीअभिनन्दनं जिनपतिं यः संस्तुते कालिका-
यक्षेशाश्रमसेवितांह्रिकमलं कल्याणमालालयम् ।
शक्तालीमुनिसुन्दरस्तुतिततीरर्हन्नदृष्टद्विषो,
जित्वा स्यादचिरात्पदं स सुकृती सर्वेष्टसौख्यश्रियाम् ॥९॥ शार्दूल०

इति श्रीयुगप्र० युगामिन्यां तद्विनेयश्रीमुनिसुन्दरसूरिहृदयहिम० त्रिदशतरङ्गिण्याम् । जयश्यङ्कायां प्रथमे जिनादिस्तोत्ररत्नको० श्रोतसि वर्त्त० ह्रदे चतुर्थश्रीअभिनन्दनजिनस्तोरत्ननामा चतुर्थो मूलतश्च तरङ्ग ॥

## अथ श्रीसुमतिजिनस्तोत्ररत्नम ५ ( वैतालीयम् )

सुमतिस्तनुतां जयश्रियं, मम भावद्विषतो जिगीषतः ।
कुमतानि विहाय यं भजन् , लभते भव्यजनोऽर्थिताः श्रियः ॥१॥

---

* एतदन्तः ग्रन्थस्याऽस्य आदिभागः नोपलभ्यते ।

"Aho Shrut Gyanam"

भुवनाधिप ! मेघजोऽप्यसि, स्तुतिभाजः खलु मेऽघहृद् यतः ।
जनयस्यपि मङ्गलात्मजः, सततं त्वं विपुलं च मङ्गलम् ॥२॥
इति ते स्तवने कथं यते, न ? जडोऽपि स्वधियोऽनुसारतः ।
सुखलभ्यशुभात्मसत्फले, नहि मन्दोऽप्यलसो हि कर्मणि ॥३॥
कलितोऽपि शिवश्रिया प्रभो !, दधसे क्वापि न भैरवाकृतिम् ।
भजसे जिन ! सर्वमङ्गला–श्रितरूपोऽपि सनातनस्थितिम् ॥४॥
शिवसूर्न कुमारतां श्रितो, दधसे क्रौञ्चमथाङ्कसङ्गतम् ।
जिन ! तारकमित्रतां भजन् , जगति स्वामितया श्रुतोऽद्भुतम् ॥५॥ युग्मम्
चरणौ तव बिभ्यतां भवा-च्छरणं यौ जिन ! वज्रिणामपि ।
हृदि तौ मम तिष्ठतां स्थिरा–वियता नाथ ! लभे कृतार्थताम् ॥६॥
यदि ते कुशलाभिलाषुकं, यदिवा क्लेशभयातुरं मनः ।
जनते ! सुमतिं प्रपद्य तज्जिनराजं सुमतिं प्रभुं भज ॥७॥
भगवन् सुमते ! प्रसीद मे, स्वमते देहि मतेः स्थिरां स्थितिम् ।
भवते विमतेर्जयश्रिया, सुखमेषोऽपि जनः शिवस्य यन् ॥८॥
एवं भासुरभक्तितुम्बरुमहाकालीसमासेवितं,
यत्तीर्थाधिपतिं स्तवीति सुमतिं कल्याणमालालयम् ।
शक्रालीमुनिसुन्दरस्तुतिततीरर्हन्नदृष्टद्विषो,
जित्वा स्यादचिरात्पदं स सुकृती सर्वेष्टसौख्यश्रियाम् ॥९॥ शार्दूलवि०
इति०श्रीसुमतिजिनस्तोत्ररत्ननामा पञ्चमो मूलतश्च तरङ्गः ।

## अथ श्रीपद्मप्रभजिनस्तोत्ररत्नम् ६ ( उपजातिः )

जगत्त्रयीजित्वरमोहशत्रु-जयश्रिया प्राप परं पदं यः ।
पद्मप्रभं पद्मदलोपमाक्षं, स्तुवे तमर्हन्तमनन्तपद्मम् ॥१॥
स सान्वयं नाम निजं ततान, धरः पिता ते जिन ! जन्मकाले !
यथेष्टदानैर्धरति स्म सद्यो, दारिद्र्यकूपे निपतज्जगद्यः ॥२॥
मात्रैकसीमानमवाप्य सापि, माता सुसीमा तव सान्वयाऽभूत् ।
जगत्त्रयत्राणविधौ नदीष्णु-मजीजनद्या भुवनोत्तमं त्वम् ॥३॥

"Aho Shrut Gyanam"

शिरस्त्विदं बिभ्रतु वासवाद्याः, सूर्यः करे श्रीः कुरुतां गृहं वा ।
तथापि मुक्तिस्तव सेवयैव-त्यङ्कं मिषत्वां किल सेवतेऽब्जम् ॥४॥
जनुर्जराऽन्तादिभयोर्मिकीर्णे, भवाम्बुराशौ पतितो बिभेमि ।
ततो निजाज्ञातरणिं प्रदाय, प्रसह्य नेतः ! कुरु निर्भयं माम् ॥५॥
दत्से स्वभक्तौ स्थिरचेतसां त्वं, समीहितार्थान् जिनराज ! जाने ।
स्पृहाऽस्ति सौख्येषु न चेतसस्तु, स्थिरत्वमस्यां मम तत् कथं स्याम्? ॥६।
स्वदोषतमो बहुधा विकल्पै-रिति प्रभो ! व्यग्रमनाः स नाऽस्मि ।
कमप्युपायं शरणागतं तत, प्रशाधि मां येन लभेऽर्थिताऽर्थान् ॥७॥
अथवाऽल्पमपि स्तुतोऽर्थिनां, ददसेऽभीप्सितसाधनान्यपि ।
तददृष्टजयश्रियोऽप्यहं, जिन ! मोदे कृतवानिति स्तुतिम् ॥८॥
वैतालीयम्

इत्थं यो महिमाम्बुराशि-कुसुमश्यामानिषेव्यं स्तुते,
श्रीपद्मप्रभतीर्थनाथममलं कल्याणमालालयम् ।
शक्रालीमुनिसुन्दरस्तुतिततीरर्हन्नदृष्टद्विषो,
जित्वा स्यादचिरात्पदं स सुकृती सर्वेष्टसौख्यश्रियाम् ॥९॥
शार्दूल०

इति०श्रीपद्मप्रभजिनस्तोत्ररत्ननामा षष्ठो मूलतश्च तरङ्गः ॥

## अथ श्रीसुपार्श्वजिनस्तोत्ररत्नम् ७ (उपजातिः)

सुपार्श्वनेतर्भगवन् ! जयश्री-महःसुखज्ञानशिवप्रदायिन् ! ।
स मे सहर्षत्रिदशेन्द्रवृन्द-स्तुतक्रमाम्भोरुह ! वाञ्छिताप्त्यै ॥१॥
मातङ्गयक्षः कुशलानि यस्य, पदौ श्रितानां भविनां तनोति ।
शान्ता प्रशान्ति सकलापदां च, भजे सुपार्श्वं त्रिजगत्प्रभुं तम् ॥२॥
बभार पृथ्वीतनयोऽपि यो वपुः, सुवर्णकान्ति प्रभुरार्जवं सदा ।
ज्ञमित्रतां निश्चलतां च खातिगः, सुपार्श्वदेवं तमुपैमि निर्भवम् ॥३॥
प्रभुः प्रतिष्ठात्मजतां श्रितोपि यः, शुभप्रतिष्ठोद्भवकृत् प्रणेमुषाम् ।
स निष्ठितार्थो हृदि निष्ठतान् मम, प्रथिष्ठरत्नत्रयनिष्ठतां ददत् ॥४॥

"Aho Shrut Gyanam"

इमौ जिनस्याखिलमङ्गलावलौ, धत्तः प्रभुत्वं सकलार्थितप्रदौ ।
वदन्तितीवाऽङ्कमिषात तव क्रमौ, निषेवते स्वस्तिक एष बोधिदः ॥५॥
सुखानि सर्वाण्यतिशेरते ध्रुवं, विभो ! गरिम्णा शिवशर्मसम्पदः ।
इमास्त्वदाज्ञैव तनोति चाहता, बुधास्त्वदन्यं कथमाश्रयन्ति तत् ? ॥६॥
असांवृतब्रह्मविवर्त्तवैभवं, विधेयवैधुर्यविवर्जितं तव ।
निरूप्यते यन्मुनिभिर्निरावृति, स्वरूपमिच्छाम्यधिगन्तुमीश ! तत् ॥७॥
वंशस्थम्

अनन्तकालं भ्रमता ततो भवे, मयाऽसि नाथः शरणीकृतोऽधुना ।
सुपार्श्व ! मोहारिजयश्रियोज्ज्वलं, निजस्वरूपादपृथक् कुरुष्व माम् ॥८॥
वंशस्थम्

स्तुतिमिति मतिमांस्तनोति यस्ते,
भुवनविभोऽर्थितदायिनीं सुपार्श्व ! ।
सुरवरमुनिसुन्दरस्तवानां,
स पदमनन्तसुखाढ्योऽचिरात स्यात् ॥९॥
औपच्छन्दसिकम्

इति०श्रीसुपार्श्वजिनस्तोत्ररत्ननामा सप्तमो मूलतश्च तरङ्गः ॥

## अथ श्रीचन्द्रप्रभजिनस्तोत्ररत्नम् ८ (उपजातिः)

वपुस्त्विषा प्राप्य विभोर्ध्रुवं यो, जयश्रियं स्वांह्रियुगस्य नित्यम् ।
चकार तं सेवकमङ्कदम्भा-चन्द्रप्रभं श्रीजिनमेनमीडे ॥१॥
स्वदेहदीप्तिप्रचयेन शुक्ल-ध्यानाह्वयज्योतिष आन्तरस्य ।
यो वर्णिकां दर्शयते प्रबुद्धा-स्तदेव देयात् स जिनोऽष्टमो मे ॥२॥
पीतोऽस्मि गर्भाऽवतरेऽस्य मात्र-स्त्वयोऽपि मां मा स्म पिबत् कदाचित् ।
इतीव भीत्यांऽह्रियुगं यदीयं, विधुर्भजत्येष जिनोऽवतान्माम् ॥३॥
नित्यं यदंह्रिद्वयसेवयाऽऽप्त-पुण्येन मन्ये सततं सितांशुः ।
वक्रोऽपि मौलौ ध्रियते हरेण, स चन्द्रलक्ष्मा क्षिपतादघं मे ॥४॥

"Aho Shrut Gyanam"

सेव्योऽपि नाथः सततं भृकुट्या, नादर्शयद्यो भृकुटिं कदाचित् ।
एकेन नित्यं विजयेन युक्तोऽप्यनन्तसङ्ख्यान् विजयाँश्च दत्ते ॥५॥
स लक्ष्मणायास्तनयो नयेन, कुतीर्थिकानां प्रहरन् मदौघान् !
शिवश्रिये श्रीमहसेनवंश-रवि*छविद्योतितदिङ्मुखोऽस्तु ॥६॥
धत्ते पदं यो गिरिशस्य मौलौ, नेत्रे हरेर्वोदितमात्रपूज्यः ।
मुक्तेः प्रदाता द्युसदां स चन्द्रो, यस्यांह्रिभाग् वक्ति जगत्प्रभुत्वम् ॥७॥
स तीर्थनेता विनुतो मयाऽपि, चन्द्रप्रभो वासववृन्दवन्द्यः ।
देयादमेयं मम निर्गुणास्या-प्यपारकारुण्यनिधिः सुखौघम् ॥८॥

स्तुतिमिति मतिमाँस्तनोति यस्ते,
भुवनविभोऽष्टमतीर्थनाथ ! सम्यग् ।
सुरवरमुनिसुन्दरस्तवानां,
स पदमनन्तसुखाढ्योऽचिरात् स्यात् ॥९॥ औपच्छन्दसिकम्

इति श्रीचन्द्रप्रभजिनस्तोत्ररत्ननामाष्टमो मूलतश्च तरङ्गः ॥

## अथ श्रीसुविधिजिनस्तोत्ररत्नम् ९ (वैतालीयम्)

यदि वाञ्छथ शर्म शाश्वतं, जनताः कर्मजयश्रियोज्ज्वलम् ।
स्तुत तत् सुविधिं जिनं यतः, सदुपायः सदुपेयसिद्धये ॥१॥
सुविधे ! सततं प्रमत्तता-कलुषत्वेऽपि शिवाभिलाषिणि ।
करुणा क्रियतां तथा मयी-हितमेषोऽप्यचिराल्लभे यथा ॥२॥
जननीं तव तां प्रणौम्यहं, जिन ! रामेत्यभिरामनामिकाम् ।
त्वयि गर्भगतेऽपि ते गुणा-नभजद्या सुविधिक्रियादिकान् ॥३॥
त्वयि भक्ततया सुतारका, जिनराजाऽजितयक्षराडपि ।
तव शासनभासनोद्यतौ, परिपातः सततं त्वदाश्रितान् ॥४॥
मकराङ्कित ! सेवते ध्वजा-नुमितोऽनङ्गभटः पदौ नु ते ।
भवघातनशक्तिवाञ्छया, विनिहन्तुं निजवैरिणं भवम् ॥५॥
अतिथिः स्वमनोगृहे चिरं, जिन ! सुग्रीवज ! यैर्निबध्यसे ।
कुरुषे गतबन्धनानिमाँश्चरितं तेन शर्मिस्तवाद्भुतम् ॥६॥

"Aho Shrut Gyanam"

यदचिन्त्यमनन्तमव्ययं, परमैर्योगिभिरर्थ्यते सुखम् ।
जिन ! यत्र तदेव वेतनं, करवै तत् खलु दास्यमेव ते ॥७॥
न भवारिजयश्रियः परं, फलमीहेत कृती तव स्तवात् ।
इयमेव तव प्रसादतो, भवतात् तात ! ममाचिरेण तत् ॥८॥
स्तुतिमिति मतिमाँस्तनोति यस्ते, सुविधिविभोऽखिलवाञ्छितार्थदात्रीम् ।
सुरवरमुनिसुन्दरस्तवानां, स पदमनन्तसुखाद्वयोऽचिरात् स्यात् ॥९॥
औप०

इति० श्रीसुविधिजिनस्तोत्ररत्ननाभा नवमो मूलतश्च तरङ्गः ॥

## अथ श्रीशीतलजिनस्तोत्ररत्नम् १० ( रथोद्धता )

शीतलोऽपि हिमवद् भवद्विषो, मोहकक्षमदहज्जयश्रिये ।
यः शिवाध्वसुगमीकृतीच्छया, तं स्तुवे जिनवरं जगद्गुरुम् ॥१॥
केवलं दृढरथः पिता न ते, निर्वृतिपुरे स्वमेयुषाम् ।
ज्ञानदर्शनचरित्रवर्णना—प्रापणे दृढरथस्त्वमप्यसि ॥२॥
नन्दया यदि विभो ! तवाम्बया, गर्भगे त्वयि पितुः क्षतः क्षणात् ।
गाढदाहदहनस्त्वया ततो, दुःखदाहदहने किमद्भुतम् ? ॥३॥
यक्षिणी तरुवरश्च सेवया, प्राप केवलमशोकतां न ते ।
उद्भवां हतिविहारदेशना-दर्शनैस्त्रिजगतीजनोऽपि तु ॥४॥
ब्रह्मयक्षपरिषेवितक्रमं, शीतलं त्रिजगतीसुरद्रुमम् ।
संस्मरन्नपि जनोऽश्नुतेऽर्थितं, क्लिश्यते किमु ततः क्रियान्तरे ? ॥५॥
शीतलेशपदपङ्कजं हृदि, स्थापयन्नमलभक्तितो जनः ।
कृत्रिमेतरविपद्गणोद्भवं, सर्वतापनिचयं नयेत् क्षयम् ॥६॥
शिश्रियुर्विविधदेवतान्तरा—णीश ! येऽपि शिवसम्पदिच्छया ।
तैरपि त्वमधिपः श्रयिष्यते, नापरोऽस्ति हि शिवार्थिनां पथः ॥७॥
श्रीवत्सलाञ्छनजिनेश ! जगन्नमस्य !;
स्तोत्रस्य कोपि महिमा तव सोऽस्त्यऽचिन्त्यः ।

"Aho Shrut Gyanam"

यत्सम्भवं फलमशेषफलातिशायि,

स्यात्तद् व्यथामिमामितीदृशमस्तु तन्मे ॥८॥ वसन्ततिलका

स्तुतिमिति मतिमाँस्तनोति यस्ते, जिनवर! शीतलनाथ! विश्वतायिन्!
सुरवरमुनिसुन्दरस्तवानां, स पदमनन्तसुखाढ्योऽचिरात् स्यात् ॥९॥ औप०

इति० श्रीशीतलजिनस्तोत्रनामा दशमो मूलतश्च तरङ्गः ॥

## अथ श्रीश्रेयांसजिनस्तोत्ररत्नम् ११ ( उपजातिः )

श्रेयांसनेतुः स्तवनेन मोह–जयश्रियं हस्तगतां विदध्याम् ।
त्रिलोकजैत्रौजसि मोहशत्रौ, जिते हि जेयं नहि किञ्चिदस्ति ॥१॥
माता पिता वा तव विष्णुरस्तु, श्लाघापदं यन्नुतिरर्थिताप्त्यै ।
देवान्तरं तद्गुणमुक्तमन्येन्यं, विष्ण्वन्तरं नाथ! खपुष्पतुल्यम् ॥२॥
श्रेयांसभक्त्या मनुजं कृतार्थं, स्तवीमि यक्षेष्वहमीश्वरं वा ।
सा मानवी कस्य न माननीया?, श्रेयोऽर्थिनी श्रेयसि याऽतिभक्ता॥३॥
आजन्महिंस्रा अपि सेवया ते, पापैर्विमुक्ताः पशवोऽपि हि स्युः ।
एवं निबुध्येव तवांह्रिपीठं, निषेवते चिह्नमिषेण खड्गी ॥४॥*
त्वत्पादसंस्पर्शपवित्रितानि, रसायनाभानि रजांस्यपीश! ।
वन्द्यानि शक्रोपमऋद्धयोपि, त्वदंह्रिसेवाविमुखास्तु निन्द्याः ॥६॥
संसारनैर्गुण्यमपीन्द्रियाणां, दुरन्ततां वेद्मि जिनागमात्ते ।
ठकैः प्रमादैर्वशतां तु तेषां, नीये तदेतान् हर नाथ! मेऽरीन् ॥७॥
इति स्तुतस्तीर्थपतिर्मयाऽपि, श्रेयांसनामा पुरुहूतपूज्यः ।
भीतं द्विधा वैरिगणात् प्रसह्य, क्रियात् सदा निर्भयशर्मकर्म ॥८॥
स्तुतिमिति मतिमांस्तनोति यस्ते, भुवनविभोऽखिलवाञ्छितार्थदात्रीम् ।
सुरवरमुनिसुन्दरस्तवानां, स पदमनन्तसुखाढ्योऽचिरात् स्यात् ॥९॥
औप०

इति० एकादशश्रीश्रेयांसजिनस्तोत्ररत्ननामा एकादशो मूलतश्च तरङ्गः ।

---

* इतःपरं पञ्चमं काव्यं नोपलभ्यते ।

"Aho Shrut Gyanam"

## अथ श्रीवासुपूज्यजिनस्तोत्ररत्नम् १२ ( रथोद्धता )

सर्वदैत्यविजयश्रियोज्ज्वलो, यं मरुत्पतिरभीक्ष्णमार्चयन् ।
सर्वकालमतिभक्तितः प्रभुं, तं स्तवीमि वसुपूज्यभूपजम् ॥१॥
नो गुणैश्च न च रूपसम्पदा, वर्त्तते त्रिभुवने तवोपमा ।
नो मणीभिरथवा महत्त्वतः, सागरस्य हि समो जलाशयः ॥२॥
अर्जितं चिरकृतान्तसेवया, पातकं क्षपयितुं तु सैरिभः ।
सर्वपापहरमीश ! ते श्रित स्तीर्थमंह्रियुगमङ्कदम्भतः ॥३॥
श्रीजयाङ्गज ! कुमारसेवितं, चण्डया सततमर्चितं तव ।
योऽङ्ह्रिपद्मयुगलं निषेवते, तं जगत्त्रयमिदं निषेवते ॥४॥
भीरु भीमविषयद्विषां गणान्न त्यजेच्चपलतां च मे मनः ।
तत्तथा निजगुणैर्नियन्त्र्यता-मेतदीश ! भवति स्थिरं यथा ॥५॥
रोषतोषरहितोऽसि चेत्तथाप्यर्थ्यसेऽभिरुचितं तनोषि च ।
ईदृशोऽपि हि सुरद्रुमोऽर्थितः प्रार्थितं प्रददतेऽर्थिनां फलम् ॥६॥
वासुपूज्य ! विहरन् यथा भुवि, त्वं हरस्यसुमतामुपद्रवान् ।
ध्यानशक्तिवशतो हृदि स्थितो, विद्विषो मम हराऽऽन्तरांस्तथा ॥७॥
त्वां निरीक्ष्य बहुतर्कलोचनै-र्दैवतेषु परमं फलप्रदम् ।
एवमस्तवमशेषविद्विषा-मर्थये त्वविषयं पदं प्रभो ! ॥८॥
स्तुतिमितिमतिमाँस्तनोति यस्ते, भुवनविभो ! जिनराज! वासुपूज्य !।
सुरवरमुनिसुन्दरस्तवानां, स पदमनन्तसुखाढ्योऽचिरात् स्यात् ॥९॥ औप०

इति० द्वादशश्रीवासुपूज्यजिनस्तोत्ररत्ननामा द्वादशो मूलतश्च तरङ्गः॥

## अथ श्रीविमलजिनस्तोत्रम् १३ ( द्रुतविलम्बितम् )

विमलबोधमवाप्य जयश्रिया, विषममोहरिपोः स्ववचोऽम्बुदैः ।
वृजिनपङ्कहृतेर्विमलीकृता-ऽऽश्रितकुलं विमलं जिनमाश्रये ॥१॥
यदि भयं भवतां भवतान्तितो, भजत तत् कृतवर्मनृपाङ्गजम् ।
तदपहारविधौ हि बुधा मुधा, भवगतापरदैवतसंश्रयः ॥२॥

"Aho Shrut Gyanam"

विषयमोहगुणाद्यनुचिन्तना-चितमलं जलवज्जिन ! मे मनः ।
विमलतां नय हे विमलप्रभो !, निजगुणोत्करकातकचूर्णतः ॥३॥
विमलिताः किल गर्भनिवासिना, स्वजननीमतिदेहगुणास्त्वया ।
विमलितं च जगत् जिन ! केवलो-दयजुषा किमु मां तदुपेक्षसे ? ॥४॥
परकुतर्कगणा भ्रमयन्ति ये, सुखततेः स्पृहयालुनया जगत् ।
तव मते रमयन्ति मनस्विनो, जिन ! त एव विचारितगोचराः ॥५॥
विषयगृध्नुवचोऽनुगचेतस-स्त्वदुदिते न रतिं दधते जनाः ।
तदिह शूकरलाञ्छन ! नाद्भुतं, अहति किं न सरोऽशुचिपा द्विकाः? ॥६॥
पदजुषस्तव षण्मुखयक्षराड्, जिन ! सुखाकुरुते विजयाऽपि च ।
तदिदमीयगुणानुगमीश ! मा-मपि सुखाकुरुतामभितोऽपि तौ ॥७॥
चिरमनन्तभवभ्रमणार्दित-स्तव पदौ शरणं समुपागमम् ।
विमलनाथ ! तथा कुरु मां यथा, जिन ! भवाम्यचलामितशर्मभाक्॥८॥
श्यामापि माता विमलीकृता स्वा-ऽवस्थानतो येन जिनेन गर्भे ।
हृदि स्थितोऽयं विमलोऽघपङ्क-हृतेर्दयाब्धिर्विमलीक्रियान् माम् ॥९॥

स्तुतिमिति मतिमाँस्तनोति यस्ते,
विमलविभोऽखिलवाञ्छितार्थदात्रीम् ।
सुरवरमुनिसुन्दरस्तवानां,
स पदमनन्तसुखाद्ग्रयोऽचिरात् स्यात् ॥१०॥ औप०

इति० त्रयोदशश्रीविमलनाथस्तोत्ररत्ननामा त्रयोदशो मूलतश्च तरङ्गः ॥

## अथ श्रीअनन्तजिनस्तोत्ररत्नम् १४ ( उपजातिः )

अनन्तसम्पत्प्रभवः स्तुतः स्या-दनन्तसंसारजयश्रिया यः ।
अनन्तगौरामितकान्तकीर्त्ति-मनन्तमर्हन्तमहं स्तुवे तम् ॥१॥
तवावतारस्य विभो ! महिम्ना, कथं न माता सुयशा भवेत् सा ? ।
गीतं सुरेन्द्रैरपि देव ! यस्या, मुदा यशः पूरितदिग्वितानम् ॥२॥
तव प्रभावाज्जनकस्य सेनां, सिंहोपमां शत्रुगणो ददर्श ।
मृगोपमं स्वं तु रणेषु मेने, स सिंहसेनः प्रथितस्ततोऽभूत् ॥३॥

"Aho Shrut Gyanam"

पातालयक्षप्रभुणाऽङ्कुशाह्व–देव्या च ते रक्षितभक्तराशेः ।
सेवेत सर्वाघहरं तु तीर्थं, श्येनोऽङ्कमिट् पादयुगं स्वशुद्ध्यै ॥४॥
भ्रमन्ननन्तेषु भवेषु वैरि–पराभवैरेव भृतोऽस्मि देव ! ।
प्रभुस्त्रिलोक्या अपि रक्षणेऽसि, स्वमाश्रितं तत् किमुपेक्षसे माम् ?॥५॥
जगत्सतत्त्वानि विचार्य लेभे, दुःखक्षयायौपयिकं मयैकम् ।
त्वय्येव नाथत्वधियो निवेश–स्ततोऽपि नाद्यापि कथं सुखी स्याम् ? ॥६॥
आशक्रकीटं विविधोच्चनीच–भवोद्भवान्तादिकदर्थनासु ।
पराक्रमो यस्य समो विमोह–रिपोस्त्वमेवाऽस्य जिनाऽसि जेता ॥७॥
ततो भियाऽस्माच्छरणं श्रितोऽस्मि, पदौ तवैवाहमनन्तनेतः ! ।
अतस्तथा द्राक् कुरु निर्भयं मां, यथा परानन्दनमयः सदा स्याम् ॥८॥

स्तुतिमिति मतिमाँस्तनोति यस्ते–
ऽखिलरिपुजैत्रगुणामनन्तनेतः ! ।
सुरवरमुनिसुन्दरस्तवानां,
स पदमनन्तसुखाद्वयोऽचिरात् स्यात् ॥९॥ औप०

इति० चतुर्दश श्री : अनन्तजिनस्तोत्ररत्ननामा चतुर्दशो मूलतश्च तरङ्गः॥

## अथ श्रीधर्मजिनस्तोत्ररत्नम् १५ (शालिनी)

स श्रीधर्म ! त्वं जय श्रीजिनेन्दो !, श्रेयः सर्वं संस्तुतिर्यस्य दत्ते ।
तस्मादेतां कुर्वते सर्वशक्त्या, देवेन्द्राद्या योगिनश्चाप्यशेषाः ॥१॥
पास्येवाऽन्ताद्यापदो नाथ ! विश्वं, नीलं वासः क्रूरतां मन्दतां वा ।
स्वभ्रान्तिं वा नैव धत्से कदाचित्, ख्यातश्चित्रं भानुसूनुस्तथापि ॥२॥
भक्तिं धत्ते यः सुते सुव्रताया–स्तस्मिन् भक्ता स्यात्त्रिलोक्यप्यजस्रम् ।
द्वेषं तस्मिन् यश्च कुर्यात्कदापि, द्विष्टाः सर्वाः सम्पदोऽस्मिन् सदापि ॥३॥
कन्दर्पार्च्यं किन्नरोपासनीयं, विश्वेशं योऽन्यानुवृत्त्यादिनाऽपि ।
श्रीमद्धर्मं वन्दते वन्दते तं, मर्त्यामर्त्याधीश्वराली क्रमेण ॥४॥
मन्ये विश्वप्राणिनां संश्रितानां, दुर्निर्भेदाद्दष्टभूभृद्गणानाम् ।
भेदार्थं यो वज्रमङ्कच्छलेना–जस्रं धत्ते धर्मनाथं श्रये तम् ॥५॥

"Aho Shrut Gyanam"

मार्हस्तेषां विश्वजैत्रोर्जितेभ्यो, रागादिभ्यश्चेतसां भीर्द्विषद्भ्यः ।
त्वत्सिद्धान्तप्रौढदुर्गस्य मध्ये, नावस्थानं यानि जातु त्यजन्ति ॥६॥
किं वाच्योऽयं कर्मणां ही विपाकः, केचिद्यस्मात्सत्यपि त्वय्यधीशे ।
संसाराब्धेर्भीरवोपि श्रयन्ते, मोहादीनां धाम देवान्तराणि ॥७॥
यस्य स्तोत्रे स्यात् समीहाऽप्यनन्त–श्रेयःप्राप्त्यै किं पुनर्व्यावृतत्वम् ।
स श्रीधर्मः शत्रुभीतिप्रशान्त्या, तन्यान् नाथः शाश्वतं मे प्रमोदम् ॥८॥

स्तुतिमिति मतिमाँस्तनोति यस्ते,
त्रिभुवनपालक ! धर्मतीर्थनेतः ! ।
सुरवरमुनिसुन्दरस्तवानां,
स पदमनन्तसुखाढ्योऽचिरात् स्यात् ॥९॥ औप०

इति० पञ्चदशश्रीधर्मजिनस्तोत्ररत्ननामा पञ्चदशो मूलतश्च तरङ्गः ॥

## अथ श्रीशान्तिजिनस्तोत्ररत्नम् १६ (उपजातिः)

जयश्रिया भारतभूपतीनां, यः पञ्चमश्चक्रभृतां बभूव ।
मोहाद्यरीणामथ षोडशोऽर्हन्, शान्तिं तमीडे जिनमार्त्तिशान्त्यै ॥१॥
निर्वाण्युपास्यं गरुडार्चनीयं, श्रीविश्वसेनोरुकुलाम्बरार्कम् ।
भजन्ति ये श्रीअचिराङ्गजं तान्, सुरेशितारोऽप्यचिराद्भजन्ते ॥२॥
निजाभिधोच्चारकृतोऽखिलार्त्ति–शान्तिं वितन्वन् ध्वनिवस्तुनोर्यः ।
तादात्म्यमावेदयते प्रशान्तिं, स शान्तिनेता नयतादरं मे ॥३॥
प्रमाथशक्तिं तमसो निजारे-र्मार्गन् मृगाङ्कोऽनुमितः स्वचिह्नात् ।
निषेवते यं किल सर्वभीतीः, स मे निहन्यान्मृगलाञ्छनोऽर्हन् ॥४॥
अदा जगद्यो जननादिभिः स्वैः, शान्ते ! सुरङ्ग किमहं कुरङ्गः? ।
सुरङ्गता मेऽस्त्विति यं मृगोऽङ्क–निभान्नु विज्ञाय यते ! भजे तम्॥५॥
विभोः सुधातोऽभ्यधिकां विभावयन्; मृगो नु जन्मान्तजरादिनाशनात् ।
वचःसुधां यस्य पिपासुरङ्कतां, भजत्ययं शान्तिजिनः शिवाय मे ॥६॥
स्मरापहारी न भवाश्रयः सदो-दिताक्षरश्रीर्गतजाड्यगोततिः ।
कुरङ्गदोषोज्झनकृत्तमोऽर्दयन् , जिनोऽवतान्मां मृगलक्षणो नवः ॥७॥

"Aho Shrut Gyanam"

विपत्तृणानां दहने प्रगल्भते, लवोऽपि वह्नेरिव यस्य संस्तुतेः ।
प्रभुः स शान्तिर्द्विविधा द्विषां भियोऽपनीय मे नित्यसुखाद्वयं क्रियात् ॥८॥

स्तुतिमिति तनुते जिनेन्द्र ! यस्ते,
मघवमहामुनिसुन्दरस्तुतांह्रिः ।
स भवति गुणसम्पदा समस्ते,
फलमिति तद्वितराच्चिरान्ममापि ॥९॥ औप०

इति० षोडशश्रीशान्तिजिनस्तोत्ररत्ननामा षोडशो मूलतश्च तरङ्गः ॥

## अथ श्रीकुन्थुजिनस्तोत्ररत्नम् १७ ( वंशस्थम् )

बभूव यः सर्वसगर्वभूभृतां, जयश्रिया भारतषष्ठचक्रभृत् ।
स कुन्थुनाथः स्तुतिगोचरीभवन् , पुनातु मां सप्तदशो जिनेश्वरः ॥१॥
सुखानि कुन्थुः प्रभुरातनोतु मे, स शाश्वतानन्दमयानि सर्ववित् ।
यदीयविज्ञानसरोरुहोदरे, मधुव्रताभां भुवनानि बिभ्रते ॥२॥
भवप्रमाथं विदधात्यकामता-ममारतां चच्छगलाङ्कितो दधत् ।
तथाऽपि यः श्रीतनयः प्रसिद्धिमाग् , मतं स तन्यान् मम कुन्थुतीर्थराट्॥३॥
सुवर्णकान्तिर्दधते न मन्दतां, न खभ्रमं जातु न वक्रतामपि ।
स्तुवन्ति यं सूरसुतं बुधास्तथाऽप्यहो ! स कुन्थुः प्रथयत्वपक्षयम् ॥४॥
न यक्षिणी सा जिन ! केवला या, स चापि गन्धर्वसुरः प्रशस्यते ?।
त्वदंह्रिसेवादिभिरामरं जनुः, स्वमीश ! याभ्यां क्रियते फलेग्रहि ॥५॥
बभार यश्चक्रिपदे नवोत्तमान् , निधीन् जिनत्वे च स तत्त्वशेवधीन् ।
प्रदीयमाना जगतोऽपि येऽव्ययं, न यान्ति कुन्थुः स मुदेऽस्तु मे प्रभुः॥६॥
श्रयामि तं कुन्थुविभुं समीहित-प्रदप्रसादं परमेष्ठिनां परम् ।
यदंह्रिसेवाविधिकल्पवीरुधः, फलानि चक्रीन्द्रजिनेन्द्रसम्पदः ॥७॥
द्विधाऽखिलद्वेषिविनिर्जयाद्यतो, बभूव चक्री जिननायकश्च यः
तमेव मे द्राक् स कृपानिधिः कृपा-ऽऽस्पदस्य कुन्थुर्ददतां कृतस्तुतिः ॥८॥

स्तुतिमिति तनुते जिनेन्द्र ! यस्ते,
मघवमहामुनिसुन्दरस्तुतांह्रिः ।

"Aho Shrut Gyanam"

स भवति गुणसम्पदा समस्ते,
फलमिति तद्वितराचिरान्ममापि ॥९॥ औप०

इति० सप्तदशश्रीकुन्थुजिनस्तोत्ररत्ननामा सप्तदशो मूलतश्च तरङ्गः॥

## अथ श्रीअरजिनस्तोत्ररत्नम् १७ (उपजातिः)

संसारशत्रोर्विजयश्रियाऽऽप्य-मिच्छन् शिवं चक्रिरमां जहौ यः ।
अरं जिनं तं विषयैर्विचित्रै-ररञ्जितं स्तौमि जिताखिलाऽऽरम् ॥१॥
चिकीर्षतेऽपि स्तवने तवेष्टान्यास्कन्दतां तत्करणे न चित्रम् ।
देवान्तराणां तु कृतेऽप्यमुष्मिन् , प्रयासमेवाऽऽप्नुवतां कथं तत् ? ॥२॥
सुदर्शनक्ष्मापतिवंशमौलिं, देवीतनुजं जगतामधीशम् ।
परानुवृत्त्यापि नरोऽरदेवं, स्तुवन्न रोरत्वमुपैति जातु ॥३॥
यक्षेशयक्षं जिन ! तं स्तवीमि, धारिण्यभिख्यामपि यक्षिणीं ताम् ।
नित्यं तवोपासनभक्तदक्षा-दिभिः शिवं यौ कुरुतः करस्थम् ॥४॥
चिह्नच्छलाद् यद्विदधाति नन्द्या-वर्त्तः प्रभो ! ते पदपद्मसेवाम् ।
अचेतनोऽप्येष बभूव तेन, धुरीणवृत्तिः किल मङ्गलेषु ॥५॥
निरासि यन्मोहरिपुस्त्वया त-त्त्वन्मतस्मरान्नैव रुणद्धि जन्तून् ।
पुरे विविक्षूंस्तव शासने ते, स्वामित्यदृष्ट्वैव भवे भ्रमन्ति ॥६॥
को वाऽत्र दोषस्तव तस्य वेश !, तस्यैव यत्ते दधते सदाज्ञाम् ।
स्वाज्ञानुगेष्वेव तु स प्रगल्भो, जह्युर्बुधास्तद्भवदां तदाज्ञाम् ॥७॥युग्मम्॥
मा त्याक्षीर्जिन ! नस्त्वदेकशरणान् स्वामी पुनस्त्वत्समो,
भावी क्वेति *कुनाभयो नव मरुत्सञ्चारिताब्जच्छलात् ।
भक्त्या केवलिनं चरन्तमवनीं विज्ञापयन्ति स्म यं,
तन्यात् सर्वभयक्षयान्मम परं श्रीमानरः शर्म सः ॥८॥ शार्दू०
स्तुतिमिति तनुते जिनेन्द्र ! यस्ते, मन्नमहामुनिसुन्दरस्तुतांह्रेः ।
स भवति गुणसम्पदा समस्ते, फलमिति तद्वितराचिरान्ममापि ॥९॥औप०

इति० अष्टादशश्रीअरजिनस्तोत्ररत्ननामा-अष्टादशो मूलतश्च तरङ्गः।

---

* निधानानि

"Aho Shrut Gyanam"

## अथ श्रीमल्लिजिनस्तोत्ररत्नम् १९ ( रथोद्धता )

मल्लिनाथ ! भवतः स्तवं द्विधा, सर्ववैरिविजयश्रिये भजे !
सेविताङ्घ्रि सदुपाययोगतः, स्याद्भुवः पदमुपेयसम्पदः ॥१॥
ये प्रकल्पितकियत्फलेष्वपि, स्वर्द्रुमादिषु भृशं जिनाऽऽदृताः ।
निश्चितेन्द्रविभवादिसत्फले, तेऽपि किं तव गुणस्तवेऽलसाः ? ॥२॥
कुम्भसम्भव ! भवाब्धिशोषणं, नाद्भुतं तव तदद्भुतं पुनः ।
यद्रविं स्वमहसा विजित्य भा-मण्डलाङ्कमकृथाः स्वसेवकम् ॥३॥
तां तवेश ! जननीं प्रभावतीं, स्तौम्यनन्तमहिमप्रभावतीम् ।
त्वां प्रसूय भुवनत्रयप्रभुं, प्राप या मघवतामपि स्तुतीः ॥४॥
सेवते जिन ! कुबेरयक्षराड्, यौ शिवाय धरणेन्द्रपत्न्यपि ।
त्वत्पदौ मम हृदीश ! तिष्ठतां, तौ सदापि किमतोऽर्थ्यसे परम् ॥५॥
गीःसुधां तव पिबद्भिराप्यते, नैव तृप्तिरमरासुरादिभिः ।
ते तथेति नु घटानपूपुरन् , विस्मृतोऽङ्कमिषतश्च कोऽपि सः ॥६॥
क्लिश्यते किमिह सम्पदर्थिभि-र्मन्त्रयन्त्र सुरसाधनादिभिः ।
ध्यानतोऽपि तव पादपङ्कजं, भक्तिकाय वितरत्यभीप्सितम् ॥७॥
मल्लिनाथ ! भवतः स्तवादतः, प्रार्थये नहि नृपादिसम्पदः ।
सप्तभीतिरहितं तु देहि मे, सौख्यमेत्यनुभवं तवैव यत् ॥८॥
स्तुतिमिति तनुते जिनेन्द्र ! यस्ते, मघवमहामुनिसुन्दरस्तुतांह्रेः ।
स भवति गुणसम्पदा समस्ते, फलमिति ताद्वितराचिरान्ममापि ॥९॥

इति० एकोनविंशति श्रीमल्लिनाथस्तोत्ररत्ननामा एकोनविंशतितमो मूलतश्च तरङ्गः ॥

## अथ श्रीमुनिसुव्रतजिनस्तोत्ररत्नम् २० ( स्वागता )

श्रीसुमित्रनृपनन्दन ! नन्द, स्वर्द्रुमाभ ! जगदीहितदाने ।
संस्तवेन मुनिसुव्रत ! तेऽहं, सर्ववैरिविजयश्रियमीहे ॥१॥

"Aho Shrut Gyanam"

पद्मया सह तवेश ! जनन्या, नाममैत्र्यमदवात् कमला यत् ।
तेन सैव भगवन् ! जगदर्चा-पात्रतामियमपि प्रतिपेदे ॥२॥
सर्वदैवतशिरोमणितां ते, यक्षराज ! वरुणाह्वय ! मन्ये ।
सुव्रतस्य पदपङ्कजसेवां, यः करोष्यविरतं शिवहेतुम् ॥३॥
नो शिवां नहि शचीं न च रम्भां, स्तौमि किन्तु भवतीं नरदत्ते ! ।
या निहन्ति मुनिसुव्रतभक्त्या, सर्वतोऽपि मुनिसुव्रतविघ्नान् ॥४॥
स्तोत्रमीश ! कमठोऽर्हति तिर्य- ङ्ङप्ययं भजति योऽङ्कमिषात्त्वाम् ।
तैस्तु किं नरगणैरमरैर्वा, ये समत्सरधियस्तव दूरे ? ॥५॥
को भवः ? किमथ विघ्नभयं स्यात् ?, किञ्च दुःखमरतिर्ननु का वा ? ।
कश्च तस्य जगति प्रतिकूलः, सुव्रतेश ! हृदि तिष्ठसि यस्य ॥६॥
सर्वकर्मविजयि स्तवनं ते, सर्वसौख्यविजयीश ! सुखं ते ।
सर्वधर्मविजयी तव धर्मः, सर्वदेवविजयीत्यसि देवः ॥७॥
प्रार्थये तदिति नाथ ! मनो मे, चापचञ्चलं न मुनिसुव्रत ! मुञ्चेत् ।
निश्चला वसतु तत्र तु नित्यं, सर्ववाञ्छितकरी तव भक्तिः ॥८॥
स्तुतिमिति तनुते जिनेन्द्र ! यस्ते, मघवमहामुनिसुन्दरस्तुतांह्रेः।
स भवति गुणसम्पदा समस्ते, फलमिति तद्वितराचिरान्ममापि ॥९॥ औप०

इति० विंश श्रीमुनिसुव्रतजिनस्तोत्रनामा विंशो मूलतश्च तरङ्गः॥

## अथ श्रीनमिजिनस्तोत्ररत्नम् २१ ( वसन्ततिलका )

श्रीमन्नमे ! भवरिपोर्विजयश्रियेऽहं,
स्तोत्रं सृजामि भवतः करणीयमिन्द्रैः ।
मन्दोऽपि दृष्टचरसत्फलसम्भवायां,
नालस्यपङ्ककलुषो हि शुभक्रियायाम् ॥१॥
मन्ये यदङ्गरुचिभिः परिभूतशोभं,
तत्साम्यमिच्छदनलेष्वसकृत्प्रवेशैः ।
अष्टापदं चरति शुद्धमहाव्रतानि,
श्रीमन्नमिः स हृदि मे स्थिरतां दधातु ॥२॥

"Aho Shrut Gyanam"

अर्हन्नमे ! भृकुटियक्षपरस्यमाण—
भक्तव्रजस्य विजयक्षितिपालसूनो! ।
गान्धार्युपास्यचरणस्य दधत्तवाऽऽज्ञां,
मान्यो भवेन्मघवतामपि मुक्तिकाम्यः ॥३॥
वप्रायते स्म जगतीजनदूरगाया (?),
सा पालने गुणततेः किल निर्मितायाः ।
वप्रेति तेन विदिताऽजनि यस्य माता,
ज्ञानादिसम्पदमयं तनुतां नमिर्मे ॥४॥
मन्ये सदैव परिशीलनवाञ्छयायत्—
पादाम्बुजस्य निकटे घटयाञ्चकार ।
नीलोत्पलाङ्कमिषतः कमला स्वगेहं,
स श्रीनमिः सृजतु मुक्तिरमां वशां मे ॥५॥
व्योमाग्निवायुजलभूत्रिगुणातिगाय,
वाङ्मानसेन्द्रियगणाविषयस्वरूप ! ।
विश्वोपकारकृदनन्तगुणात्मकाय,
सूक्ष्माय नाथ ! महते च नमोऽस्तु तुभ्यम् ॥६॥
यत्पूजनात् परममस्ति परं न पुण्यं,
ध्येयं न योगिततिभिः शिवकृद्यतोऽन्यत् ।
पापं न तन्न यदपैति यदीयनाम्ना,
तं देवदेवमसमं नमिमानमामि ॥७॥
आराध्यते परमयोगिभिरीशिता यो,
यस्मै पदाय विविधैः स्तवनाद्युपायैः ।
देयात् तदेव भगवान् स नमिर्ममापि,
नैवार्हतादि विमृशन्ति दयालवो यत् ॥८॥
स्तुतिमिति तनुते जिनेन्द्र ! यस्ते,
मघवमहामुनिसुन्दरस्तुतांह्रेः ।

"Aho Shrut Gyanam"

स भवति गुणसम्पदा समस्ते,

फलमिति तद्वितराऽचिरान् ममापि ॥९॥ (औप०)

इति० एकविंशतितमश्रीनमिजिनस्तोत्ररत्ननामा एकविंशो मूलतश्च तरङ्गः॥

## अथ श्रीनेमिजिनस्तोत्ररत्नम् २२

विजित्य यो विश्वजयश्रियोन्मदं, स्मरारिवैरं नृसुरासुराजितम् ।
अवापदार्हन्त्यरमामनुत्तरां, स्तवीमि तं नेमिजिनं जगत्पतिम् ॥१॥(वंश०)
आनन्दमात्रं किल भुज्यमाना, दत्ते क्षणं रागिण एव नारी ।
वैराग्यभाजोऽपि हि संयमश्री-र्ध्रुवं महानन्दमपि त्वनन्तम् ॥२॥ (उप०)
विमृश्य धीमानिति यो विहाय, राजीमतीं गाढचिरत्नरागाम् ।
भेजेऽपरां विश्वजितः स्मरस्य, जेता शिवाभूर्मम सोऽस्तु नेता ॥३॥

( युग्मम् )

गोमेधयक्षार्चित ! शङ्खलक्ष्मन् !, स्तुवेऽम्बिकां तां जगदम्बिकाभां ।
सुखीकृता विघ्नहतेर्यया स्युः, शिवार्थिनः के तव सेवका न ? ॥४॥
यद्ध्यानधूमध्वजयोगतोऽभूदनादिरागादिमलव्यपायात् ।
राजीमतीमानसहेम शुद्धं, करोतु नेमिर्हृदि मे स वासम् ॥५॥
नेमिं श्रयामि शरणं त्रिजगत्प्रभुर्यो, धत्ते स्फुरत्तनुकरप्रकरच्छलेन ।
भक्तिप्रणम्रजनदुर्द्धरपापवैरि-प्रध्वंसनप्रगुणितान् बहुलोहदण्डान् ॥६॥
अथवा—तं श्रीनेमिविभुं श्रयामि शरणं स्निग्धं घनश्यामलं,

योऽयस्कान्तमणिव्रजं निजवपुर्भास्तोमपिण्डच्छलात् ।

धत्ते मोहभटद्विपस्त्रिजगतीभव्याङ्गसंस्थान् स्फुरत्—

कामाद्यस्त्रगणान् व्यथां विदधतः क्रष्टुं समन्तात्किल ॥७॥ (शार्दू०)

तत्रान्तर्विवसन् विगाह्य विपुलं श्रीराजिमत्या मनो—

वार्द्धिं केवलरत्नमाविरकरोत्सद्यः क्षमाभृद् गुरुः ।

लोकालोकविभासनैकनिपुणं यन्नामरेन्द्रैरपि,

प्राप्तुं शक्यमिमं समुद्रविजयक्ष्मापालपुत्रं भजे ॥८॥ (शार्दू०)

"Aho Shrut Gyanam"

स्तुतिमिति ततुतं जिनेन्द्र ! यस्ते, मघवमहामुनिवृन्दसंस्तुताङ्घ्रिः ।
स भवति गुणसम्पदा समस्ते, फलमिति तद्भितराऽचिरात् ममापि ॥९॥
(औप०)

इति० द्वाविंशश्रीनेमिजिनस्तोत्ररत्ननामा द्वाविंशो मूलतश्च तरङ्गः॥

## अथ श्रीपार्श्वजिनस्तोत्ररत्नम् २३ ( उपजातिः )

जगज्जयश्रीप्रभुताफलं स्याद् , यदंह्रिसेवाविधिकल्पवल्लेः ।
तं पार्श्वसंसेवितपार्श्वदेशं, पार्श्वप्रभुं स्तौम्यहिराजसेव्यम् ॥१॥
यथेष्टसंवत्सरदानकाले, सुरद्रुरत्नत्रिदशादिकेभ्यः ।
ददौ प्रभावं यममी तमद्या-प्याबिभ्रते पार्श्वविभुं श्रये तम् ॥२॥
सहस्रशीर्षोपि (र्षेण) मया क्षमा धृता, प्रकम्पतेऽनेन तु चेतसापि न ।
इतीव भक्त्या फणिराड् निषेवते, यमङ्कभिद् पार्श्वविभुः स पातु माम् ॥३॥
तं सेवेऽहं श्रेयसे पार्श्वमाज्ञा, विश्वव्यापी (सा) कल्पवल्ली यदीया ।
त्रैलोक्यस्य द्वन्द्वतापस्य हर्त्री, दत्ते सर्वाभीष्टसम्पत्फलानि ॥४॥ शालिनी

अस्मिन्प्रभावऽमृतदेऽपि सति श्रितानां,
द्वेष्यः किमेष जगतो विषतो भवामि ? ।
ध्यात्वा फणीत्यमृतमर्थयते यमङ्क-
दम्भाद् भजन् जिनमिमं प्रणतोऽस्मि पार्श्वम् ॥५॥ (वसन्त०)

सप्तद्वीपरवीन् विजित्य भगवान् ज्ञानप्रकाशाद् निजाद् ,
धत्ते सप्तनयध्वजान् फणिफणव्याजेन यो भास्वरान् ।
विश्वेच्छाविषयप्रदाननिपुणस्त्रैलोक्यरक्षागुरुः,
स श्रीपार्श्वविभुर्दधात्वविरतं चित्ते निवासं मम ॥६॥ (शार्दू०)

नो विद्विषिभयं दुरामयभवं दुःखं न चोज्जृम्भते,
दुष्टक्ष्मापखलादिभीर्न भविनां चौरादिशङ्का च नो ।
न क्लेशोपि जनुर्जरामृतिमयो यस्याह्वयस्य स्मृतेः,
श्रेयोवल्लीनवाम्बुदः स भगवान् पार्श्वप्रभुः पातु माम् ॥७॥(शार्दू०

"Aho Shrut Gyanam"

श्रीवामेयजिनाश्वसेनवसुधाभृद्वंशभूषामणे !,
त्वद्भक्तजनपालनाहितमनःपद्मावतीसेवित ! ।
नाथं त्वां शरणं श्रितोऽस्मि विविधक्लेशाकुलस्तन्ममा—
ऽशेषद्विषिभयान्यपास्य परमानन्दं प्रदेह्यक्षरम् ॥८॥
स्तुतिमिति तनुते जिनेन्द्र ! यस्ते, मत्रममहामुनिसुन्दरस्तुताङ्घेः ।
स भवति गुणसम्पदा समस्ते, फलमिति तद्वितराऽचिरान् ममापि ॥९॥ वैता०

इति० त्रयोविंशश्रीपार्श्वजिनस्तोत्ररत्ननामा त्रयोविंशो मूलतश्च तरङ्गः॥

## अथ श्रीवर्द्धमानजिनस्तोत्ररत्नम् २४ ( वंशस्थम् )

जयश्रिये कर्ममहारिसन्ततेः, स्तुवन्ति यं विश्वगुरुं सुयोगिनः ।
तदर्थिताया वशतोऽहमप्ययं, निरञ्जनं वीरजिनं स्तवीमि तम् ॥१॥
न केवलं नाथ ! स सान्वयाभिधो, बभूव सिद्धार्थधराधवः क्षितौ ।
तवावतारेण जगत्त्रयीजनो-ऽप्यवाप, सिद्धार्थतयैव सम्पदम् ॥२॥
त्वादृक् सुताप्त्यै त्रिशलां तनुं स्त्रियाः, श्रितां स्तुमस्तां किल विश्वदेवताम् ।
बभूवुषी या तव जन्मकर्मणा, सुरेश्वराणामपि संस्तुतेः पदम् ॥३॥
तुल्ये कुरङ्गक्षितिकर्मणि प्रभो !, कथं शिवे ते नरके तु मे गतिः ।
ममाप्यदो देहि जगच्छिवङ्कर !, त्वामर्थयेतेति हरिः किलाङ्कभाक्॥४॥
भजन्ति मातङ्गसुरार्चितौ पदौ, सिद्धायिकासेव्यतमौ तवेश ! ये ।
कलां त्वदीयामचिरादवाप्य ते, जगत्सु वृत्तिं दधते सुपालिनीम् ॥५॥
स्थैर्यतस्त्रिजगतीजयिनो मे, क्वोपमानमिममाहुरिहार्याः ।
कम्पयन् सुरगिरिं न्विति तान् योऽ-भूबुधज्जयति वीरजिनोऽयम् ॥६॥
(स्वागता)

भवभयहरणं जगच्छरण्यं, शरणमहं तमुपैमि वर्द्धमानम् ।
कलियुगघनदुर्दिनेऽधुनापि, स्फुटयति तत्त्वपथान् यदागमार्कः॥७॥ (वैता०)
एवमानुत ! भवारिजयश्री—प्राप्तये निरुपधिं मम बोधिम् ।
वर्द्धमानजिन ! देहि यतः स्या—मर्थतस्तव पितुः समनामा ॥८॥ (स्वागता)

"Aho Shrut Gyanam"

स्तुतिमिति तनुते जिनेन्द्र ! यस्ते, मघवमहामुनिसुन्दरस्तुतांह्रिः ।
स भवति गुणसम्पदा समस्ते, फलमिति तद्वितराऽचिरान् ममापि ॥९॥
(वैता०)

इति० चतुर्विंशश्रीवर्द्धमानस्तोत्ररत्ननामा चतुर्विंशो मूलतश्च तरङ्गः ॥

## अथ श्रीवर्द्धमानजिनस्तोत्ररत्नम् २५ (रथोद्धता)

मङ्गलानि स ददातु भाविनां, वीरतीर्थपतिरुल्लसन्महाः ।
यस्य धर्ममधुनापि बिभ्रतः, प्राप्नुवन्त्यरिजयश्रियं बुधाः ॥१॥
उपेयुषो यस्य शिवं तदागमोद्भवां बुधा वीक्ष्य पदावलीं स्फुटाम् ।
श्रयेयुरद्यापि तदध्वनीनतां, स वीर ! सार्थप्रभुरस्तु मे मुदे ॥२॥
श्रीधर्मकल्पद्रुरयं यदुप्तः, प्रवृद्धशाखो भरतावनीतले ।
फलत्यभीष्टैरधुनापि सौख्य-फलैर्भजे तं त्रिशलातनूजम् ॥३॥
सुखं स तन्यान् मम वर्द्धमानो, जगत्प्रभुर्निर्वृतिलक्ष्मिनाथः ।
शिवं यदाज्ञानुगमाल्लभन्तेऽन्यथा तु जीवा भवदुःखदण्डम् ॥४॥

रागादिदोषगदनिर्दलनाय येषां,
सिद्धौषधन्ति वचनानि शरीरिवर्गे ।
अद्यापि भान्ति सरसानि शिवङ्कराणि,
वीरो महाभिषगयं जगतां मुदेऽस्तु ॥५॥

वितरतु स सुखानि वर्द्धमानः,
प्रणतिमतां भगवानभङ्गुराणि ।
कलिघनतमदुर्दिनेऽधुनापि,
स्फुटयति तत्त्वमणीन् यदागमार्कः ॥६॥ (औपच्छन्दसिकम्)

दानाद्यंह्रिबलः कुतर्कमृगभुक् स्याद्वादवादस्फुरत्–
क्ष्वेडस्तीर्थमतङ्गजान् विमदयन् स्फूर्जत्प्रभावालधिः ।
रक्षन् शासनकाननं विजयते यद्धर्मपञ्चानन–
स्त्रैलोक्याप्रतिमाप्रधर्ष्यमहिमा वीरप्रभुं तं श्रये ॥७॥

"Aho Shrut Gyanam"

जिनः श्रीमान् वीरस्त्रिभुवनहितो धर्मचक्री परं मे,
वितन्याद् भद्रौघं सुरनरपतिश्रेणिसेव्यांह्रिपद्मः ।
श्रियोऽनन्ता दत्ते सकलजगतामप्यभीष्टाः सदोद्यत्–
परानन्दा धर्माक्षयनिधिरयं सेव्यमानो यदीयः ।८।। (मेघविस्फूर्जिता)

स्तुतिमिति तनुते जिनेन्द्र ! यस्ते, मघवमहामुनिसुन्दरस्तुतांह्रेः ।
स भवति गुणसम्पदा समस्ते, फलमिति तद्वितराऽचिरान् ममापि ।।९।।
इति युगप्रधानावतारतपागच्छाधिराज-परमपूज्य श्रीदेवसुन्दरसूरिगुरुगण-महिमार्णवानुगामिन्यां तद्विनेयश्रीमुनिसुन्दरसूरिगणिहृदयहिमवदवतीर्ण-श्रीगुरुप्रभावपद्महृदप्रभवायां श्रीपर्युषणामहापर्वविज्ञप्तित्रिदशतरङ्गिण्यां जयश्र्यङ्कायां प्रथमे जिनादिस्तोत्ररत्नकोशापरनामनि नमस्कारमङ्गलस्रोतसि वर्त्तमानचतुर्विंशतिश्रीजिनस्तवचतुर्विंशिकाह्वमहाह्रदे श्रीवर्द्धमानस्यापश्चिम-तीर्थपतेः सम्प्रति प्रवर्त्तमानश्रुतधर्मतीर्थप्रवृत्तिद्वारस्तुतिरूपः स्तोत्ररत्न नामा पञ्चविंशो मूलतश्च तरङ्गः ।।२९।।

---

## श्री वीरस्तवः

जय सिरिजिणवर ! तिहुअणजणमणवंछिअसुहत्थकप्पतरू ।
सिरिवद्धमाणसामिअ ! होस पहू मम तुमं निच्चं ।।१।।
भविआण थुणिअचलणो, सामित्तं देसि तिहुअणस्सावि ।
कप्पतरुस्स वंछिअ–दाणो एसो तुह सहावो ।।२।।
सयलाओ हुंति रिद्धी, भद्दकरा गहनिमित्त–सउणसरा ।
विलसंति नाणदंसण–चरणा तुह पयपसाएण ।।३।।
दंसणनाणचरित्ते, दाउं जह गोयमाइगणवइणो ।
सिवसुहलच्छीसहिआ, विहिआ तुह नाह ! कुणसु ममं ।।४।।
इअ सुरनरनाहमहा-**मुणि सुंदर** संथवारिहो वीरो ।
सामी कुणसु पसायं, नियपयसुहदाणओ अइरा ।।५।।

"Aho Shrut Gyanam"

# शुद्धिपत्रकम्

| पृ. | पङ्क्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १ | १८ | करण | करेण |
| ३ | २६ | ०द्वप० | दृपव० |
| ८ | २० | ०दुःख० | ०दुःख० |
| १४ | २० | हेतु | हेतुं |
| १५ | २१ | कतुक | कुतुकं |
| १५ | २२ | ०सद्य—द० | ०स—द्यद० |
| १६ | १९ | जनुःख० | जनुःस्न० |
| १७ | ९ | —द्विशेषज्ञ ! ते० | द्विशेषज्ञते० |
| १७ | २२ | सस्क्रियां | सांस्क्रियां |
| १८ | १५ | ०सुपात् मनो, | ०रूपात्मनो, |
| २२ | ९ | कार्तिकस्य | कार्तिककस्य |
| २२ | २२ | प्रभु | प्रभुं |
| २४ | ५ | पौषशु० | पौषे शु० |
| २४ | २५ | ०सुंतश्च | ०सुतश्च |
| २७ | २ | श्रा० | श्री० |
| २९ | २५ | ०न्त | ०न्तरे |
| ३० | ४ | ०बंभ से | बंभासे |
| ३४ | १ | परम | परमं |
| ३४ | ४ | तालीयम् | वैतालीयम् |
| ३७ | ३ | विमष० | विभूष० |
| ४० | २५ | हो | होसु |
| ४३ | ९ | ये पुनरोषे मे | येषु नरेष्विमे |
| ४४ | २ | श्रि | श्र |
| ४५ | ६ | ०करस्तत्रा० | ०करांस्तत्रा० |
| ४६ | १९ | ०लमः | ०लसः |

"Aho Shrut Gyanam"

| पृ. | पङ्क्ति | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ४७ | १२ | सद्मय० | सद्म य० |
| ४७ | १८ | ०पित्रस्ता० | ०पि भीस्ता० |
| ४७ | २४ | , | d |
| ४८ | १ | ०मनो मु० | ०मनोमु० |
| ४८ | १ | ०द्ध प्र० | ०द्धप्र० |
| ४८ | ६ | ना | नो |
| ४९ | १७ | नय*य० | जयश्च्य। |
| ५५ | १० | ०न्येन्यं | न्ये (न्यं) |
| ५६ | ८ | ञजं ! | ञ्जन ! |
| ५८ | २२ | द्वषे | द्वेषं ! |
| ५८ | २४ | धर्मं | धर्मं |
| ५९ | २२ | विज्ञाय यते | विज्ञापयते |
| ६२ | २० | | तम |
| ६४ | ४ | दूरगाया | दुर्गगाया |
| ६४ | ८ | वाञ्छयायत् | वाञ्च्छया यत् |
| ६६ | १७ | दम्भाद् | दम्भाद् |
| ६७ | ७ | त्रयोविंशो | त्रयोत्रिंशो |
| ६७ | १८ | वृत्ति | वृत्ति |

"Aho Shrut Gyanam"

"Aho Shrut Gyanam"

आगमोद्धारक-ग्रन्थमालाया एकोनविंशं रत्नम् ।

णमोत्थु णं समणस्स भगवओ महावीरस्स ।

आगमोद्धारक-आचार्यप्रवर-श्री आनन्दसागरसूरीश्वरेभ्यो नमः ।

# जैनस्तोत्रसञ्चयस्य

## *तृतीयो विभागः ।*

卐

:-: संशोधकः :-:

प. पू. गच्छाधिपति-आचार्य-श्रीमन्माणिक्यसागरसूरिः

प्रतयः ५०० ] [ मूल्यम् १-००

वीर सं. २४९१ वि. सं. २०२१ आगमोद्धारक सं. १६

"Aho Shrut Gyanam"

# प्रकाशकीय निवेदन

प. पू. गच्छाधिपति आचार्य श्री माणिक्यसागरसूरीश्वरजी महाराज आदि ठाणा वि. स. २०१० ना वर्षे कपडवंज शहेरमां मीठाभाई गुलालचंदना उपाश्रये चतुर्मास बीराज्या हता । आ अवसरे विद्वान् बालदीक्षित मुनिराजश्री सूर्योदयसागरजी महाराजनी प्रेरणाथी आगमोद्धारक ग्रंथमालानी स्थापना थएली हती, आ ग्रंथमालाए त्यारबाद प्रकाशनोनी ठीक ठीक प्रगति करी छे ।

सूरीश्वरजीनी पुण्यकृपाए आ 'जैन स्तोत्रसंचय'नो त्रीजो भाग आगमोद्धारक–ग्रंथमालाना १९ मा रत्नतरीके प्रगट करतां अमोने बहु हर्ष थाय छे ।

आनुं संशोधन प. पू. गच्छाधिपति आ० श्रीमाणिक्यसागर-सूरीश्वरजी म नी पवित्रदृष्टि नीचे शतावधानी मुनिराजश्री लाभसागरजीए करेल छे ते बदल तेओश्रीनी तेमज जेओए आना प्रकाशनमां द्रव्य तथा प्रति आपवानी सहाय करी छे, ते बधा महानुभावोनो आभार मानीए छीए ।

लि.

प्रकाशक

"Aho Shrut Gyanam"

# विषयानुक्रमः ।


| | | पेज |
|---|---|---|
| १. | त्रिदशतरङ्गिणी । | १ |
| २. | जिनस्तुति-स्तोत्ररत्नकोषः । | २९ |
| ३. | श्री शङ्खेश्वरपार्श्वनाथस्तवनम्ः । | ५७ |
| ४. | तीर्थवन्दना (सिद्धसेनसूरिविरचिता) | ६२ |
| ५. | श्री वीरस्यपञ्चवर्गपरिहारस्तुतिः । | ६५ |
| ६ | श्री महावीरजिनस्तुतिः । | ६६ |
| ७. | श्री ऋषभजिनस्तुतिः । | ६८ |
| ८. | ह्लींकारवर्णनस्नवनम् । | ६९ |
| ९. | साधारणजिनस्तवः । | ७३ |
| १०. | एकः श्लोकः । | ८० |


"Aho Shrut Gyanam"

"Aho Shrut Gyanam"

# शुद्धिपत्रक

| पृ. | प. | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| २ | २२ | सामा. | सौभा |
| ३ | १ | ताम्म्म: | ताम्म: |
| ,, | २० | विन्दून् | बिन्दून् |
| ४ | ११ | मब्योम | भव्योम |
| ,, | १७ | दिस्तव | दिदेवस्तव |
| ,, | २४ | प्रभु- | प्रभुं |
| ५ | ८ | श्लथ | श्लथं |
| ,, | ९ | याऽधुर | याधुर |
| ६ | ११ | रुसि | रुषि |
| ,, | १२ | वीथी | वीथि |
| ,, | १९ | राल: | राले: |
| ,, | २६ | बर्ग | वर्ग |
| ७ | १ | जगद्धिड | जगद्विड |
| ,, | ११ | स्फूञ्र्जे | स्फूर्ज्जे |
| ,, | १९ | भुजो | भुजा |
| ८ | २ | पुष्टयै | पुष्टयै |
| ,, | ६ | द्रमत्वं | द्रुमत्वं |
| ,, | १८ | ताश:प्र | ताशाप्र |
| ९ | १४ | तणां | तृणां |
| ,, | १६ | श्चैकार: | स्त्वेकार: |
| ,, | १८ | ईरेण | तयो: ईरेण |
| ,, | १९ | वरिष्ठं | गरिष्ठं |
| ,, | २४ | ईतिचेतिढ | इट इति च |
| | | इति | इति (इढईतिच) |
| | | | रति (४-३-७१) |
| १० | ३ | अरु- | अरु-व्रणं |
| ,, | ४ | ररस्य | अररस्य |

| पृ. | प. | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १२ | २० | य रो | य (र) रो |
| ,, | २५ | दत्वा | दत्त्वा |
| १३ | १० | देशना | देशन |
| ,, | १२ | गतया | गततया |
| ,, | ,, | रा कृत: | रारावकृत: |
| ,, | १८ | मारी | मारा |
| १४ | ३ | आमा | ये आमा |
| ,, | ३ | तस्वा | तस्य |
| ,, | ८।११।१२ | यर्यी | अयी |
| ,, | ९ | यायम | यामम |
| ,, | १७ | च य | य |
| ,, | २४ | अयनमाय | अमनमाम |
| ,, | २४ | लाभस्य | आयस्य-लाभस्य |
| १५ | २ | मया: | मया |
| ,, | १२ | माय: | मोय: |
| ,, | १७ | याम: | याम |
| ,, | १९ | मृत्थुं | मृत्युं |
| ,, | २२ | यां ‘या | ‘या |
| १७ | २२ | ऊरु: | उरु: |
| २६ | १२ | निधि: | निधिं |
| २९ | ७ | समाया | समया |
| ३१ | १८ | विज्ञना | विज्ञानं |
| ,, | २४ | श्रित | श्रितं |
| ३४ | १ | वेदिते | वेदितो |
| ३५ | ८ | श्रिया | श्रियो |
| ३७ | २० | एवं ये | एवं यो |
| ४० | ६ | विभागेन | विभावनेन |

"Aho Shrut Gyanam"

| | | | |
|---|---|---|---|
| ,, | ८ | मरारि | मारारि |
| ,, | ९ | गृहं | ग्रहः |
| १२ | ७ | रिवैं | रिरवैं |
| ,, | १५ | नट्ठु | बहु |
| ,, | १७ | भ्रान्तिः | वान्तिः |
| ४१ | ४ | सत्प्रतिष्ठः | सत्प्रतिष्ठ |
| ,, | ८ | श्रेणी | श्रेणीः |
| ,, | २२ | एव | एवं |
| ४२ | १० | तान | तान् |
| ४५ | ७ | ह्रग्र | द्यग्र |
| ६४ | १ | आशसा | आशंसा |
| ६९ | १३ | ह्रींकार | ह्रींकार |
| ७३ | १४ | ींपो | दींपो |
| ७७ | १९ | कह्यंपि | कह्यंपि |
| ८० | ९ | पभृतिभिः | प्रभृतिभिः |

"Aho Shrut Gyanam"

# प्रास्ताविक

"श्री जैनस्तोत्रसंचय" नो त्रीजो विभाग सुज्ञ-विद्वानोना करकमलमां अर्पण कराय छे।

आ ग्रंथमां मुख्यत्वे बे विभाग छे (१) श्री त्रिदश-तरङ्गिणीनो प्रथमस्रोत अने जिनस्तुतिस्तोत्ररत्नकोश। (२) अन्य स्तुति-स्तोत्रो.

प्रथम स्रोतनुं नाम "नमस्कारमंगल" छे तेमा नीचे मुजबना छ तरंगो छे।

१. मंगलशब्दश्लोक-सर्वज्ञाष्टक
२. श्री युगादिदेवस्तवाष्टक
३. श्री शांतिजिनस्तवाष्टक (जेमां शब्दयमकालंकार भरपूर रीते छे)
४. श्री नेमिनाथस्तवाष्टक (जेमां पांच वर्ग्याक्षरनो परिहार करेल छे)
५. श्री पार्श्वजिनस्तवाष्टक
६. श्री वर्द्धमानस्वामिस्तवाष्टक

आमां प्रथम अष्टकमां सर्वज्ञप्रभुनी अने पछी श्रीऋषभदेव, श्री शांतिनाथ, श्री नेमिनाथ, श्री पार्श्वनाथ अने श्री महावीर-स्वामीनी विविध सुंदर पद्योथी स्तुति करवामां आवी छे।

जेमां विशेष करीने श्रीवर्द्धमानस्वामीस्तवनामना छट्ठा तरंगमां मंगलाचरण रूपे पहेलुं पद्य छे पछी एक एकाक्षरी पद्य छे। पछी द्व्यक्षरी नव पद्यो छे पछी पांच पद्यो उपसंहार-आशीर्वादरुप छे।

"Aho Shrut Gyanam"

आ तरंगने **पुटभेदतरंग** तरीके ग्रंथकारे संज्ञा आपी छे। आ तरंग उपर ग्रंथकारनी स्वोपज्ञ अवचूरि छे।

आ पछी 'श्री चतुर्विंशतिजिनस्तवाशीर्वाद' नामनो ह्रद शरु थाय छे। एमा नीचे मुजबना त्रण तरंगो छे–

१. आद्य–जिनाष्टक
२. मध्यम–जिनाष्टक
३. चरम–जिनाष्टक

उपर्युक्त त्रण तरंगोमां पहेलामां श्री ऋषभदेवप्रभुथी श्री चंद्रप्रभसुधीना आठ तीर्थंकरोनी स्तुति छे।

ए रीते बीजा तरंगमां श्री सुविधिनाथजीथी श्रीशांतिनाथ-प्रभुसुधीना आठ तीर्थंकरोनी स्तुति छे। अने त्रीजा तरंगमां श्रीकुंथुनाथजीथी श्री महावीरस्वामीजी सुधीना आठ तीर्थंकरोनी स्तुति छे। अहिं ह्रद पुरो थाय छे।

पछी नीचे मुजबना त्रण तरंगो छे।

(१) क्रियादिगुप्तकरूप विश्व-कालत्रयभावी जिनस्तवाष्टक
(२) श्री जीरापल्लीपार्श्वनाथस्तवाष्टक
(३) श्री शारदास्तवाष्टक

**प्रथम** अष्टकना आठ श्लोकमां क्रियागुप्त, क्रियाकर्तृ–क्रियागुप्तक, कर्तृ–कर्म–क्रियाद्वयगुप्तक आदि चमत्कारी अलंकारो गुंथ्या छे।

**द्वितीय अष्टकमां सुंदर** शब्दानुप्रास–श्लेषादि अलंकारो छे।

तृतीय अष्टकमां श्री सरस्वतीदेवीनी अर्थगंभीर योगिगम्य-गहनस्वरूपवर्णनात्मक स्तुति छे।

"Aho Shrut Gyanam"

पछी 'श्री जिनस्तुतिस्तोत्ररत्नकोश' नामे उत्तर विभाग शरु थाय छे ।

शरुआतमां ३९ गाथानुं स्तोत्र छे. जेमां २४ तीर्थंकरोनी स्तुति (जेमां २० मा मुनिसुव्रतस्वामीनी स्तुति बे छे पाठांतररूपे एक वधु) साधारणतीर्थंकरस्तुति, शाश्वतजिनचतुष्टयस्तुति, पुंडरीक स्तुति, गौतमस्तुति, शाम्ब–प्रद्युम्न–रथनेमि–मरुदेवा–राजीमती आदि सिद्धस्तुति, सिद्धचक्रस्तुति, पछी प्रकीर्णकस्तुतिओ छे ।

आ स्तुतिओ उपर स्वोपज्ञ अवचूरि छे.

अहिं ग्रंथनो एक विभाग पुरो थाय छे ।

बीजा विभागमां श्री शङ्खेश्वरपार्श्वनाथस्तवनम् ।१। तीर्थवन्दना ।२। श्रीवीरस्य पञ्चवर्गपरिहारस्तुतिः ।३। श्री महावीरजिनस्तुतिः ।४। श्री ऋषभजिनस्तुतिः ।५। ह्रींकारवर्णनस्तवनम् ।६। साधारणजिनस्तवः ।७। तथा एक श्लोक ।८। ए आठ कृतिओ अन्यकृत छे ।

प्रथम विभागना कर्ता सहस्रावधानी पू. आ. श्री मुनिसुंदरसूरिजी महाराज प्रभु महावीरदेवपरमात्मानी पाटे ५१ मा छे ।

आ सूरिदेवनो जन्म वि. सं. १४३६ मां थएल ।

सात वर्षनी लघुवये दीक्षा वि. सं. १४४३ मां पू. आ. श्री देवसुंदरसुरि म. पासे ग्रहण करी पू. आ. श्री ज्ञानसागरसुरि म. पासे तेमणे विद्याभ्यास करेल. सूरिवर्यश्रीए बारवर्षनी लघुवये व्याकरण काव्य अने छन्दशास्त्रना विविध विषयोने समजावनार 'श्री त्रैविद्यगोष्ठी' नामे अत्यद्‌भूत ग्रंथ रचेल ।

"Aho Shrut Gyanam"

वि. सं. १४६६ मां वाचकपदवी थएल. पू. आ. श्री मुनिसुंदरसूरि म. ना श्री जयचंद्र, श्री भुवनसुंदर, श्री जिनकीर्ति, श्री रत्नशेखर, श्री जिनसुंदर, श्री भावसुंदर, श्री अमरसुंदर, श्री सोमदेव, श्री सुधानंदन, श्री जिनमंडन, श्री रत्नहंस, श्री साधुराज्य अने श्री विवेकसमुद्र नामना तेर गुरुभाईओ हता ।

पू. आ. श्री देवसुंदरसूरिकृत श्री शांतिनाथ चरित्रनी वि. सं. १४७९ मां लखायेल प्रशस्तिमां पू. आ. श्री मुनिसुंदरसूरि म. ने शांतिस्तव द्वारा 'महामारिनिवारक' अने 'सहस्रावधानी' ए बिरुदथी वर्णव्या छे ।

वली खंभातमां दफरखानसूबाए 'वादी–गोकुल–खंडक' बिरुद आपेल । तेमज दक्षिणना पंडितोए 'कालीसरस्वती' विरुद आपेल ।

आ सूरिवरना उपदेशथी चंपकराज, देवा, धारा विगेरे राजाओअे अने शीरोहीना राव सहस्रमल्ले पोताना देशमां अमारिपटह वगडावेल हतो ।

आ सूरिवरश्रीए सूरिमंत्रनी २४ वार विधिपूर्वक अनेक छट्ठ अट्ठम आदि साथे आराधना करेली जेथी पद्मावती देवी आदि अनेक देवदेवीओ तेमनी सेवामां रहेता ।

तेओश्रीने वि. सं. १४७९ मां आचार्यपदवी मलेली अने वि. सं. १४९९ मां भट्टारक पदवी मलेली. वि. सं. १५०३ ना का. सु. १ ना दिने कोरंटक तीर्थ (कोरटाजी–शिवगंज पासे मारवाड) मां समाधिपूर्वक ६७ वर्षनी वये स्वर्गवास थयो ।

"Aho Shrut Gyanam"

सूरिवरश्रीए नीचे मुजबना नाना मोटा १४ थी १५ महत्त्वना अत्यंत सुंदर चमत्कारिक अलंकारोथी भरपुर ग्रंथो बनाव्या हता.

१. श्री अध्यात्म कल्पद्रुम
२. श्री उपदेशरत्नाकर (स्वोपज्ञवृत्तिसाथे)
३. श्री जयानंद केवली चरित्र
४. मित्रचतुष्ककथा
५. पाक्षिक-सित्तरी
६. शांतरसभावना
७. जिनस्तोत्ररत्नकोश
८. संतिकरं स्तोत्र
९. सीमंधरस्तुति
१०. अंगुल-सित्तरी
११. वनस्पति-सित्तरी
१२. तपागच्छ-पट्टावली
१३. त्रैविद्यगोष्ठी
१४. योगशास्त्र ४ थो प्रकाश बालावबोध साथे.

पू. आचार्यदेवश्रीनी बधी कृतिओमां महत्त्वनी कृति 'गुर्वावली' ग्रंथ जे के तेओश्रीए पोताना गुरु श्री देवसुंदरसूरि म. उपर १०८ हाथ लांबो '**विज्ञप्ति पत्र**' भव्य सुंदर संस्कृत भाषामां अनेक अलंकारो छंदो विविध चित्रोवाला श्लोकोथी लखेल–

जेमांनो ५०० पद्यनो एक विभाग "**गुर्वावली**" नामे गुरुपरंपरा सूचवनारो भाग बहुसुंदर आज सुधी मलतो हतो–

पण पू. आगमोद्धारक आचार्यदेवश्रीए प्राचीन ह. लि. भंडारोमांथी मली आवेल अप्रसिद्धस्तोत्रोना संग्रहमां ते त्रिदश-तरंगिणीमांनो भाग छुटक पानां रूपे उपलब्ध थएल जेनी प्रेसकोपी करावीने जैनानंदपुस्तकालय सुरतना संग्रहमां राखी हती।

पू. गच्छाधिपति आचार्यदेवश्रीए खूबज परिश्रमकरी ते प्रेसकोपीनुं संशोधन करी विद्वानोने साहित्यनो रसास्वाद मले अने पूर्वाचार्योनी विद्वत्तानो परिचय मले ते हेतुथी 'जैनस्तोत्रसंचय'

"Aho Shrut Gyanam"

ना बे भागना संपादन–प्रकाशन पछी आ त्रीजो विभाग पू. आ. श्री मुनिसुंदरसूरि म. श्री आदि रचित चमत्कृतिवालां काव्यो-स्तोत्रोना संग्रहने व्यवस्थित करी सुज्ञ-जनतासमक्ष प्रस्तुत कर्यो छे। त्रिदशतरंगिणीनो प्रथम श्रोत विगेरे स्तुतिस्तोत्रनी बीजी प्रत नहिं मलवाथी एमां कोई कोई स्थले अशुद्धी रहेवा पामी छे छे तेने सुज्ञ-जनो क्षंतव्य गणशे।

देवगुरुकृपाए वर्षोनी कामना पू. गच्छाधिपतिनी निश्रामां श्रुतज्ञानना मार्मिक रहस्यने प्राप्त करवानी पूर्ण थयाना सौभाग्यनी यत्किंचित् अंशे सफलतानी साथे आ संपादनना तेमज कर्त्तांना परिचय आदिनी माहीती आपवारूपे आ प्रस्तावना लखवानी आज्ञा पू. गच्छाधिपतिश्रीनी मेलवी हुं मारी जातने बहुज कृतार्थ अने धन्यभाग्य मानुं छुं।

साधन–संयोग–सामग्री आदिनी यथाशक्य मेलवणी करी आ. प्रास्ताविक नुं आलेखन कर्युं छे।

छद्मस्थसुलभ कोई क्षति आमां रही होय तेनी त्रिविधे २ सकलसंघसमक्ष क्षमाप्रार्थना साथे प्रस्तुतसंग्रहने भावशुद्धिपूर्वक पठनमननादि द्वारा आत्मकल्याणना पंथे धपवामां अचूक उपयोगी साधनतरीके भव्यात्माओ अपनावे ए शुभकामना।

ली.

श्रमणसंघसेवक

**पू. तपस्वी श्री धर्मसागरगणी**

**चरणोपासक मुनि अभयसागर**

वि. सं. २०२१

आसो वद १३

कपडवंज

"Aho Shrut Gyanam"

॥ श्रीजिनेन्द्रो विजयतेतराम् ॥

आगमोद्धारक-आचार्य श्री आनन्दसागर सूरीश्वरेभ्यो नमः ।

सहस्रावधानि-श्री मुनिसुन्दरसूरिप्रवरप्रणीता

# त्रिदश-तरङ्गिणी

जयश्रिप्राप्तिसौभाग्य-श्रेयांसि ददतां सताम् ।
महोदयं समृद्धींश्च, श्रीजिनः कल्पपादपः ॥ १ ॥

*

शब्दरूपं मङ्गलाष्टकमाविष्कुर्वन् श्रीमहापर्वविज्ञप्ति-
त्रिदशतरङ्गिणीप्ररोहमूलं पद्महृदतुलां कलयत्ययं श्लोकः ।

सान्द्रानन्दैः सुरेन्द्रैः प्रकटितमहिमोल्लासितश्रीप्रकर्षं,
दुर्गग्रन्थप्रमाथप्रथितविभुबलक्षिप्तदुष्कर्मशत्रु ।
एकान्तात्यन्तसाताभ्युदथि विजयते केवलं यस्य राज्यम् ,
त्रैलोक्यव्याप्यनन्तं स जयति भगवान् कोऽपि सर्वज्ञराजः ॥ १ ॥

ध्यानाभ्यासप्रकर्षात् पवनसहचरीभूतचेतःप्रशान्ति,
सम्प्राप्यो ( पाप्रजापात् ) सहजनिरुपमानन्दसान्द्रप्रबोधैः ।
योगीन्द्रैः कुण्डलिन्यां नियमितमरुदापूरितब्रह्मरन्ध्रै-
र्ध्येयं यस्य स्वरूपं स जयति पुरुषः कोऽपिसर्वार्थवेदी ॥ २ ॥

यस्य ब्रह्मार्णवान्तर्विधिहरिपुरभिद्वज्रिमुख्यामराणां,
ज्ञानश्रेणी मुनीनामपि परिमिलिता निम्नगाऽऽलीव भाति ।
तेजांस्यादाय वाब्दा इव जलनिचयान् भानुवद् यातुलिश्वं,
प्रीणन्ति(णाति) स्वावबोधं सकलभुवनवित् कोऽप्ययं नः प्रदेयात् ॥३॥

* जयः श्रीः सौभाग्यं श्रेयः सत् महोदयः समृद्धिः कल्पः ( इति मंगलशब्दाष्टकम् )

"Aho Shrut Gyanam"

सिद्धानन्तगुणस्य यस्य विधिना प्रक्षालितस्याभितो,
व्याप्याशेषजगत्त्रयं स्थितवतो व्योमद्रहे ज्योतिषः ।
उत्तीर्णास्तुषराशयो ग्रहगणव्याजादमुष्य प्रभोः,
सर्वज्ञस्य पदावनुत्तरचिदानन्दाप्तये तोष्टुमः ॥ ४ ॥
सान्द्रानन्दमुपास्महे भगवतो निःश्रेयसश्रीपतेः,
सर्वज्ञस्य पदाम्बुजं निरवधौ प्रज्ञानदुग्धाम्बुधौ ।
अभ्रं शैवलतिवसा (क्षमा) धरगणाः शङ्खाद (य) यन्त्यर्णवाः,
पीयूषन्ति च मौक्तिकन्त्युडुगणा मीनन्ति विश्वानि च ॥ ५ ॥
सम्यक्तत्त्वप्रबोधेऽनघविधिनिरुपध्यातसाम्यैक सात्म्याद्,
हेयोपादेयचिन्ताव्यतिकरविधुरीभावमुल्लङ्घ्य वृत्तौ ।
सर्वोपाधिप्रणाशादुपरतसकलद्वन्द्वभूयो विवर्त्त—
स्तादृक् तैरेव लभ्यः क्षिपतु सकलदृग्गोऽतिनिन्द्यां स विद्याम् ॥ ६ ॥
यत्सत्तां परिनिश्चिनोति विलसच्चिन्तारतस्यानुमा,
भावानामनुमानगोचरतया चाध्यक्षमानार्पणम् ।
शास्त्रोक्तार्थततेर्यथावदविसंवादित्वमप्युच्चकैः,
सर्वज्ञं तमुपास्महेऽस्तु कुमतध्वान्तप्रबोधाप्तये ॥ ७ ॥
आज्ञाराधनतत्परेषु विदधत् सम्यक्पदं निर्वृतो,
नाकश्रीललितान् दधाति विषयान् सन्न्यायमुद्रां दधत् ।
शुद्धोपायगुणप्रकर्षकलितं यच्छासनं राज्यव—
द्विश्वव्यापि जयत्यनन्तमहिमाधारः स सर्वज्ञराट् ॥ ८ ॥

इतियुगप्रधानावतारबृहत्तपागच्छाधिराजश्रीपरमगुरुश्रीदेवसुन्दरसूरिचरणकमल सौभाग्यगुणमहिमार्णवानुगामिन्यां विनेयजनपरमाणुश्रीमुनिसुन्दरमणि-हृदयहिमवदवतीर्णविस्तीर्णगुरुप्रभावपद्महृदप्रभवायां श्रीमहापर्वविज्ञप्ति त्रिदशतरङ्गिण्यां प्रथमे नमस्कारमङ्गलस्रोतसि मङ्गलशब्दश्लोक सर्वज्ञाष्टकनामा प्रथमस्तरङ्गः ॥

"Aho Shrut Gyanam"

यस्य ज्ञानसरोवरे निरवधौ वातोद्धताम्भःकण-
प्रख्योडुप्रकरायितं जलजति व्योमाष्टकाष्ठादलम्।
सूर्याचन्द्रमसौ मरालतुलनां धत्तश्च रातु प्रभु-
र्योगिध्यानपरम्परापरिचितश्रेयः स सर्वार्थवित् ॥ १ ॥

इतितरङ्गान्तराशीर्वादः, तरङ्गचूलाप्रायः ॥

एवं नित्यनिरञ्जनाव्ययपदं सर्वार्थसंवेदिनं,
शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमं यः स्तुते ।
सर्वाभीष्टसुखोच्चयैरविरतं स्फूर्जत्प्रमोदाद्वयो,
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ १ ॥

इतितरङ्गप्रतिचूलाऽपि ।

देवा यस्य शिवश्रियस्त्रिजगतश्चेतांस्यतीता द्विधा,
ब्रह्मेशाच्युतचन्द्रभानुमघवन्मुख्याश्च तत्प्रार्थकाः ।
सर्वाशाप्रसृताः शतं च विदिताः शाखाः परानन्दचिद्-
रूपः कल्पतरुर्नवः स ददतां श्रेयो युगादिप्रभुः ॥ १ ॥
राज्यं सूनुषु दानमासनकलाज्ञानप्रभावांशकान्
यः कल्पद्रुमचन्द्रभानुमुनिसन्म (त्तीर्थां)शकेषु न्यधात् ।
मन्ये मुक्तिपुरीं व्रजन् जनहितायैतानि तत्सन्तति-
ष्वाप्यन्ते ह्यधुनाऽप्यसौ विजयते श्रीमान् युगादीश्वरः ॥ २ ॥
मुक्तिर्यस्यप्रयातस्त्रिभुवनजनतोद्भूतदुःखार्तिताप-
व्यापध्वंसाय ध्माताजडिमजलनिधेर्नूनमादाय विन्दून् ।
चिन्तारत्नं चकारामरतरुसुरभीकुम्भमुख्यांश्च भावान्,
स श्री नाभेयदेवो वितरतु परमानन्दसम्पद्विलासम् ॥ ३ ॥
विश्वं यस्यालवालो महिमभरतरोः कल्पवृक्षाश्च शाखा-
श्चिन्तारत्नानि पुष्पप्रकरसमुदयः कामकुम्भाःफलानि ।
सिक्ता ध्माताधिकूपाहृतजलनिभृतैर्वारिदस्फारकुम्भै--
र्जीयात् कश्चित्पुराणस्त्रिभुवनमहितः पुरुषोऽसौ युगादिः ॥ ४ ॥

"Aho Shrut Gyanam"

बौद्धा बुद्ध इति प्रबुद्धमतयो ब्रह्मेति च ब्राह्मणाः,
विष्णुश्चेति च वैष्णवाः शिव इति ध्यायन्ति शैवाश्च यम् ।
अर्हन्नित्यपि चार्हतास्तदखिलध्यानैकविश्रामभू—
र्व्यक्ताव्यक्तगुणः स पातु भगवानाऽऽदिप्रभुः सर्वगः ॥ ५ ॥
श्रीनाभेः परितोष्टुमस्तनुभुवः पादान् क्षमाभृद्गुरोः
स्फूर्जन्नीतिनदीप्रवाहजनकस्योच्चैः पदं यच्छतः ।
वंशान् यत्प्रभवानसङ्ख्यसमयं सद्वृत्तपर्वोल्लस—
च्छश्वन्मौक्तिकसम्पदो गतमलत्रासाः समाशिश्रियुः ॥ ६ ॥
आज्ञां यस्य समस्तवस्तुनिकरः स्याद्वादमुद्रामयीं,
दण्डाद्बिभ्यदिव स्वभावविगमान्नैवातिचङ्क्रम्यते ।
वीक्ष्यैवैतदतिक्रमोद्भवफलं भव्योम-पद्मादिकं,
त्रैलोक्याधिपतिं स्तुमः सुरनराभ्यर्च्यं तमादिप्रभुम् ॥ ७ ॥
दुष्कर्मारिप्रमाथात् परममहिमकं सुप्रयुक्तैर्नयाद्यैः,
स्फीतीभूतार्थसूत्रं विभवसुखकरं रक्षणीयक्षमेव ( मंवै
धर्मं राज्यं च लब्ध्वा त्रिभुवनमहितं यत्प्रणीतं जनाः स्युः
स्तुत्या देवेन्द्रवृन्दैरपि स विजयते नाभिभूरादिनाथः ॥ ८ ॥

इतियुगप्रधान॰ प्रथमे नमस्कारमङ्गलस्रोतसि, श्रीयुगादिस्तवनाष्टकनामा
द्वितीयस्तरङ्गः ।

यो धर्म्मव्यवहारसङ्गतकलाः प्राक् शिक्षयन् प्राणिनो —
ऽशाशासीत् किल यां प्रकाशनकलां चन्द्रार्कदीपादिका
स्तामद्यापि निदर्शयन्ति भुवने ते प्रत्यहं लेशतः,
श्रेयो यच्छतु सादिमो जिनपतिर्विश्वेप्सितार्थप्रदः॥ १ ॥
इतिद्वितीयतरङ्गचूलाकल्पः श्रीयुगादिजिनाशीर्वादः ।
एवं नित्यनिरञ्जनाऽव्ययपदं श्रीमद्युगादिप्रभु—
शक्रालीमुनिसुन्दरस्तवगणैर्नू तक्रमं यः स्तुते ।
सर्वाभीष्टसुखोच्चयैरविरतं स्फूर्जत्प्रमोदाद्वयो,

"Aho Shrut Gyanam"

मोहद्वेषि जयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ २ ॥

इतितरङ्गप्रतिचूलाऽपि

जयश्रियाऽऽश्रितकेवलरूपया, दमलया मलयामल ! यातरुट्

जगति शान्तिजिनाऽमरपादप-प्रतिमताऽतिमताऽलिमतान्तरुक् ॥ १ ॥

जितरवे तव वाणिसुधां पिबन्, वरमते रमते रमतेऽञ्जसा ।

अभिलषन् शिवसम्पदमत्र नो, नरमणी रमणी रमणीयके ॥ २ ॥

त्यजसि नाथ ! कदाचन चेन्मनो, दममना ममनाऽमम नायक ! ।

न विशतां मरुतां तदिदं श्लथ, कमलयाऽमलयाऽऽमलयाऽऽलय ॥ ३ ॥

शमरथस्य न के तव धुर्यतां, मधुरयाऽधुरयाऽधुरयाद् गिरा ।

वशिगणेन यथा खलु तन्मनांस्यनवमानवमानव मा धूनात् ॥ ४ ॥

स्पृहयतो विषयांस्तव सर्वतो, विरतये रतये रतये न खे ।

अपहरन्ति धियं धिगिमेऽपि मे, परमता रमतारमतागमः ॥ ५ ॥

त्वदुपदेशरमान्मनसाविभो, शमसयाममया मम याच्यते ।

गतभवेच्छमनन्तसुखामिमां, शिवरमां वरमांबर ! मां नय ॥ ६ ॥

सुतपसां गमसारतरागमाद् गमय सामयमामयमाश्रितम् ।

शिवरमाऽस्तु वशा विनतैव मे, प्रभवता भवता भवतारणा ॥ ७ ॥

वितरणे जगतां हितसन्तते-र्वितरता तरताऽतरतारक ! ।

शिवपदस्य जिनेश्वर ? सङ्गमं, परमया रमया रम यारमे ॥ ८ ॥

एवं स्तुतस्त्रिदशदानवमानवाऽर्च्यो, भक्त्या जगत्त्रयपतिः सकलार्थवेदी।

शान्तिर्जिनो भवभयार्त्तिहरो विलासं

देयान्महोदयपदाऽप्रतिमश्रियं मे ॥ ९ ॥

इतियुगप्रधाना० नमस्कारमङ्गलद्योतसि श्रीशान्तिजिनयमकस्तवाष्टकनोमा

तृतीयस्तरङ्गः ॥

श्रीशान्तिर्जगदेकमङ्गलततिप्रोद्यल्लताकन्दल—

प्रोल्लासाम्बुधरो भवाद्भवभृतः पायान्नताऽऽखण्डलः ।

रूपस्यैव निरूपणार्थमदधाच्चक्षुःसहस्रं हरि—

र्वक्तुं यस्य गुणांस्तथोरगपतिर्जिह्वासहस्रद्वयम् ॥ १ ॥

"Aho Shrut Gyanam"

इतितृतीयस्तरङ्गचूला श्रीशान्तिजिनाशीर्वादरूपा ॥

एवं नित्यनिरञ्जनाऽव्ययपदं श्रीशान्तिनाथं मुदा,
शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमं यः स्तुते ।
सर्वाभीष्टसुखोच्चयैरविरतं स्फूर्जत्प्रमोदाऽद्वयो,
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ २ ॥

इतितृतीयतरङ्गप्रतिचूला ॥

सुरासुरोर्वीश्वरराशिसेव्यं, विशालवीर्यं सुयशोविलासम् ।
शैवेयसार्वं शिवशीर्षहीरं, शैवश्रियः शंविसराय सेवे ॥ १ ॥
श्रितोत्सवः शंवरवैरिवारविलाससालावलिहव्यवाहः ।
यशःसरस्यां वरलेशलीलां, शिश्राय यस्येह सरोरुहारिः ॥ २ ॥
विशालसंसारविलासवार-वारीशशोषे रुसिरोवरोवः,
सार्वेश्वरो रोषविलोल वीथी—शरीरिसर्वाशिवराशिवह्नी ॥ ३ ॥ ?
वशेश्वरं सिंह इवासि हंसि विश्वाविलांहोविसरं विहास्य (विहाय)।
विहाशश्यास्य (विध्वस्य विद्वाशयमेव सा) वसावलिं शिवश्रीविषयं-
यियासुः ॥ ४ ॥ ?
अवार्यवीर्यालयविश्वविश्राशोल्लासिवल्लीवरवारिवाह ! ।
उल्लासय स्वांह्रिसरोरुहस्य, सेवारसं यस्य शिवे यियासा ॥ ५ ॥
ईशास्य यस्योरुयशोविलासाः, शेषाहिहारेश्वरसावहेलाः ।
आशासु सर्वास्विह शार्वरालः, संशिश्रियुः सारशारुलीलाम् ॥ ६ ॥
सुश्रेयसालीसरसीरुहेषु यो हेलिलीलः सुवशाविलासैः ।
सारैरवश्यः स्ववशी विवेश, शिवालयं शैशवशीलशीलः ॥ ७ ॥
शैवेयसार्वः स शिवश्रियं वो, रायाह्वयो शैलरसारुहेषु ।
सः सारवैरस्यहरः शरीरिराशेर्वयस्यो हरिवंशसूरः ॥ ८ ॥
स्तुतोऽपवर्गान्तरसंस्तवेन, भक्त्या मयाऽप्येवमुदारमोदात् ।
श्रीनेमिनेता भवतात् प्रसद्य, दाताऽपवर्गान्तरसम्पदां मे ॥ ९ ॥

इतियुगप्रधाना० नमस्कारमङ्गलस्रोतसि पञ्चवर्गपरिहारश्रीनेमिजिनस्तवाष्टकनाम। चतुर्थस्तरंगः

"Aho Shrut Gyanam"

नूनं येन जगद्विडम्बनपटुर्दासीकृतेशाच्युतः
कामोऽधानि तदाद्यभूच्चपलतादोषः श्रियः प्राग् न तु ।
सारापत्यवियोगजारतिभृतः स्थेमाहि मातुः कुतः?,
श्रेयो रातु सुखाकृतत्रिभुवनः श्रीनेमिनाथः स वः ॥ १० ॥
इति चतुर्थतरङ्गचूला श्रीनेमिजिनाशीर्वादरूपा ॥
अञ्जनश्यामलेनाऽपि येनाङ्गिनां, तन्मयीभावमाप्तानि चेतांस्यहो ।
चारुवैशद्यमाबिभ्रते श्रेयसां, सन्ततिं रातु नेमिर्जिनेन्द्रः स वः ॥११॥
इति चतुर्थतरङ्गस्य प्रतिचूलाऽपि
एवं नित्यनिरञ्जनाऽव्ययपदं श्रीनेमिनाथं मुदा,
शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमं यः स्तुते
सर्वाभीष्टसुखोच्चयैरविरतं स्फूर्जत्प्रमोदाऽद्वयो,
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ १२ ॥
इति चतुर्थतरङ्गसमर्थनापङ्क्तिः ॥
जन्मस्नात्रे तु यस्याद्भुतमहिमभराऽद्वैतरूपस्य देह—
स्पृष्टैः पाथःप्रवाहैः सुरगिरिशिखरे प्रस्फुरद्भिः समन्तात् ।
जज्ञुः सेकप्रभावादभिमतफलदाः कल्पवृक्षा अपीमे,
स श्रीदेवो ( जगत्यां ) जयति तनुभृतां चिन्तनाऽतीतदेयः ॥ १॥
पाथोथैः वारिवाहैः किल सहगतया विद्युता वारिराशौ,
प्राप्तैः संयोगमाप्याम्बुनिधिहुतभुजोऽजानि पद्यानि वह्निनः ।
लेभेऽसौ यत्प्रवृद्धिं कमठहठभरप्रेरिताऽकालकालः,
स्फूर्जज्जीमूतमालोद्भवदऽतुलजलासारसिक्तोऽपि युक्तम् ॥ २ ॥
चक्रे यस्योपरिष्टाद्भुजगकुलपतिः साक्षिणि ध्यानवह्नौ,
कैवल्यश्रीविवाहः फणमणिकिरणैर्मण्डपं मण्डिताशम् ।
दैत्येन्द्रश्चैष तेने जलधरपटलातोद्यनादान् विचित्रान्,
स श्रीपार्श्वप्रभुर्मे भुवनभयहरो रातु निःश्रेयसाप्तिम् ॥३॥ युग्मम् ॥
यस्य स्फारांतरङ्गप्रसृमरतिमिरग्रासविज्ञानलीलां,
सप्तद्वीपद्युनाथाः फणिफणमणिभामण्डलव्याजभाजः ।

"Aho Shrut Gyanam"

याचन्ते सेवमानाः सममिव मिलिता विष्टपप्रेष्ठदेष्टा,
पिष्टारिष्टारिकष्टः स भवतु भवतामिष्टसंसृष्टिपुष्ट्यै ॥ ४ ॥
यस्यापारप्रभावप्रवरजलनिधौ शर्करीभूय चक्रु—
श्चिन्तारत्नानि वासं त्रिदशघटगणाः कम्बुकीभूय चापि ।
नानारूपैश्च भेजे जलचरपदवीं देवधेनुः सुरद्रु—
श्रेणीतीरद्रुमत्वं प्रतिदिनममराः स्नातकत्वं च बभ्रुः ॥ ५ ॥
मन्त्रास्तद्घोषरूपास्ततिरपि ववृधे शीकरैरौषधानां,
वीचीनां चानुकारो बहुविधमभितो नर्तितानां मरुद्भिः ।
लिप्तैर्यन्त्रैश्च जज्ञुर्महिमगुणपदं तत्तदा द्योतिकानि ,
स्यात् सेवा निर्मिता यन्नहि हि सुमहतां निष्फला लेशतोऽपि ॥ ६ ॥
युग्मम् ॥

नूनं यन्नाममन्त्रे सकलसुखरसाः संवसन्ति प्रकामं,
शब्दार्थानां च योगो लसति मम मनस्यत्र तादात्म्यमेव ।
एताः सद्यः स्फुरन्ति प्रकटमसुमतां यत्तदुच्चारमात्रात्,
पार्श्वो विश्वार्चनीयः स भवतु सुलभासेवनो मे सदाऽपि ॥ ७ ॥
विश्वत्राणप्रणालीप्रकटितकरुणाऽपारपाथोऽधिसारः,
सर्वाभीष्टार्थदानावगमितमहिमाम्भोधिरद्धैतधैर्यः ।
श्रीमान् विश्वावभासी फणमणिकिरणोल्लासिताशाःप्रकाशः,
कुर्यात् पार्श्वप्रभुर्मे त्रिभुवनमहितोऽनन्तसम्पद्विलासम् ॥ ८ ॥
इति श्रीयुगप्रधाना० नमस्कारमंगलस्तोत्तसि श्रीपार्श्वजिनस्तवनाष्टकनामा पञ्चमस्तरंगः ॥

धत्ते कल्पलता स्वमूर्तिसरसि प्रोद्यन्मणीपल्लवान् ,
सप्ताहीन्द्रफणच्छलात्रिजगतीरक्षैकदीक्षागुरुः ।
सप्तद्वीपसमुद्रगाङ्गिनिकराभीष्टार्थदानाय यः,
स श्रीपार्श्वविभुस्तनोत्वविरतं श्रेयस्ततिं भाविनाम् ॥ १ ॥
इतिपञ्चमतरंगचूला श्रीपार्श्वजिनाशीर्वादरूपा ॥

दशावतारो विमलाञ्जनद्युति-महाप्रकाशः सकलार्थदर्शनः ।

"Aho Shrut Gyanam"

स्नेहक्षयान्निर्वृतिभाक् सुपावकः, श्रीपार्श्वदीपोऽस्तु शिवश्रिये सताम्॥
इतिपञ्चमतरङ्गस्य प्रतिचूला
एवं नित्यनिरञ्जनाऽव्ययपदं श्रीपार्श्वनाथं मुदा, ( शेषं पूर्ववत् )
इतिपञ्चमतरङ्गस्य समर्थनापङ्क्तिः ॥

अथ श्रीत्रिदशतरङ्गिण्यां प्रथमे मङ्गलस्रोतसि षष्ठः तरङ्गः ।

जयश्रीसदनं योऽभूद्, विजित्य मदनद्विषम् ।
महानन्दपदं वीरं, पञ्चभिस्तं स्तुवेऽक्षरैः ॥१॥
रैरिरीरोरुरारोरे-रेराऽऽरारीरारारुरा ।
राऽररं रारेऽरुरुरु-ररोरा ररीररा (रराररिः) ॥२॥

विभागः-रैरिरी-ईर-उरु-रा-रोर--ईर-ईर-आरारीः—आर-अरु-रा रैरिरीरोरुरारोरेरेरारारीरारारु रा। रारर-रारे-अरु-रुरुः-अररो-रा-ररीररा ( रराररिः )।

अथ वाचयितॄणां प्रयासरक्षासौकर्यार्थमस्य पुटभेदतरङ्गस्य किञ्चिद्वृत्तिवेला प्रादुश्चेक्रीयते। तथाहि-तत्र प्रथमः श्लोकः स्पष्ट एवेत्युपेक्ष्यते। द्वितीयश्चैकाक्षरः—'रैरिरी'त्यादि। व्याख्या-हे-वीरेति सम्बोधनं सौकर्याय गम्यते। हे रैरिरीरोरुरारोरेरेर! राः स्वर्णं, रिरीः-पित्तलं, उपलक्षणात्सर्वधातवः, ईरेण-इच्छया अर्थिनामित्यर्थः, यद् उरु-वरिष्ठं, रा-दानं तेन रोरान् रङ्कान् ईर-यति-प्रेरयति दानग्रहणार्थं यः अणि रैरिरीरोरुरारोरेरः, स चासौ ईरश्च-लक्ष्मीदश्चेति। क्रियायां मध्यमपुरुषादिना त्वमिति गम्य-मानत्वात् त्वं, आरारीः, 'ऋं प्रापणे' चेति धातोर्यङ्लुपि अद्यतनी सौ सिचि द्वित्वे ऋतोऽति 'रीरौ चे' [ हैम०४।१।५६ ] ति रागमे ईति चेति ढ इति [ हैम० १।३।४२ ] सिचो लोपे 'सिचि परस्मै'

"Aho Shrut Gyanam"

[ है०४।३।४४ ] इति वृद्धौ च निष्पत्तिः। भृशमपुनरावृत्त्या प्राप्तवानित्यर्थः। त्वं किमित्याह-आरं-वैरिणो बाह्यस्य चान्तरस्य च अरु ( मङ्गलं ) [ णं ] तद्धि यथा नरमुच्चाटयति तथा त्वं द्विविधमप्यरिमिति भावः। जातौ एकवचनं। तथा राऽररमिति। ररस्य ग्रहणात् ( ? ) हे र ! 'रः कामे, तीक्ष्णे विश्वानरे नरे। रामे वज्रे च शब्दे स्यादि' त्येकाक्षरनिघण्टुवचनाद्, वज्र! कस्मिन्? रारे। रः-कामः स एव बहुभ्योऽरिभ्यो दुर्जयत्वाद् आरमिवारं-अरिसमूहस्तस्मिन्। त्वं किमरारीरित्याह-अररमिति। ऋधातोरौणादिके अरप्रत्यये निष्पत्तेः गृहं, कीदृशं? अरुः, 'रुः सूर्ये रक्षणेऽपि च। भये शब्दे चे' ति सुधाकलशनिघण्टुवचनात् निर्भयं '-इहपरलोगादाणमकम्हा-आजीव-मरणमसिलोए' इत्यागमोक्तसप्तभयरहितत्वात् मोक्षरूपमितिभावः। अत्र 'अ इ उ वर्णस्यान्तेऽनुनासिकेऽनीदादेः' दधिं दधि मधुँ मधु इत्यादिवत्। त्वं कीदृशः? री ( रु-भयं ) तस्य रु-रक्षणं यस्माद् यस्य वाग्यपदेशः ( ? ) तथा अररोरा। उणादिनिष्पत्त्या अररं-कपाटः 'तद्वद्विशालतादिगुणमुरो-हृदयं यस्य स तथा। 'ररीररा' इति, रा-नरास्तेषां रीभीतिः, सैव रो-वैश्वानरः, तस्मिन् रा- मेघ इव मेघः, तथा अत्र ररारिरितिपाठे तु रा-नराः ता-रायति-शब्दयति रक्षार्थं यः स चासौ अररिश्च-कपाटश्चेति ॥ २॥

**सुराऽसुररसासारि-सारसाराऽरिराऽरसः।**
**संसारसरसीसूरु-सूरः संसारिसाररः ॥३॥**
**( यद्वा)-सुरासुररसासार-सारैररससंसरः।**
**संसारसरसीसारि--संसारिरसुरारिसः। ॥४॥**

इति सुसङ्गतः पाठः। इति तृतीयो मूलश्लोकः।

विभागः-सुर-असुर-रसा-सारि-सार-सार-अरि-र-अरसः । संसार-सरसी-सु-उरु-सूर-, संसारि-साररः- ॥ २ ॥

"Aho Shrut Gyanam"

यद्वा-सुर-असुर--रसा--सारसारैः--अरस-संसरः-संसार--सरसी-सारि-संसारि-र-सुरारिसः ॥

व्याख्या--सुरा-देवाः, असुरा--दानवाः--रसायां--पृथ्व्यां सरन्तीत्येवंशीला रसासारिणो-मानवाः, तेषां, 'सारो मज्जास्थिरांशयोः । बले श्रेष्ठे च सारं तु, द्रविणन्याय्यवारिषि' [हैम०] त्यनेकार्थवचनाद् ये साराः-श्रेष्ठाः, सारा-बलानि, तेषां क्षयकारित्वादरिः-वैरी यो रः- कामः, उपलक्षणत्वात् पञ्चधाऽपि कामसुखानि, तत्र अरसः-न चित्ताश्लेषवान्-न प्रीतिमान् तेभ्यो विरक्त इति भावः । तथा संसार एव सरसी, तस्यां विषये शोषकारित्वात् सुष्ठु-अतिशयेन, उरुः--गरीयान्, दिनगतगौरवस्य दिनकरेऽप्युपचरितत्वात् अर्थात् ग्रीष्म सम्बन्धीति लभ्यते । सूरः-सूर्यः, ग्रीष्मसूरो यथा सरांसि शोषयति, तथा वीरजिनः संसारमितिभावः । संसारश्चित्तो एषामस्तीति संसारिणः-संसाराभिलाषिणो जीवाः, तेषां साराणि--द्रव्याणि, रातीति आतोडोऽह्वावामः [है०५।१।७६] इति डेन तथा, प्रायो बहुजीवानां संसारसुखेष्वेव साभिलाषत्वात् तेषां च द्रव्यमूलत्वादेवमुपन्यासः । तेन चतुर्ष्वपि यथाजीवाभिलाषं दातेति तत्त्वं । अयं पाठः किञ्चित्प्रसृतत्वात् पूर्वं व्याख्यातः । अपरस्तु सुगम एवमुन्नेयः-सुरासुराणां रसायाश्च-तात्स्थ्यात् तद्व्यपदेशात् मानवानां च सारसारैः न रसं संसरतीत्यचि [ है०५। १।४९ ] उणादिके अप्रत्यये वा तथा [ त्व ] अत्र रसं संसरतीति वाक्ये भावार्थमात्रकथनं, तत्त्वतस्तु संसर इति च पृथग् निष्पाद्य पश्चात् कर्मादिना योज्यते, अन्यथा प्रत्ययौ न स्यातामिति । तथा संसार एव मूढानां रसप्रदानरतिचित्तविश्रामकरागजाड्यबहुलत्वादिना सरसी, तत्सारिसंसारिणां यो रः-कामः, स एव सर्वदेवानां विडम्बकत्वात् सुरारिः-दैत्यः, तथा, ( सुरारिं स्यतीति सुरारिसः) 'षौंच् अन्तकर्मणीति' स्यतीति 'आतो डो०' [है०५।१।७६] इति डे तथा । अत्र पाठद्वयात्मके श्लोके अग्रेतने च श्लोके विशेष्य-

"Aho Shrut Gyanam"

पदं [‘रायं राय’ मित्यादि ] पञ्चमश्लोकगतं च श्रीवीर इति ज्ञेयम्। अर्थतः संलग्नत्वेन कुलकत्वादिति। इति सुसङ्गतः पाठः।

मूलश्लोकः ॥ ३ ॥

**वीरो वर्वरवीरारि-रवैरोर्वीवरो विराः।**
**वारिरोरुवरारावो-रारवाराऽरिरीरवाः ॥५॥(मूलश्लोक४)**

विभागः—वीरः-वर्वर-वीर-अरिः-अवैर-उर्वीवर-वि-राः वीरो-वर्वरवीरारिवैरोर्वीवरो विराः। वारिर-उरु-वर-आरावः-वारिरोरु-वरारावः, र-आर-वार-अरिरी-र-वाः रारवारारिरीरवाः।

व्याख्या—वीरो० स्पष्टः। नवरमुणादिनिष्पत्त्या वर्वरः-कामः(वीरारिः) अवैरा उर्वीवराः-राजानः यस्माद्,विगताः परित्या-गाद् रायो-धनानि यस्य, वारिः-मेघः तस्येव उरुः-गरीयान् योजनगामीत्यर्थः। वरः साममाधुर्यादिपञ्चत्रिंशत्सङ्ख्यगुणोपेतः, आरावः-शब्दः यस्य स तथा। तथा रस्य-दुर्वारत्वात् तीक्ष्णस्य, आरस्य,–बाह्यस्याऽऽभ्यन्तरस्य चारिसमूहस्य, वारे-निवारणे, अथवा बाह्यान्तरवैरिणामिति नष्ट ( अष्ट ) भेदत्वात् आराणां–अरिसमूहानामपि वारे-समूहे, अरि-चक्रं, तद्वत् स्मृतिप्रणामा-दिभिर्न व्यथते, तद्घातक इति भावः। रीरवाः। रिः-भ्रान्तिः, सैव रो-दवः, तस्मिन् वाः–पानीयं तद्वत् तदुपशमहेतुरित्यर्थः।

**रायं रायं रिरीरायो, यां ययाऽऽर्याऽर्ययाऽऽययौ।**
**रेराऽरियाऽरराऽऽरार्या—रेरोरोरूय रोरराः ॥६॥**

**(मूलश्लोकः ॥ ५)**

विभागः—रायं-रायं-रीरी-रायः-यां ययार्या र्य याऽऽययौ रेर-अरि-य-अरर-आरार्या-रा-इरः-रेराऽरियाऽरराऽऽरार्यारेरः, रोरू-यरोरराः।

व्याख्या—रायं रायं-दत्वा दत्वा,रिरीश्च–पित्तलानि, उप-

"Aho Shrut Gyanam"

लक्षणत्वाद् रजतादीनि च, रायश्च–स्वापतेयानि, 'गामश्वं पुरुषं पशु'मित्यादिवत् समुच्चये चोऽत्र गम्यः। यां–प्रकरणात् प्रव्रज्यामयीं लक्ष्मीं, समवसरणादिरूपां निसङ्गताकालभाविनीं तीर्थकृल्लक्ष्मीं वा, यः श्रीवीरः ( रोर्यः ) [है०१।३।३६ ] आर्याणां–सुजनानाम्, अर्यः-स्वामी,(रोर्यः) आययौ–प्राप्तवान्। यः कीदृशः? रेरारियाररारार्या–रेः अति (इति राणां)–नराणां राः–तीक्ष्णाः, ये अरयस्तेषां यस्य-यमस्य, यद् अररं–गृहं, तत्र आरार्या–आटाट्या-भृशं गतिः लोकरूढ्या शरणमिति भावः। तां राति-ददाति या, ईदृशी इरा-'इराम्भो वाक्सुराभूमिष्वि' तिहैमवचनात् वाक्-देशनालक्षणा यस्य स तथा, भव्यनरतीव्ररागाद्यरिघातकदेशना इतिभावः। रोरूयाः( अचि। [है०५।१।४९] (नोतः) [है०३।४।१६] आपद्गतया भृशं रोदनोच्चारा कृतः ( ? ) रोराः ( रङ्काः ) तेषां रि ( राः ) हेतुत्वाद् धनम्॥ ५॥

**माराऽऽरामामरोमोर्मि-रामामारममाररम्।**
**मारीरामारमामार ! ररमारां ममामम ! ॥७॥**
**(मूलश्लोकः ६)**

विभागः–मार–आराम–अमर-उमा-ऊर्मि-रामा-मा-आरं-अ-मार-रं-मारी–रामा–रमामार–[ममाररा]–मारी र-आमा–रमा मार ! र-र-मारां–मम-अमम-मारीरामारमामार! ररमारां ममामम।

व्याख्या–मारा०मारस्य-कामस्य, विश्रान्तिहेतुत्वात् आराम-सदृश्यो या अमराणां 'उमोर्मिरामा' इति, उमाः-कान्तयः, तासा-मूर्मयः–कल्लोलाः, बाहुल्यादेवमूर्मिशब्देन व्यपदेशः, ता एव गुण-गुणवतोरभेदोपचारेणैवं व्यपदेशात् उमोर्मिभाजः याः रामाः-स्त्रियः, तासां मा-लीलादिलक्ष्म्यस्तद्रूपैः आरैः-अरिसमूहैः, 'अमारर' इति। न मारं 'मारोऽनंगे मृतौ विघ्ने मारी चण्डयां जनक्षये' इति (हैम०)

"Aho Shrut Gyanam"

वचनात् विघ्नं, प्रक्रमाद् ध्यानस्य रीणाति-याति यः कचित् [है०५-१-१७१] डे स तथा। मारी-जनक्षयः. तां रान्ति-ददति. आमा-रोगाः, रमा, तस्या-मारो-विनाशः, मारहेतुत्वात् मार इति व्यपदेशः। सम्बोधनं चेदं। रः-कामः, स च रो-दहनः, रः-तीक्ष्णे [यो] रः-कामः इति वा तं माराम् आदाय, (?) यत्तदोर्नित्याभिसम्बन्धात् स इति क्रियायां मध्यमपुरुषादिना त्वं चेति गम्यं-मम हे अमम ! इति कुलकम् ॥ ६ ॥ ( इति मूलषष्ठश्लोकव्याख्या )

**ययीममायामयमाययौ य याऽऽयाय्यामयामयमाऽययेयः।**
**योयूययायायममेयमाय-यामोमयायाऽमम मामयामः॥८॥**

इति सुसङ्गतः पाठः।

विभागः--ययीम्--अमायामयम्-आययौ-ययाऽऽयाम याय्या ऽऽमय-म-अय--येय.--ययीममायामयमाययौययायामयाय्यामय-माययेयः। योयूय-यायायं। अमेयमायो, यामोमयाया-ऽमम मामय-अमा ( म० )।

व्याख्या--ययी०ययीमिति। याधातोः 'यापाभ्यां द्वे च' (उणा०) [७१४] इति किदीप्रत्यये द्वित्वे च सिद्धौ मोक्षमार्गम्, अमायामयः आययौ च य इति सम्बन्धः ( रोयः ) [ है०१।३।२६] कीदृशः ? इत्याह-आयामं-विस्तारं यातीत्येवंशीला आयामयायिनः, ये आमयाः-रोगाः, तान् मिनोति-हिनस्तीति कचित् [है०-५।१।१७१] डे, तथा अयेन-शुभदैवेन, यायते 'गत्यर्था ज्ञानार्थाः' इति वचनात् यायते-प्राप्यते इति अययेयः-शुभकर्मणैवोपलभ्य इत्यर्थः। नहि भाग्यं विना जिनः परमेष्ठिदेवतया सम्यग् उपलभ्यते इति। कथमाययावित्याह-आयायमिति, आ-आभिमुख्येन अयनमाय-आगमनमित्यर्थः। लाभस्य प्रक्रमात् कैवल्यादिसम्पदागमनं यथा स्यात् तदनुकूलमित्यर्थः। क्रियाविशेषणमिदं। तथा योयूय इति 'युंक् मिश्रणे' इति धातो र्यङि अचि च निष्पत्तौ भृशं

"Aho Shrut Gyanam"

मिश्रितः कथञ्चित्तादात्म्यमापन्न इत्यर्थः । कया ? यामोमयेति । यामः-संयमः, तस्य उमयाः, उमा गौर्यां, हरिद्रायां, कीर्तिकान्ति-तमीश्वर्यो' तिवचनात् कान्त्या-अनन्तातिशयर्द्धिप्राप्त्यादिरूपया, तथा अमेया-अप्रमाणा, माया- स्यान्माया शाम्बरी कृपा दम्भो बुद्धिश्चे' तिवचनात् त्रिभुवनरक्षाकरत्वात् कृपा बुद्धिः—ज्ञानं वा यस्य स तथा, याऽममेति, यायां-राज्यादिलक्ष्म्यां,:अममः-ममत्व-रहितः, तथा मामयेति 'अयि वयि पयि मयि नयि चयि रयि गता' विति मयधातोः यङ् यचि च सिद्धौ गत्वरी, अमा-अलक्ष्मीः दारिद्र्यादिरूपा यस्मात् स मामयामः, अत्र च खञ्जकुण्टादिवत् केवलविशेषणद्वयस्याऽपि कर्मधारयः समास इति । अयं विशेष-संगतः पाठः । अत्र चापरपाठस्त्वेवमुत्तरपादत्रयस्य--यायाममाया-मयमायमायः । यामायमायाममेययायो, यूयोययायाममा-मयायः ।। इति ।।

विभागः—य-आयाममाया-आमय-म-अयम-अयः-याम-आय-माय-अमं-अमेय याय । आमे यूयोय-य-अय-मामया-अया आमेययोयूययमामयायः ।

अस्यार्थः—आयाममां-विस्तारलक्ष्मीं यान्तीति डे आयामः मायाः । ये आमयाः तान् मिनोतीति क्वचित् [है०५।१।१७१] न यमं-मृत्युं अयते-प्राप्नोतीति, तथा यामं-संयमं आयातीति स तथा, आयाऽममिति । आयस्य अमा-अप्रमाणं यथा स्यादितिक्रिया-विशेषणं । अमेयया ज्ञानादिलक्ष्म्या योयूयोऽसि श्रितो भृशं श्रये-त्यादि,—र्या 'या याने' इति अयः-अचलः-अममः-ममत्वरहितः । तथा मामया-गत्वरी अया-अलक्ष्मीर्यस्मात् स तथा, ततः खञ्ज-कुण्टादिवत् विशेषणत्रयस्याऽपि समास इति ।

**संसारसंसारिसुरासुरेरा-सरेरसारैररसं ससार ।**

"Aho Shrut Gyanam"

**सारैरसारैरुरुसारसारः, सुरारसासस्रिरुरेऽरिरंसः ॥ १० ॥**

इति विशेषसङ्गतः पाठः ।

**अपरस्त्वेवम्-संसारसंसारिरसारसारि-सारैरसारैररसं ससार ।**
**सुरासुरेरः सुरसासरोरु-रारासससासस्रि रसारिरंसः ॥११॥**

विभागः—संसार-संसारि-सुरा-सुरेरा-सर-ईर-सारैः-असारैः-अरसं-ससार । सारैः-असारैः-उरुसारसारे-सुरारसा-सस्रि-रुरे-अरिरंसः ॥

व्याख्या—संसार-(संसारारण्ये) संसारिणो ये सुरा असुराः-तथा ईरायां-भूमौ सरन्तीतीरासराः—मनुष्यादयः तान् ईरयन्ति-अर्जनरक्षणादिक्लेशेषु प्रेरयन्ति, यानि साराणि तैः कृत्वा, वृत्त-गतस्य यच्छब्दस्येहाऽपि सम्बन्धात् यः, अरसमिति 'रसः स्वादे जले वीर्ये, शृङ्गारादौ विषे द्रवे । बोले रागे देहधातौ, तिक्तादौ पारदेऽपि च' ॥ १ ॥ ति ( हैम० ) वचनात नञो विरुद्धार्थाभिधा-यित्वाच्च अरागं-नीरागतामित्यर्थः । ससार-प्राप्तवान् । भवति-हि धनादीनां सुराऽसुरमनुजपशुताहेतूनामप्यनित्यतापरिणामादि-दुःखहेतुतादिविभावनेन महतां नीरागताऽपि 'जे चेव उ मोक्खस्स भवस्स ते चेव तत्तिया हेउ ' त्तिवचनात् । साराणामरसहेतुतामेव विशेषणद्वयेनाह-सारैरिति सह ( आरैः ) चौराऽनलादिप्रतिपक्षैः अत एव असारैः-अश्रेष्ठैरिति । यः कीदृशः? उरुसारसारइति। उ (:) सारसे (उरुः सारः) 'सारो मज्जाऽस्थिरांशयोः । बले श्रेष्ठे च सारं तु, द्रविणन्याय्यवारिष्विति ( हैम० ) वचनात् सारश्च-बलं, सा च लक्ष्मीः-मुक्तिभाव्यनन्तवीर्यज्ञानादिलक्ष्मीरित्यर्थः । तां राति-ददातीति । तथा सुराः शोभनो मेघः, कस्मिन् ? रसासस्रिरुरे । रसायां-भुवि सरन्तीत्येवंशीलाः 'सस्रि चक्री' [है०५।२।३९] त्यादिना निपातनात् रसासस्र्यो-मनुष्यादयः, तेषां रुः-भयं 'इहपरलोयायाणे' त्यादिना सप्तप्रकारं, स एव रो-दहनस्तस्मिन् ।

"Aho Shrut Gyanam"

तथा अरिरंसः-विगतरत्यादिभाव इति। अत्राप्यपरपाठ एवं,किञ्चित्प्रसृतत्वात् लिख्यते–संसार० स्पष्टः। नवरं सुरासुरान् ईर्स्यति सेवार्थं यः स तथा। अथवा सुराऽसुराणां या ई:–लक्ष्मीः तां रातीति तथा। सुरसेत्यादि। शोभना नत्यादिरता ये रसासरा– मनुष्याः, तेषां ऊरु–गरिष्ठं, रः–तीक्ष्णं आरं अस्येति, या ईदृशी सा लक्ष्मीः शक्तिरूपा [विशेष] तां सरति, सस्त्रीति [है. ५।२।३९] निपातनात् साधुः। न विद्यते सह आरिरंसया यः स तथेति। नवमो मूलश्लोकः व्याख्यातः।

**वीरो रविर्वो वररो वरोरु, रुवीवरावारविवारिवारी।**
**रैरोरवो वर्वरवीरवीरोऽ–र्वरैरिरीरोरुवरोरवारः ॥१२॥**

विभागः-वीरो-रविः-वः-वररः, वर-उरु-रुवीवर-अवारवि-वारि-वारी। रैरोरवः-वर्वरवीरः-वीरः-अर्वरै-रिरी-र-ऊरुवरोरवारः।

व्याख्या– वीरो-स्पष्टः। नवरं यत्तदोर्नित्यमभिसम्बन्धात् अन्यतरोपादानेऽन्यतरस्य ग्रहणात् स इत्यस्य गम्यमानत्वात् स वीरो वो वररोऽस्त्विति सम्बन्धः। रविवत् प्रकाशकत्वाद् रविः, तत्र वरं-ईप्सितं, राति-ददातीति वररः, ईदृशः। पुनश्च वरोरु० इत्यादिविशेषणः। तत्र ऊरुः-महान् विस्तारो वरो यस्य स तथा क्रियाविशेषणम्। पुनः कीदृशः? रुः-भयं, वीवरो-विस्तारः, तद्रूपः अवारविः अवार्यतउसमूहः, तस्य वारि-निवारणं, तत्र वारी-बन्धनरूपः, अवार्यभयविस्ताररूपपशुगणनिवारणबन्धन-स्थानरूपः। रैरोरवः। राः–जलदः, तद्वद् भृश योजनप्रसरं यथा स्यात्तथा, पुनः पुनर्वा भव्यानुग्रहाय देशनाक्षणे रौतीति यङ्लुप्यौणादिके अप्रत्यये च तथा। अथवा राः-जलदः, तद्वत् राणां नराणां, ऊः-रक्षा, तद्धेतुत्वात् सैव वा राणां सूः (ऊः) यस्मादिति व्यधिकरणे, रः-तीक्ष्णः, ऊः-रक्षा कान्तिर्वा यस्मादिति

"Aho Shrut Gyanam"

समानाधिकरणे बहुव्रीहौ वा, एवंविधो (रवः) देशनाध्वनिर्यस्य स तथा । यथा अब्दो जातः क्षुदाद्युपद्रवरक्षाकान्त्यादिहेतुस्तथा भगवानपीति भावः । तथा वर्वरं-काममेव वीरं विशेषेण ईरयति स तथा । अर्वा-अश्वः, राः-स्वर्णं, रिरीः-पित्तल, शेषोपलक्षणं (न) तेषां रा–दानं तेन उरुवदाचरन्तः रोरवारा यस्मात्स तथेति । (दशमो मूलश्लोको व्याख्यातः) अर्थतः प्रायः सर्वेषां सम्बन्धत्वेऽपि उक्तितस्त्रिभिर्विशेषकमित्युक्तम् ।

**एवं मया भासुरपञ्चवर्ग-सुवृत्तपुष्पैर्ग्रथितां सदर्थाम् ।**
**श्रीवीरनेतुः स्तुतिरूपमालां, बुधाः! समादाय तमर्चयन्ताम् ।।१३।।**

व्याख्या–स्पष्टं । नवरं-अर्चयन्तामिति । अर्चिण् पूजाया-मित्यस्मात् णिजि परस्मैपदमेव स्यात्तेनापप्रयोगः । यौजादिकत्वेन विभाषया णिग्भावे तु इदित्त्वादात्मनेपदमेव । अर्चतीति प्रयोगस्तु भौवादिकस्य, तथा च कविरहस्ये–

**अर्चते चन्द्रचूडं यो, गुरुमग्रे तथाऽर्चति ।**
**अर्चयत्यनिशं विप्रान्, कर्णधारान् भवार्णवे ।।१४।।**

इति युगप्रधानावतार० श्रीपर्युषणापर्वमहाविज्ञप्तित्रिदश-तरङ्गिण्यां द्व्यक्षरवृत्तैः पञ्चाक्षरश्रीवर्धमानस्तवनामा षष्ठः पुटभेदरूपस्तरङ्गः ।

**क्षिप्तैः सन्देहबाणैः सपदि तनुगतैः पीडयित्वा निबद्धान् ।**
**स्नेहोद्यत्पाशकैश्च स्ववशमधिगतीकृत्य मोहप्रदु(द्रु)ष्टैः ।**
**निश्शल्यान् यो विधाय स्ववचनसदयस्कान्तयोगाद् गणेशान् ।**
**हत्वा मोहं विमोच्य व्यधित निजभटान् वीरनेता स पातु ।।**

इतिषष्ठतरङ्गचूला ।

**यस्यागमोत्थां पदपङ्क्तिमुज्ज्वलां, दृष्ट्वा बुधा मुक्तिपुरीमुपेयुषः ।**
**श्रयेयुरद्यापि तदध्वनीनतां वीरोऽवतात् सार्थपतिः स वो भवात् ।**

इति (षष्ठ) तरङ्गस्य प्रतिचूला ।

"Aho Shrut Gyanam"

**एवं नित्यनिरञ्जनाऽव्ययपदं श्रीवर्द्धमानं मुदा,**
**शङ्कालीमुनिसुन्दरस्तवगणैर्नूतक्रमं यः स्तुते ।**
**सर्वाभीष्टसुखोच्चयैरविरतं स्फूर्जत्प्रमोदाद्वयो,**
**मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥१७॥**

इति षष्ठतरङ्गसमर्थनापङ्क्तिः । चूलाऽपि स्पष्टा ।
इति युगप्रधान० स्रोतसि षष्ठतरङ्गस्य पुटभेदरूपस्य
किञ्चिद्वृत्तिवेलेयं सदर्थरत्नप्रकारप्रदर्शिनीति ।
अथचतुर्विशतिजिनस्तवाऽऽशीर्वादनामा ह्रदः प्रस्तूयते–
जयश्रियं ज्ञानतपस्क्रियायुधै–रवाप्य दुर्वारतरान्तरद्विषाम् ।
पदं यदाऽऽपुः किल ये तदाप्तये, जिनांश्चतुर्विशतिमानवीमि तान् ।
श्रीमानादिविभुः क्षमाधरकुले जातः सुवंशावली–
प्वाद्यो मौक्तिकसम्पदेऽस्तु स सतां शाखाशतभ्राजितः ।
धर्मादिस्थितियष्टयो यदुदिताः स्फूर्जन्महिम्नोत्तरा,
जज्ञुर्मोहजरादितस्य जगतोऽप्याधारभूताः पराः ॥२॥
ईशानः पुरुषोत्तमो जिनपतिर्ब्रह्मेति मुक्त्यर्थिभिः,
कल्पद्रुर्मरुतां घटः सुरमणिश्चैवं धनाद्यर्थिभि. ।
बन्धुस्त्राणमयं पिताऽथ जननी चैवं हिताद्यर्थिभि–
र्यो ध्यातस्तनुतात् सुखाकृतजगज्जन्तुः श्रियं सोऽजितः ॥३॥
श्रीशम्भवः स जीयात् प्रापयितुं शिवपुरं जवाद्भव्यान् ।
बिभ्रत् सार्थाधिपतां धत्ते योऽङ्कच्छलादश्वम् ॥४॥
बध्नाति चेतांसि गुणैस्त्रिलोक्या, मत्तोऽप्ययं जित्वरचापलानि ।
इतीव भीत्याऽङ्कनिभादुपास्ते, यं वानरः पात्वभिनन्दनोऽयम् ॥५॥
कल्याणावलिमातनोतु भवतां निस्सीममाहात्म्यभृद्,
देवानामपि देवता स सुमतिः श्रीतीर्थलक्ष्मीपतिः ।
रूपं यस्य हरिः क्षमो न दशभिश्चक्षुःशतैर्वीक्षितुं,
विंशत्या रसनाशतैरपि धृतैर्वक्तुं गुणांश्चाऽहिराट् ॥६॥

"Aho Shrut Gyanam"

त्यक्त्वा वारिरुहं जलाशयरतिः सेवां यदंह्रिस्फुर–
ल्लावण्यामृतपल्वलस्य कुरुते नित्यं यदङ्कच्छलात् ।
तत्पुण्येन लभेत तत्सुरनराधीशोत्तमाङ्गेष्वव–
स्थानं मुक्तिपदप्रदोऽस्तु भवतां श्रीमान् स पद्मप्रभः ॥७॥
स्फुरत्तरस्फारफणालिरूपिणी रत्नांशुजालैर्दधदिद्धपल्लवान् ।
यः पञ्चशाखः समभूत् सुरद्रुमः, स चिन्तितं रातु सुपार्श्वतीर्थकृत् ।
मन्ये भवाघःकृतिशक्तिमाप्तुं, प्राज्यं सिषिवे विधुरंह्रिलग्नः ।
तथैव यस्याऽऽक्रतयोऽप्यभूवंश्चन्द्रप्रभः पातु जगन्ति सोऽर्हन् ॥९॥
नैवामृतं प्रददद्प्यजरामरत्व–
दाने क्षमोऽस्मि विभुरेष जिनस्त्विहापि ।
ध्यात्वेति याचत इवांह्रिगतोऽयमिन्दु–
स्तच्छक्तिमस्तु विधुलक्ष्मजिनः स भूत्यै ॥१०॥
॥ इति तरङ्गचूला ॥

इतियुगप्रधाना० स्रोतसि चतुर्विंशतिजिनस्तवाशीर्वादह्लदे
आद्यजिनाष्टकस्तवाशीर्वादनामा सचूलः सप्तमस्तरङ्गः ॥

अष्टमस्तरङ्गः ।

देवानामवधिः स्फुरद्गुणनिधिः शुष्यद्भवाम्भोनिधि–
र्दुष्कर्मारिप्रधिर्जने हितविधिर्द्वेधा विमुक्तोपधिः ।
पातु श्रीसुविधिः सुरैर्वरविधिस्तुत्यः प्रभावोदधि–
र्येनोद्यत्सुखधिक्रियाकृदवधि क्रोधः सयोधो युधि ॥११॥
नरामरा बिभ्रति भृङ्गभूयं, यस्मिन् सदा योगिमनस्सरःस्थे ।
तनोत्वयं शीतलपादपद्मः, संसारतापप्रचयप्रणाशम् ॥१२॥
श्रेयःश्रेणिमयं तनोतु भगवान्निःश्रेयसश्रीप्रभु–
र्निर्विश्रामसुरेशसंस्तुतपदः श्रेयांसनामा जिनः ।
सम्पत् कम्पपराङ्मुखा त्रिजगतो विश्रामभूश्चेतसां,
यन्नामस्मृतिमात्रतोऽपि भविनां पाणौ स्फुरत्यञ्जसा ॥१३॥

"Aho Shrut Gyanam"

सेवागतामरनरावलिपापवैरि–प्रध्वंसनप्रगुणिता इव यस्य भान्ति।
आग्नेयशस्त्रनिवहास्तनुकान्तिरूपाः,
पायाद् भवात् स भवतः प्रभुवासुपूज्यः ॥१४॥
को नार्या जनितो विनाऽपि हि पतिं ? कस्मिन् भवेच्चन्दनं ?
का मान्या गृहिणां स्फुटा यदभिधा प्रश्नादिवर्णैर्भवेत् ।
कीदृग् ध्यानतपःश्रुतैर्जिनमतैः प्राणी भवत्यञ्जसे–
त्येवं च प्रतनोतु वः स भगवान्नामानुरूपां धियम्
(वि+म+लः विमलः) ॥१५॥
नेत्रश्रीर्जलराशिगूढविलसत्काम्यार्थरत्नोच्चयान्,
योऽभूद्दर्शयितुं पुराऽत्र विबुधव्रातस्य धत्ते च यः।
पृथ्वीं कीर्तितर्तिं तथा सदमृतप्राप्तिर्यदाज्ञावशा,
पायाद् भोगिकुलोद्भवः शिवसदः श्रीमाननन्तप्रभुः ॥१६॥
मङ्गलं प्रवितनोतु भाविनां, धर्मतीर्थपतिरामरद्रुमः ।
यत्प्रसादमहिमाणुजृम्भितं, चक्रिशक्रशिवशर्मसम्पदः ॥१७॥
चिरस्य पीतेन्दुसुधाऽनुवादं, संवीक्षितुं यद्वचनामृतेन ।
सुधारुचेर्लक्ष्ममृगोऽङ्कदम्भाद्यं सेवते शान्तिरयं शिवाय ॥१८॥
इतियुगप्रधा० ह्रदे मध्यमजिनाष्टकस्तवाशीर्वादनामाऽष्टमस्तरङ्गः।

नवमस्तरङ्गः ।

यः सूरजातोऽपि हि जीवमैत्र्यभाग्,
मेषाश्रितोऽप्याश्रयते महोच्चताम् ।
श्रीनन्दनश्चाप्यकरोद् भवक्षयं,स कुन्थुनाथः पृथुसम्पदे सताम् ॥१९॥
ध्वस्ताज्ञानभरः स्मरज्वरहरः सर्वेष्टसौख्याकरः,
क्षीणाशेषदरः क्षमानतनरप्रेयःशिवश्रीकरः ।
ब्रह्माद्वैतधरः समाश्रितपरत्रैलोक्यरक्षादरः,
कुर्यात् श्रीमदरः सतां गुरुतरश्रेयांसि तीर्थङ्करः ॥२०॥

"Aho Shrut Gyanam"

मल्लिर्जिनोऽसौ श्रियमातनोतु, श्रितः पदौ यस्य घटः सुराणाम् ।
अङ्कं मिषन् सर्वमनोव्यतीत–प्रदानशक्ति किल याचमानः ।।२१।।

पूर्वं कूर्मपतिश्चकार चलनोपास्ति क्षमाभृद्गुरो–
र्यस्योद्धर्त्तुमिमां क्षमामभिलषंस्तच्छक्तिपाठाय नु ।
दृष्टश्चैष तथाकृतिष्वपि जनैश्चक्रेऽधुनाऽपीक्ष्यते,
श्रेयः श्रीमुनिसुव्रतः स तनुताद्वः कूर्मलक्ष्मा प्रभुः ।।२२।।

स्थेयःश्रीभरदानशक्तिमतुलाँ यस्येक्षमाणः सदा
स्वस्मिंश्चापलपङ्कगर्हिततमां निन्दद्वसन्तीं रमाम् ।
स्थेष्ठां तां किल याचते पदयुगासेवाकृदङ्कच्छला–
न्नीलाम्भोजमयं तनोतु भविनां मुक्तिश्रियं श्रीनमिः ।।२३।।

विश्वाहङ्कारभारज्वरहरणमहाभेषजैः काममुख्यै–
र्योधै रुद्धोपकण्ठं सबलमपि चिरं मोहभूपं वसन्तम् ।
निर्धाटयाऽप्येक एवोत्कटभटमुकुटो यः प्रविश्यौग्रसेनी–
चित्तोर्वीराजधान्यां स्वयमुषित इह श्रेयसे सोऽस्तु नेमिः ।।

वितरतु भवतां श्रीपार्श्वनाथः स मुक्ति,
फणिपतिफणमालाश्लिष्टपादारविन्दः ।
कमठहठविमुक्तावारवारिप्रवाहै–
रपि सपदि यदीयो दिद्युते ध्यानवह्निः ।।२५।।

यो वेदार्थविचारणायुधगणैर्हत्वा गणेशोल्लस–
न्मानप्रोन्नतचित्तदुर्गनिवहे सन्देहशत्रून् स्थितान् ।
प्रागेव प्रहतस्य मोहनृपतेर्मल्लानिव प्रोन्मदान्,
स्वान् सद्बोधनृपान् न्यवीविशदयं वः पातु वीरप्रभुः ।।२६।।

एवं निर्णिक्तभक्त्या भरतभुवि चतुर्विंशतिर्वर्त्तमानाः,
संसारक्लेशभीतत्रिभुवनजनतात्राणदुर्गोपमानाः ।
नूता मुग्धस्तवेन त्रिदशपतिनुतास्तीर्थराजा ददन्तां,
तां शुद्धां बोधिलक्ष्मीं लसति मयि यतः केवलानन्दलीला ।।

"Aho Shrut Gyanam"

एवं यो मतिमान् स्तुते जिनवरान् भक्त्या चतुर्विंशतिं,
शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमाम्भोरुहान् ।
सर्वाभीष्टसुखोच्चयैरविरतं स्फूर्जत्प्रमोदाद्वयो,
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥२८॥

इतियुगप्रधाना० चरमजिनाष्टकस्तवाशीर्वादनामा नवमस्तरङ्गः ॥
सम्पूर्णश्चायं चतुर्विंशतिजिनस्तवाशीर्वादनामा ह्रदः प्रथमः ॥

वक्ष्यमाणत्रयोविंशतिस्तोत्ररत्नेषु प्रथमं
रत्नमपीदमेवाष्टकत्रिकमयम् ।

सुखावहं वीक्ष्यसिताङ्गतामा–दरं विरक्तः शिवशर्म लात्वा ।
भव्यां गिरोरीकृतिमाप्य साधुयायीलये रङ्गभराद्रिपोऽते ॥१॥

कारकषट्क-सम्बन्धक्रियारूपाऽष्टगुप्तकम् ।

'सुखावह' मित्यादि । अते-रिपो असिताङ्गत सहं वीक्षी शिवशर्म लात्वा भव्यां गिरा ऊरीकृतिमाप्य साधुयायीलये रङ्गभरात् अरं विरक्तः सुखौ अमात् ॥१॥

विश्वत्रयीवन्द्यपदान्ति केन, न ते श्रितेन स्तवनं स्ववाण्या ।
न योगिनां हृत् सुजगत्प्रसिद्धैरमानिधे शुद्धगुणैश्च केषाम् ॥२॥

क्रियाद्वयगुप्तकम् ।

'विश्वत्रयी'त्यादि । विश्वत्रयीवन्द्यपद !
स्ववाण्या तव स्तवनं श्रितेन केन योगिनां
हृत् न आन्ति हे अनिधे ! सुजगत्प्रसिद्धैः
शुद्धगुणैश्च केषां हृद् न अम ॥२॥

जडैर्जिनाकाम(मि) कियन्निषेवितुं,
परो विना त्वां ग्रहिला ह्यमी ततः ।
व्यामोहभाक्त्वाददते शिवं न तत्,
तवैव विज्ञालिरयात् स्तुतौ बुधैः ॥३॥

"Aho Shrut Gyanam"

क्रिया १ कर्तृ २ क्रिया ३ रूपत्रिगुप्तकम् ।

'जडै' रित्यादि । त्वां विना परः जडैर्निषेवितुं कियत् अकामि, ततः ग्रहिला अमी, व्यामोहभाक्तू न शिवं न आददते तत् विज्ञालिः तवैव स्तुतौ बुधैरयात् ॥३॥

सेवां सदाज्ञाहित एव विस्फुरद्, भयं त्यजद्विश्वमिहार्च्यते न यत् ।
इदं विभो ! वैरिहर ! त्वमेव तत्, कथं विलम्बौ वनवीतकीलकः ।

क्रियात्रयकर्तृकर्मत्रयत्रयरूपनवगुप्तकम् ।

'सेवा'मित्यादि । हे अज्ञ ! अहित एव विस्फुरद् भयं त्यजत् सेवां सद (हे) अर्च्य ! ते विश्वमिदमनयत्, हे वैरिहर ! विभो ! त्वमेव वीतकीलकः विलम्बौ कथं च न (?) ॥४॥

अर्हन्नस्ततमः पाप(पा)हित्वा मे भजतो मनः ।
देव त्वं नृपतारामा–लक्ष्मीभोगरसान् पुनः ।५॥

कर्तृ १ कर्म २ क्रियाद्वय ४ रूपचतुर्गुप्तकम् ।

'अर्हन्नस्ते' त्यादि । त्वां भजतो मे मनः हे अर्हन् ! अस्ततमः पापाहि, देव नृपतार ! त्वं अलक्ष्मीभोगरसान् पुनः आरम (अम) ॥५॥

योऽध्वा शिवपथे तात ! प्रभ ! विष्टपपावनः ।
महिमानं नते सोऽपि, सुभक्त्याममं योचितः ॥६॥

क्रियाद्वयगुप्तकम् ।

'योऽध्वे'त्यादि । तात प्रभ ! विष्टपप अव नो योऽध्वा शिवपथे, महिमानं नते सुभक्त्यां सोऽपि याः (य उचितः अम)

भवे सदाधे विशरारुरङ्ग–भाजः शिवायानतिमादरात्ते ।
साराररमापाणिपयोरुहेषु, स्थेमानमेषां हि नयानि रम्याम् ॥७॥

क्रियाद्वयगुप्तकम् ।

"Aho Shrut Gyanam"

'भवे'त्यादि । विशर ! सदाघे भवे येऽङ्गभाजः ते नतिं शिवाय आदरात् आरुः एषां हि पाणिपयोरुहेषु सारा रमाः रम्यां स्थेमानं नयानि ॥७॥

न याचे शक्रतां देव !, चक्रितां विभवं न च ।
विभो ! बेडावदानम्रं, भवाम्भोधेर्महाभयात् ॥८॥

क्रियागुप्तकम् ।

'न याचे'त्यादि । हे शक्रतांदेव ! चक्रितां विभवं च न याचे महाभयात् भवाम्भोधेर्बेडावद् आनम्रं अव ।

गुप्तक्रियाद्यैरिति यं भवद्विषज्जयश्रिया वृत्तवरैः स्तुवे जिनम् ।
चित्तेऽस्तु मे नाम सदादिभेदतः, स विश्वकालत्रितयं पवित्रयन् ॥९॥

एवं नित्यनिरञ्जनाऽव्ययपदं श्रीतीर्थनाथं मुदा,
शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमं यः स्तुते ।
सर्वाभीष्टसुखोच्चयैरविरतं स्फूर्जत्प्रमोदाद्वयो,
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥१०॥

इति-युगप्रधाना० स्रोतसि क्रियादिगुप्तकरूपविश्वकालत्रयव्यापिजिन स्तवाष्टकनामा दशमस्तरङ्गो द्वितीयपुरभेदरूपः ॥

## एकादशस्तरङ्गः ।

जय श्रीमन् ! पार्श्व ! त्रिभुवनविभो ! विश्वजनता
स्फुरद्विघ्नध्वान्तप्रहणनतबोष्णांशुरमला ।
शरण्या भीतानां सकलजगतां वज्रनिलयः
स जीरापल्लीस्थः प्रकटमहिमाम्भोधिरतुलः ॥१॥

काले ह्यस्मिन् कराले कवलितसकलोद्दामदेवप्रभाव-
प्रोत्तुभ्यत्सर्वदेशे प्रबलखलजने दुःखिताशेषसाधौ ।
व्यावल्गन् म्लेच्छमालाबहुलकलकलोच्छालिताकालकाले,
दीनानां नीतिभाजां जयसि भवभृतां रक्षितैकस्त्वमेव ॥२॥

"Aho Shrut Gyanam"

मन्त्राणां न प्रभावः प्रभवति न विभो ! संस्तुतिः काऽपि दैवी,
नौषध्यो विध्यापात्रा (द्ययाढ्या) अपि महिमभृतः
कालरूपाश्च भूपाः ।
उद्यद्रोहप्ररोहप्रवणमतिजुषः शम्पुषः स्वाजनानां,
हा ! हा ! भूतस्तदेवं जगति मतिमतां त्राणमेकोऽसि पार्श्व ! ॥३॥
भ्रश्यद्भ्रूभङ्गभीतभ्रमदसुरगणैः क्षुब्धबिभ्यत्त्रिलोके,
त्रस्यद्दिग्मत्तनागे व्यथितफणिपतौ सैन्यघोषोग्रभारात् ।
शस्त्रज्वालावलीढप्रतिभटविकटं कम्प्रभूध्रोच्चलाब्धौ,
विश्वाश्चर्यं भट त्वं प्रकटमकृत यः शाखिसंस्फोटकाले ॥४॥
माद्यन्मातङ्गमालागिरिकलकुलितं तुङ्गरङ्गत्तरङ्ग–
श्रेणीकल्लोललोलद्विपुलबलचलत्पत्तियादःकलापम् ।
योऽमथ्नान् म्लेच्छजालान् कपटजलनिधिः सोऽर्च्यतां पार्श्वनाथः,
सर्प्पच्छीखीन्द्रदर्प्पज्वरभरसदपस्मारधन्वन्तरिश्रीः । अर्थतो युग्मम् ॥
बाला वेतालमाला बहुलबलकला भूमिपालाः शृगाला,
व्यालाश्चाम्भोजनालान्यनधिकृतितयाऽम्भोधयो व्याधयो वा ।
पञ्चास्याश्चाप्तदास्या ह्यनुकृतपशवः प्राणिनां दस्यवः स्यु–
र्जेत्रा यन्नाममन्त्रान् स जयति भगवान् जीरिकापल्लिपार्श्वः ।
स्वल्पः कल्पद्रुगणविभवः सम्भवः स्वर्गवीनां,
मिथ्या तथ्या न सुरमणयश्चालयः सन्महिम्नाम् ।
मन्त्रैः स्तोत्रैः किमिह भविनां भाविनां पार्श्वनाथो,
वासं त्रासं गमितदुरितः संश्रितश्चेन्मनस्सु ॥७॥
रत्तत्धत्तप्या (रत्नत्रय्याप्य) सौख्यं प्रददभयदः सादरं भोगिभर्ता,
पुत्री० ती विधत्ते सततमीव सुखं चापि पद्मावतीह ।
स्तोतारं यस्य विश्वत्रिदशपरिवृढप्रौढपूजास्पदस्य,
श्रीमान् पार्श्वो मम स्तादभिमतफलकृज्जीरिकापल्लिमौलिः ॥८॥

"Aho Shrut Gyanam"

एवं नित्यनिरञ्जनाऽव्ययपदं श्रीपार्श्वनाथं मुदा,
शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमं यः स्तुते ।
सर्वाभीष्टसुखोच्चयैरविरतं स्फूर्ज्जत्प्रमोदाऽद्वयो,
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥९॥
इतियुगप्रधाना० स्रोतसि जीरापल्लीपार्श्वस्तवनाष्टकनामा
एकादशस्तरङ्गः ॥
द्वादशस्तरङ्गः ।
कलाक्रान्ता कान्ता न विषयमिता वाङ्मनसयोः
समुन्मीलत्सान्द्राऽनुपरमदयानन्दविनवा ।
निरूपा योगीन्द्रैः सुविशदधिया यात्यवहितै–
रियं रूपं यस्याः श्रुतजलधिदेवी जयति सा ॥१॥
चञ्चत्कुण्डलिनीनिरुद्धपवनप्रोद्दीपितप्रस्फुरत्–
प्रत्यग्ज्योतिरिनांशुभासितमहाहृत्पद्मकोशोदरे ।
शुद्धध्यानपरम्परापरिचिता रंरम्यते द्योमिन्मं (द्योऽमितं),
या हंसीव मयि प्रसत्तिमधुरा भूयादियं भारती ॥२॥
या पूज्या जगतां गुरोरपि गुरुः सर्वार्थपावित्र्यसूः,
शास्त्रादौ कविभिः समीहितकरी संस्मृत्य या लिख्यते ।
सत्तां वाङ्मयवारिधेश्च कुरुतेऽनन्तस्य या व्यापिनी,
वाग्देवी विदधातु सा मम गिरां प्रागल्भ्यमत्यद्भुतम् ॥३॥
नाभिकन्दसमुद्गता लघवती या ब्रह्मरन्ध्रान्तरे,
शक्तिः कुण्डलिनीतिनामविदिता क्वापि स्तुता योगिभिः ।
प्रोन्मीलन्निरुपाधिबन्धुरपरानन्दाऽमृतस्राविणी,
सूते काव्यफलोत्करान् कविवरैर्नीता स्मृतेर्गोचरम् ॥४॥
या नम्या त्रिदशेश्वरैरपि नुता ब्रह्मेशनारायणै–
र्भक्तेर्गोचरचारिणी सुरगुरोः सर्वार्थसाक्षात्करी ।
बीजं सृष्टिसमुद्भवस्य जगतां शक्तिः परा गीयते,

"Aho Shrut Gyanam"

सा माता भुवनत्रयस्य हृदि मे भूयात् स्थिरा शारदा ॥५॥
॥ युग्मम् ॥

तादात्म्येन समस्तवस्तुनिकरान् स्याद्व्याप्य या संस्थिता,
निर्व्यापारतया भवेदसदिवाशेषं जगद्यां विना
वीणापुस्तकभृन्मरालललितं धत्ते च रूपं बहिः,
पूजार्हं भुवनत्रयस्य विशदज्ञानस्वरूपा धिया ॥६॥
साक्षेपं प्रतिपन्थिनाऽपि हि मिथः सस्पर्द्धसङ्घोद्धुराः,
सर्वे वादिगणाः सतत्त्वममलं यं निर्विवादं श्रिताः ।
विश्वव्यापितया नया अपि समालीनाः पदन्तर्यतः,
साऽर्हद्वक्त्रसुधातटाकवरला वाग्देवता पातु माम्॥७॥युग्मम्
विश्वव्यापि सहत्त्वभागपि कवीन् हृत्पद्मकोशस्थिता,
प्रादुष्यारसमग्रवाङ्मयसुधाम्भोधिं समुत्तारयेत् ।
भित्त्वा मोहकपाटसम्पुटतटं धृत्वा प्रसत्तिं परां,
दद्याद् बोधिमनुत्तरां (रं) भगवती श्रीभारती सा मम ।
इत्यानन्दविदात्मिकां भगवतीं श्रीभारतीं देवतां,
शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमां यः स्तुते ।
सर्वाभीष्टसुखोच्चयैरविरतं स्फूर्जत्प्रमोदाऽद्वयो,
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥९॥

इतियुगप्रधाना० स्रोतसि श्रीशारदास्तवाष्टकनामा द्वादशस्तरङ्गः ।

"Aho Shrut Gyanam"

ॐ नमो जिनाय ।

आगमोद्धारक-आचार्यप्रवरश्रीआनन्दसागर--सूरीश्वरेभ्यो नमः ।

प्रभावकपुरन्दरश्रीमुनिसुन्दरसूरिगुरुविरचित-

स्वोपज्ञलघुस्तुत्यवचूरिसमेतः

# *जिनस्तुतिस्तोत्ररत्नकोषः ।*

**जय श्रीऋषभ ! श्रेयः--सुखानि समयाकर ! ।**

**देहि मे भद्ररत्नौघ-सुखानि समायाकर ! ॥१॥**

(अव०) लौकिकलोकोत्तरादिभेदभिन्नानां धर्मव्यवहारादिमयानां वा समयानामागमानां आकरेति (संबन्धः) सम्बोधनं० श्रीऋषभभूत्वात्तेषां यां-लक्ष्मीं करोतीति याकर ! । श्रेयांसि च सुखानि च श्रेयसो-मोक्षस्य सुखानि वा देहीति योगः । संसारवासं मोक्षलाभसमयं चाऽपेक्ष्य उभयप्रार्थना ॥१॥

**कुरु मे शाश्वतं शर्म कल्याणोदयराजित ! ।**

**भगवन् देहभामित्र--कल्याणोदयराऽजित ! ॥२॥**

देहभामित्रकल्याणोदयराजित-देहस्य भाभिः भानां वा मित्रं कल्याणं-हेम यस्य । सम्बो० उद्-उच्चैः, अयं-शुभदैवं रातीत्यातो डः ॥२॥

**निनीषसि रिपुं चेद्वीराजमान वशं भवम् ।**

**ततो भक्त्या स्तुहि प्राज्ञराजमानव ! शंभवम् ॥३॥**

नेतुमिच्छसि । त्यागेच्छायां सुत्यजो दुर्गतिदौर्गत्यादि दुःखानि च न दत्ते इति भवस्य वशता ॥३॥

**श्रियस्तं वृणुते विश्वाऽभिनन्दनसदागमः ।**

**चित्ते त्वं यस्य भक्तस्याऽभिनन्दन ! समागमः ॥४॥**

विश्वेषां विश्वानां वाऽभिनन्दनो-दयादिप्रधानत्वान्नन्दिदायी मोदको वा । सन्-सद्भूतार्थवाग् अर्चितः प्रशस्यो वाऽऽगमो

"Aho Shrut Gyanam"

यस्य । विश्वाऽभिनन्दनेति पृथग् जिनामंत्रणं वा । (समागमः) आगतवान् ।।४।।

**शिवश्रीर्नाऽस्य दूरेऽस्ताऽरमते सुमतेहिते ।**

**सुमते ! यन्मनोऽतीव रमते सुमतेहिते ।।५।।**

हे अस्ता-अलक्ष्मीक ! । अतिशायि शासने । हितहेतौ हित-हेतुत्वादेव वा । असुमता-प्राणिना जातावेकवचनम् । ईहिते-वाञ्छिते । अथवा सुः–पूजादौ, जनेषु पूजिताः सुष्ठु वा मताः–सम्मताश्च सत्पुरुषा इत्यर्थः । तैरीहिते ।।५।।

**सर्वश्रीवासकृच्छोण-पद्मप्रभसमानते ।**

**ये त्वाऽऽर्चन् स्युः सुखैः कैश्चित् पद्मप्रभ ! समा न ते ।।६।।**

त्वां अपूजयन् ते पुरुषाः कैश्चिच्छक्रादिभिरपि समा न स्युः? । किन्त्वसमानशिवसुखाः स्युरिति भावः ।।६।।

**ये सुपार्श्वदृशैक्ष्यन्त, भवतापापहारिणा ।**

**न दूयन्ते स्मरेणैते, भवता पापहारिणा ।।७।।**

**विरज्यंस्त्वां भजन्ते गास्ते चन्द्रप्रभवादरं ।**

**इष्टदो मे पदं दत्त्वा, चन्द्रप्रभभवादरम् ।।८।।**

**सुविधे ! स्तुवतस्ते स्यात् पदतामरसं सदा ।**

**स्तुत्यस्य करगा श्रेयः–पदताऽमरसंसदा ।।९।।**

अमरपर्षदा स्तुत्यस्य ते पदतामरसं स्तुवतः श्रेयःपदता करगा स्यादिति योगः ।।९।।

**कः स्तवे शीतल ! प्राज्ञैः, सरतिस्तव नेहिते ।**

**स्तोतुस्ते हि हरेर्वाणी, सरति स्तवने हिते ।।१०।।**

प्राज्ञैरीहिते वः स्तवे कः पुमान् सरती-रतिभाग् न स्यादिति योगः । हिर्यस्मात्ते–तव स्तोतुः विशिष्टपदप्राप्तौ सत्यां । स्तवने हिते–हितहेतौ हरेरिन्द्रस्य वाणी सरति-प्रसरतीति ।।१०।।

"Aho Shrut Gyanam"

**मता श्रेयांसगोर्यस्य, परमागमभासिता ।**

**नेष्टा स्यान्नृपता तस्याऽपरमागमभासिता ॥११॥**

नृपत्वं, नृपस्य ता-लक्ष्मीर्वा । अपरा-अप्रकृष्टा चक्रीशशक्रादिकृद्धिमपेक्ष्य हीना, या मा-लक्ष्मीस्तस्या गमेन भया-दीप्त्या, सिता-बद्धा । अथवा अपरमस्य-विनाशस्यागम आगमनं यस्यां सा, विनश्वरेत्यर्थः । तादृश्या भया सिता । अथवा अपरेभ्यः सेवकलोकादिभ्यो मा गमस्य भया सिता ॥११॥

**नतं ते वासुपूज्योरु-महाऽनेकपराऽजिता ।**

**राज्यश्रीः श्रयतीहापि, महानेकप-राजिता ॥१२॥**

उरवः महा-उत्सवा यस्यां सा । अनेकैः परैर्वैरिभिरजिता । हस्तिभिः शोभिता ॥१२॥

**त्वदस्तु शुभकर्माघ–हृदये विमलाऽऽगमः ।**

**मम स्थेयांस्तदुक्तश्च, हृदये विमलागमः ॥१३॥**

अये–शुभकर्म त्वत्तो मम हृदयेऽघहृद् विमलस्य जिनस्य आगमः-आगमनमस्तु इति योगः । निर्मलसिद्धान्तः ॥१३॥

**हृदि मे तेऽस्तु सिद्धान्तः, सुरसार्थकलापचित् ।**

**जिग्ये येन स्मरोऽनन्त ! सुरसार्थकलापचित् ॥१४॥**

सुरसा-ज्ञानस्य सुखहेतुत्वात्सुखदा-अर्थकलानां (चिद्) विज्ञना यस्मात् । अथवा सुरसानां शूकलापानां चित्–ज्ञानं यस्मात् । अथवा ज्ञातगुणा एवाऽर्था मणिमन्त्रौषधरत्नादयः सुरसाः स्युः इति मतमाश्रित्य सुरसार्थकलापा याचिता । सातता । तादृशी चिद् यस्मादागमात्स तथा । सु० देवसमूहानां कलां-बलमहत्त्वादिरूपामपचिनोति–ह्रापयतीति क्विप् ॥१४॥

**श्रितं धर्मं नमाथा (धा) ब्दे, प्रभञ्जनसमानताम् ।**

**पान्तं लोकत्रयीं तातप्रभञ्जनसमानताम् ॥१५॥**

"Aho Shrut Gyanam"

वायुतुल्यतां ॥१५॥

**पुंसः सत्कुमुदोल्लासे, सदा नवकलावतः ।**
**शिवं शान्ते ! करे स्यात्वत्-सदानवकलावतः ॥१६॥**

सज्जनकैरवोल्लासे । नव्यचन्द्रमसः । 'त्वदि'ति तव सन्-सद्भूतः प्रशस्यो वा (आ) नवः-स्तवः तस्य करणे कलाभाजः ।

**दिनं स्तौमि दिवः पृथ्व्यां, भवदागमहारिणम् ।**
**सिद्धान्तं ते च कुन्थोऽन्य-भवदागमहारिणम् ॥१७॥**

हे कुन्थो ! दिवो देवलोकात् पृथ्व्यां । भव० तवागमनशोभितं दिनं स्तौमीति योगः । अन्येषां कुवादिनां भवदान्-हिंसादिमयत्वेन संसारदायिन आगमान् हरति-असत इति करोतीत्येवंशीलं तव सिद्धान्तं च स्तौमीति योगः ॥१७॥

**कस्को न क्रियते स्वस्य, भवता नवसादरः ।**
**जगन्नाथ ! नरोऽतीव, भवतानवसादऽर ! ॥१८॥**

नवे-स्तवे सादरः । भवस्य-संसारस्य, तानवं-तनुतां स्वल्पत्वमिति भावः । ततश्च अभवतानवं भवतानवं क्रियते भवतानवसात् 'व्याप्तौ स्सात् [सि० ७-२-१३०] इति सात् प्रत्यये । भवतानवरूपोऽल्पसंसार इत्यर्थः । कस्को न क्रियते भवतेतियोगः । अथवा भवतानवेऽधीनः क्रियते इति 'तत्राधीने' [सि० ७-२-१३२] इति सात्प्रत्यये, तानवाधीन इत्यर्थः ॥१८॥

**सुत्वा त्वाऽभूज्जगन्मोद-जननी श्रीप्रभावती ।**
**या मल्ले ! जयतात् सा ते, जननी श्रीप्रभावती ॥१९॥**

प्रसूय त्वां । श्रीश्च प्रभा च ते तद्वती ॥१९॥

**दिष्टमुक्तिप्रदश्राद्ध-मुनिसुव्रतभारती ।**
**जीयात्ते या सतां दत्ते, मुनिसुव्रत ! भारती ॥२०॥**

"Aho Shrut Gyanam"

दिष्टानि–आदिष्टानि दत्तानि वा मुक्तिप्रदानि श्राद्धानां मुनीनां च सु-शोभनानि (व्रतानि) यया सा चासौ भारती च। भा च रतिश्च ते ॥२०॥

**जीयात्तेऽस्योदितश्राद्ध–मुनिसुव्रतभारती ।**

**पूता यज्जनुषा पृथ्वी, मुनिसुव्रत ! भारती ॥२१॥**

**इति पाठान्तरम् ।**

ते–तव, कीदृशस्याऽस्य भरतक्षेत्रसम्बन्धिनी ॥२१॥

**श्रियोऽर्थी स नमे ! न स्यान् महीनविभवात्मनः ।**

**यस्याराध्यः शिवाय त्व-महीनविभवात्मनः ॥२२॥**

महीनेब्धिवनां(?) (महीनानां) पृथ्वीशानां विभव आत्मा–स्वरूपं यस्याः श्रियः। हे अहीनविभो ! सम्पूर्णजगत्त्रयैश्वर्यवत्त्वात् सम्पूर्णस्वामिन्। आत्मनो-जीवस्य ॥२२॥

**तुभ्यं नेमेऽखिलाङ्गिभ्यो, महागम ! नमो हित ! ।**

**राजमत्यादिभिर्विश्व–महागम ! न मोहित ! ॥२३॥**

अखिलाङ्गिभ्यो हित !। अनन्तार्थगम–नयादिभिः सर्वातिशायित्वान्महानाऽऽगमः-सिद्धान्तो यस्य। आदिशब्दात् पितृमातृभ्रातृजायादिरत्नमणिस्वर्णगजतुरगराज्यादिभिः। मोहनविषये 'न तारिसं दुत्तरमत्थि लोए जहित्थि' इत्यागमवचनात् कलत्रस्य प्राधान्याद् राजमत्यादिनिर्देशः। विश्वेषां विश्वानां वा जन्मादिभिर्महानामुत्सवानामागमो यस्मात् ॥२३॥

**यः सतां ददतेऽनन्त–सारं श्रेयोऽयशोभितः ।**

**स्तुवे पार्श्वजिनस्यास्य, सारं श्रेयोयशोभितः ॥२४॥**

अनन्तः सारो–बलं यस्मिन्। श्रेयो–मोक्षं, अयेन–शुभदैवेन तीर्थकृत्समृद्धिनिर्वर्तकेन जिननामकर्मणा शोभितं (तः)। सारं-सर्वेभ्योऽतिशायि, श्रेयोरूपं श्रेयोहेतुश्च यशः ॥२४॥

"Aho Shrut Gyanam"

**श्रीवीरावेदिते येन, भावतः समयस्ततः ।**
**शिवाप्तौ भवितास्याशु भावतः समयस्ततः ॥२५॥**

ततो-विस्तीर्णः प्रकरणादिभिः । समयोऽवसरः । ततः सिद्धान्तात् ॥२५॥

**स्तोता सीमंधर ! स्यात्ते, कल्याणकमलालयः ।**
**तं नार्दन्ते च विश्वेष्ट–कल्याणकमलालयः ॥२६॥**

'तं' स्तोतारं न बाधन्ते । विश्वानां विश्वेषां वा इष्टानि सुखहितोपकारित्वात्कल्याणकानि-अवतार–जनि–व्रत–केवलोत्पत्ति रूपाणि चत्वारि यस्य । पञ्चमंस्याऽजाताऽदृष्टत्वेनेष्टानिष्टविचारानर्हत्वात् । बद्धकर्माणि मलाः अशुभकर्माणि वा, योगत्रयकालुष्यरूपा वा मलाः, तेषामालयः ॥२६॥

**स्तुवते यं जिनं भक्त्या, प्रसिद्धकुशलालयः ।**
**लभेयं तं स्तुवन् श्रेयः, प्रसिद्धकुशलालयः ॥२७॥**

साधारणस्तुतिरियम् ।

विख्यातविज्ञश्रेणयः । प्रार्थने सप्तमी । मोक्षं । प्रसिद्धानां–स्वायत्तीभूतानां कुशलानां–मङ्गलानामालयः–पदम् ॥२७॥

**त्वयि भक्तं त्रिलोकीस्थ ! श्रेयोराजि दमोदय ! ।**
**जिनवर्गेष्टदानान्मां, श्रेयोराजिद ! मोदय ॥२८॥**

चतुर्विंशतिजिन-सप्ततिशतजिनपट्टकादौ देववन्दने युगपद् बहुजिनस्तुतिरियम् ॥

त्रिलोकीगतशाश्वताऽशाश्वतचैत्यवन्दने आमंत्रणमिदं पाठश्चायम् । पुरस्थजिनवर्गवन्दने तु त्रिलोकीश इत्यपि पाठः । श्रेयसो-मोक्षस्य राजि-स्वामिनि । दमस्य-कषायेन्द्रियसंवररूपस्योदयो यस्य यस्माद्वा । अथवा दमेन उद्–उच्चैः अयः-शुभदैवं यस्य यस्माद्वा । कल्याणश्रेणिद ! ॥२८॥

"Aho Shrut Gyanam"

**जयर्षभविभो ! वर्द्धमान ! चन्द्रानन ! प्रभ: ।**

**वारिषेण ! सुरै: पूज्य-मान ! चन्द्राननप्रभ: ।।२९।।**

नन्दीश्वरपट्टादौ देववन्दने शाश्वतजिनचतुष्टयस्तुति: ।

प्रकृष्टा भा यस्माद्यस्य वा, प्रकर्षेण भातीति वा ड: । चन्द्रवदाननप्रभा-शोभा यस्य ।।२९।।

**देहि त्वमिष्टशर्म श्रीपुण्डरीकप्रभो ! मम ।।३०।।**

श्रीपुण्डरीकस्तुति: ।।

सिद्धिश्रिया-मुक्तिलक्ष्म्या निवासायेति भाव: । पुण्डरीकप्रभ:-कमलसम: ।।३०।।

**सदा श्रीगौतमाऽऽनन्दि-विश्व ! श्रेयोमहालय ! ।**

**श्रयन्ति त्वां श्रितान् प्रेयो-विश्वश्रेयोमहालय: ।।३१।।**

श्रीगौतमस्तुति: ।

आनन्दि-सदुपदेशलब्धिप्रभावाऽतिशयादिभि: सर्वेष्टसाधनात् प्रमोदवद्विश्वं यस्मात् । श्रेयो-मोक्ष एव महानालयो यस्य । श्रीगौतम ! 'त्वां श्रितान्' त्वत्सेवकान्, प्रेयसां–अभीष्टानां, श्रेयसां–भद्राणां,महानामुत्सवानां चाऽऽलय:-श्रेणय: श्रयन्तीति योग:।।३१।।

**सिद्धानन्तचतुष्कात्मन् ! सदा शुभवनोदक !।**

**देहि श्रीसिद्ध ! मे शर्म सदाऽऽशु भवनोदक !।।३२।।**

।। श्रीशाम्ब-प्रद्युम्न-रथनेमि-मरुदेवा-राजीमत्यादिश्रीसिद्धस्तुति: ।।

हे कल्याणवनजल ! सत्-सत्यं पारमार्थिकं मोक्षरूपमिति यावत् । हे संसारनोदक !।।३२।।

**देहि मे सिद्धचक्रेष्टं, सदा नवपदोदित !।**

**जिनैरनन्तशर्मात्मन् !, सदानवपदोदित ।।३३।।** सिद्धचक्रस्तुति: ।

हे सिद्धचक्र-सिद्धवर्ग ! सदा-नित्यं मे-ममेष्टं देहीति योग: । नवभि: पदैर्जीवाजीवपुण्यपापादिभि: सम्यक्प्ररूपणानुष्ठानादि-

"Aho Shrut Gyanam"

गोचरीकृतैरिति भावः। उदितं-उदयं प्राप्तपूर्वत्वाच्छिवलक्षणं पदं तत्रोदित। हे जिनैरुदितभाषितस्वरूपेति सम्बन्धः। सताम् आनवस्य-स्तवस्य पारदेति (पदेति) गणधरपट्टादौ बहुसिद्धवन्दने स्तुतिरियम् कैश्चिदालिख्य स्तूयमानस्य सिद्धचक्रस्य वा। तत्पक्षे तु हे नवभिः पदैरर्हत्सिद्धाचार्योपाध्याय-साधु-दर्शन-ज्ञान-चारित्र-तपो-रूपैरुदित-उदयप्राप्तः। अनन्तं शर्म आत्म-स्वरूपं यस्य स अनन्त-शर्मात्मा जन्तुर्यस्मात्। सताम् आनवस्य-स्तवस्य पद ! हे उदित-भाषित जिनैरिति सम्बन्धः ॥३३॥

**अर्हन्तोभिमताः सुखश्रियः, श्रेयोऽनन्तरमोदिताशयाः।**
**सर्वे मे ददतां बुधैः स्तुताः, श्रेयोऽनन्तरमोदिताशया ॥३४॥**

श्रेयोभिः–कल्याणैः कृत्वा। अनन्तरं–निरन्तरं मोदिताशया यैश्चित्तान्यर्थात्सुखश्रीमतां याभिः सुखश्रीभिस्ताः। अथवा श्रेयो० आशया यैरर्हद्भिस्तेऽर्हति शसन्तं जसन्तं वा। श्रेयो-मोक्षस्यानन्तर-मायामुद्गताभिलाषेण बुधैः स्तुता इति योगः ॥३४॥

**स्वसेवकान् यः कुरुते ददत् सतां, महागमं ज्ञानमतप्रभावतः।**
**शिवप्रदं तं जितकल्पपादपं, महागमं ज्ञा ! नमत प्रभावतः ॥३५॥**

यो महागमोऽनन्तार्था(र्थ)गमनयादिभिः सर्वातिशायित्वा-न्महान् सिद्धान्तो जैन इत्यर्थः। सतां महागमं-उत्सवागमनं ददत्। स्वसेवकान् ज्ञानं-केवलादि, मतानीष्टानि, प्रभाश्च द्रव्यभावाभ्यां दीप्तयस्तद्वतः कुरुते। हे ज्ञा-विज्ञास्तं प्रभावतो-महिमतो जितकल्पपादपं महागमं नमतेति योगः ॥३५॥ अत्र पाठान्तरमपि

**स्वसेवकान् यः कुरुते जगन्ति सन्महागमो ज्ञानवतः प्रभावतः।**
**ददात्वयं मेऽतिसुरद्रुमः शिवं,महागमो ज्ञानवतः प्रभावतः॥३६॥** इति

अथ पाठान्तरव्याख्या-यो महागमः सतां महागम-उत्सवाऽऽ-गमोऽथवा सन्-प्रशस्तो महागमो यस्मात् स तथा। स्वसेवकान्

"Aho Shrut Gyanam"

ज्ञान्-विदुष:, जगन्ति स्वोपदेश-महिमादिभिरवत:-पालयतोऽत एव बहिरन्तश्च प्रभावतो-दीप्तिभाजश्च कुरुते । स प्रभावतो-महिमतोऽतिसुरद्रुमो मे ज्ञानवत:-केवलरूपज्ञानभाज: शिवं ददात्विति सार्थ: सम्बन्ध: ॥३६॥ अथाऽत्र तृतीयोऽपि उत्तरार्द्धपाठो यथा–

**स्वसेवकान् य: कुरुते जगन्ति सन्महागमो ज्ञानवत: प्रभावत: ।**
**करोतु सोऽस्मान् शिवसङ्गिनो निजान्, महागमो ज्ञानवत:**
**प्रभावत: ॥३६॥**

इति । पूर्वार्द्धव्याख्या प्राग्वत् । उत्तरार्द्धस्य त्वियं–महागमो निजान्, प्रभावतो–महिमतोऽस्मान् ज्ञानवत: शिवसङ्गिनश्च करोत्विति ॥

शास्त्रार्णवे सकलवादिजयश्रियाऽऽप्य,
वाग् देवते समुदिता कुशलानि कामम् ।
तेषां शिवाय दधतां विनुवन्ति ये त्वां,
वाग्देवते ! समुदिता: कुशला निकामम् ॥३७॥ इति स्तुतय:

तेषां–कुशलानां शिवाय-मोक्षाय, काममभिलाषं दधतां वाक् सकलवादिजयश्रिया समुदिता-सङ्गता, कुशलान्याप्य शास्त्रार्णवे देवते–'दिवृ‌ड् देवने' इति धातो: प्रयोगादस्खलिता क्रीडतीत्यर्थ: । हे वाग्देवते ! ये कुशला: समुदिता:-सहर्षा: निकाममत्यर्थं त्वां विनवन्ति–स्तुवन्तीत्यर्थ: ॥३७–३८॥

**एवं ये मतिमान् स्तुते जिनवरान् भक्त्या समग्रान् क्रमात्,**
**शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमाम्भोरुहान् ।**
**सर्वाभिष्टसुखोच्चयैरविरतं स्फूर्जत्प्रमोदाद्वयो ।**
**मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम्**

॥३९॥ अनेन स्तवनमपि ।

"Aho Shrut Gyanam"

इति वर्तमानचतुर्विंशतिजिनानां श्रीसीमन्धरस्य साधारण-वृत्त्या जिनस्य युगपद् बहुजिनानां शाश्वतजिनचतुष्टयस्य सिद्धस्य सिद्धचक्रस्य च मङ्गलशब्दाऽर्थाऽक्षरार्थयमकैर्वर्द्धमानाश्च स्तुतय: ॥ स्तवनम् ॥

इति युगप्रधानावतार-तपाबृहद्गच्छाधिराज-श्रीदेवसुन्दरसूरि श्रीज्ञानसागरसूरि श्रीसोमसुन्दरसूरिशिष्यै: श्रीमुनिसुन्दरसूरिभिर्विरचिते जयश्र्यङ्के श्रीजिनस्तुतिस्तोत्ररत्नकोशे तृतीये स्तुतिरूपे प्रस्तावे बहुविधस्तुतिरत्नगर्भा पेटा ॥ ग्रन्थाग्रम् ॥५१॥

एवं ॥३८–३९॥ इति श्रीप्रभावकपुरन्दर-श्रीमुनिसुन्दरसूरि-गुरुविरचितलघुस्तुत्यवचूरि: ॥ ग्रन्थाग्रम् ॥८१॥

**सुकृतसुकृतलभ्योद्यज्जयश्रीर्जयश्री–**
**वृषभ ! वृषभभूभृद् ब्रह्मधामाऽऽप्तधामा ।**
**जनय जनयश:श्रीमुद्विधाने विधाने,**
**कुशल ! कुशलसिद्धीर्मे प्रभावस्वभाव: ॥१॥**

**जनयज्जनयशोभृत्शाश्वतानन्दतानं कुशलकुशलभूर्मे दत्तभावप्रभाव:।**

सुष्ठु-विधिना कृतै:- पुण्यानुबन्धिभिरित्यर्थ: । सुकृतै:-पुण्यैर्लभ्या उद्यन्तो (ती) बाह्यान्तर्वैरिजयभवा जयश्रीर्यस्य । ब्रह्मा तपोज्ञानयोगाध्यात्मादिषु । धाम गृहतेज:स्थानप्रभावजन्मादिषु । ब्रह्मैव-मोक्ष एव धाम-गृहं यस्य । आप्तं धाम–तेज: प्रभावोवा येन । जनानां या यश:श्री मुदांविधाने कुशल–दक्ष !, कुशलानि भद्राणि, सिद्धिश्चाणिमाद्या मुक्तिर्वा । दत्तो भावानां-द्रव्यादीनां प्रभावो येन । यथा द्रव्यस्य बलिकणादे रोगापहारित्वादि, जन्मादिकल्याणभूमे: पावित्र्यतीर्थत्वादि, कालस्य कल्याणादिकदिनादे: पर्वत्वमहिमादि, भावानां जिनाङ्गकृष्णादि-वर्णानामपि सौभाग्यादि ॥१॥

"Aho Shrut Gyanam"

अथ द्वितीयपाठे-जनानां यशःपोषकशाश्वतानन्दस्य–मुक्तिसुखस्य तानं-विस्तारं, निपुणभद्रभूमिः-पूजादिकदक्षानां मङ्गलदायीत्यर्थः ।।

जयविजयविधाता गर्भवासेऽपि मातुः,
सुरस-सुरसदो-मुद्दायिवाणीविलासः ।
मदनमदनदीशो कुम्भभूर्भद्रभूमिः,
भवतु भवतुदर्चो मे शिवाया जितोऽर्हन् ।।२।।

जयः–स्वदेशे सर्वोत्कर्षः, विजयः परदेशे, 'विधाते'ति तृन्नन्तं शीलार्थे । सुरसाः–पञ्चत्रिंशद्वाग्गुणोपेतत्वादत एव सुरपर्षदां प्राधान्यनिर्देशादुपलक्षणाद्वा नरतिरश्चां च मुदो-हर्षस्य दायिनो वाग्विलासा यस्य । भवं-संसारं तुदतीति भवतुदर्चा-पूजा यस्य ।।

**रमय रमयतो मे त्वन्नुतौ चित्तमर्हन्,**
**भवदभवदमेऽपि स्याद्यतोऽस्माद्विशुद्धः ।**
**चरणचरणयोगः शम्भवेशाऽथ तस्मा–**
**दरतिदरतिरस्कृन्निश्चितं मुक्तिशर्म ।।३।।**

त्वन्नुतौ चित्तं रमयतो मे भवदभवदमेऽपि चित्तं मे विरमयेति योगः । भवन्–जायमानोऽभवोऽपुनर्भवो यस्मात् स चासौ दमश्च तस्मिन् । अस्मात् दमात् । चरणं–चारित्रं, तस्य चरणं-आचरणं तस्य योगः–सात्म्यमिति यावत् । तस्माच्चरणचरणयोगात् मुक्तिशर्मं द्विधा इह परत्र च । इह मुक्तिर्निःसङ्गता । तच्छर्म यथा वर्षपर्यायस्याऽनुत्तरदेवशर्म । उक्तं च–'जे इमे अज्जत्ताए समणा' इत्यादि । एतत्सङ्ग्रहगाथा– 'वण १ भवण २ ऽसुर ३ गहगण ४ चंदिमसूराण ५ दु ६ दु ७ दु ८ दु ९ च ऊण १० । गेविज्ज ११ णुत्तराण य १२ कमेगमासाइ सुहि साहू ।।१।। इति भग० श० १४ उ० ९ । अत एव अरतिदरतिरस्कृत्, परलोके च मुक्तिशर्म–शिवशर्म ।।३ ।

"Aho Shrut Gyanam"

**कलित ! कलितमोहृत् केवलेनाऽभिनन्दाऽ–**
**समद ! समदयालो ! पाहि मां मोहशत्रोः ।**
**शमित ! शमितशश ! त्वं शिवस्येष्टमद्रा–**
**कर ! सुकरसुखौघाऽपास्तदोषं च कुर्याः ।।४।।**

हे केवलेन ज्ञानेन कलित !, हे अभिनन्दन !, हे असमद-हे मदरहित !, हे समदयालो–सर्वेष्वपराद्यविभागेन दयावन् !, हे शिवस्य शं-सुखमित–प्राप्त !, हे इष्टकल्याणाऽऽकर !, सुकराः–सुसाधात्सुखौघा यस्य यस्माद्वा ।।४।।

**करति करतिभावान् त्वन्नुतिं नैव मोहोऽ–**
**सुमति सुमतिनेतर्दातुमीष्टे भवौघम् ।**
**समयसमययोगी तन्मुदा तां विदध्या–**
**मसममसमदस्य ब्रह्म मे सापि देयात् ।।५।।**

के–सुखे, रतिभावाद्–अभिलाषादित्यर्थः । करति करोतेः शतृप्रत्यये भ्वादिपाठबलात् शवि च सृजति त्वन्नुतिं । असुमति–प्राणिनि । भवपरम्पराम् । समया सङ्केतार्थपरिज्ञातेत्यर्थः । तस्मात्कारणात् तां-त्वन्नुतिं, विदध्यामिति प्रार्थने सप्तमी । 'सापि' त्वन्नुतिः । ब्रह्म–शिवं, असमं–अनन्तसुखज्ञानाद्यात्मकत्वेन वैशेषिकादिकल्पितपाषाणादिकल्पमुक्तीनामसदृशम् ।।५।।

**धरज ! धर जयी त्वां मां स्वधर्मेऽथितश्री–**
**करण ! करणमाद्यद्दन्तिदान्तौ सुदक्ष ! ।**
**सुरम ! सुरमहेशस्तुत्य ! यत् श्रेयसोऽहं,**
**पदमपदमतान्तिर्नाथ पद्मप्रभ ! स्याम् ।।६।।**

हे धरभूपज ! त्वं जयी–रागादिजयवान्, मां स्वधर्मे धर–स्थिरीकुर्विति भावः । हे सुरम–सुष्ठु- अतिशायिनी प्रातिहार्यादिरमा यस्य यस्माद्वा । सुराणां महान्त ईशाः–अच्युतेन्द्रा-

"Aho Shrut Gyanam"

दयस्तैः स्तुत्य ! श्रेयसोऽत्र कल्याणस्य परत्र मुक्तेश्च । अपगता दमे तान्तिः–खेदो यस्य ॥६॥

**दददररमालीर्हेऽज ! पृथ्वीज ! पृथ्वी–**
**जय जयदमितर्द्धिः सत्प्रतिष्ठः प्रतिष्ठः ।**
**कनकनववपुःश्रीभासमानोऽसमानो,**
**नवनवरसुरोद्यद्भाः सुपार्श्वः सुपार्श्वः ॥७॥**

अदरा-'इहपरलोये'त्यादिसप्तभयरहिता, अहमिन्द्रसुर–शिव-सम्बन्धिनी रमाश्रेणी। हे अज-जन्मादिरहित! जयन्ती-सर्वोत्कर्षिणी, अमिता-अनन्ता ऋद्धिर्ज्ञानसुखातिशयादिका यस्य यस्माद्वा । सती–पूजिता प्रशस्या वा । प्रतिष्ठान् नृपात् पितृत्वेन प्रतिष्ठा यस्य । अथवा सती–प्रतिष्ठस्य पितुरिन्द्रादिस्तुत्यादिरूपा प्रतिष्ठा यस्य । भगवत्पुत्रप्रभावेनैव पित्रोः पूजाद्याप्तेः । प्रातिहार्यातिशयादिभिरनन्यसदृशः । अथवा असमो–देशना–मारिरोगापहारित्वादिभिः शिवमूलबोधिदानादिभिश्च त्रिभुवनोपकारित्वादसमोऽनन्यसदृश अन–जीवितं यस्य । नवनेन–स्तवनेन वराः सेवाद्यर्थागता ये सुरास्तेषामुद्यती [भिः] भाः । शोभनं पार्श्वं–समीपं यस्य ॥७॥

**लसदलसदयाब्धेर्यस्य चन्द्रप्रभ ! स्या–**
**दमलदमलयास्ते ध्यानतोऽपीष्टसिद्धिः ।**
**समुदि समुदिरश्रीवल्लिषु त्वं सितांशोः,**
**करनिकरनिभाङ्गस्तिष्ठ चित्ते सदा मे ॥८॥**

यस्य ते-तव ध्यानतोऽपीष्टसिद्धिः स्यात्, स त्वं मम चित्ते समुदि-अर्थितलाभात् सहर्षेऽष्टध्यानगोचरी भवेति योगः । एवं प्रार्थनायां भवेति पदस्य विशेषणद्वारेण हेतुमाह–'लसे'त्यादि । लसन्ती अलसेष्वपि-तपोऽनुष्ठानाद्यनुद्यमेष्वपि दया तस्या अगाधत्वादिनाऽब्धिरिवाब्धिस्तस्य । साभिप्रायं चैतत् । यत एव लसद-

"Aho Shrut Gyanam"

लसदयाब्धिरत एव ध्यानमात्रादऽलससाध्यादिष्टं दत्से, अत एव चित्तस्थितिप्रार्थनेति । कीदृशाद् ध्यानादित्याह–'अमले'त्यादि । अमले–सम्यग् ज्ञानादिकारणसर्वसाम्यादिकार्यविशुद्धे दमे–इन्द्रिय-नोइन्द्रियसंयमनरूपे लयो यस्माद् ध्यातुरिति भावः । एतेन भगव-तोऽमलदमलयात्मकत्वं ध्यानाद् ध्यातरि भवति । तथा चोक्तं–वीतरागं यतो ध्यायन् वीतरागो भवेद्भवी । इलिका भ्रमरी रूपं ध्यायन्ती भ्रमरी यथेति ।। एतेन कवेरिष्टा मुक्तिस्तदुपायश्च दमलयात्मकं जिनध्यानमिति कवेरभिप्रायो ज्ञायते । मुदिरो मेयः

**दधति दधति मुक्तिं भक्ततां ये त्वयीशे,**
**नमति न मतिमान् कस्तान् क्रमाद्वासवोऽपि ।**
**भवति भवति हि द्राग् भक्तिलेशोऽपि क्लृप्तः,**
**सुविधि सुविधिनाथाऽचिन्त्यचञ्चत्फलाय ।।९।।**

त्वयि मुक्तिं दधति–संश्रयति ये–पुरुषा भक्ततां दधति-बिभ्रत इतियोगः । त्वयि 'सुविधी'ति शोभनो विधिराशंसादिरहितो यस्मिन् करणे इति क्रियाविशेषणम् ।।९।।

**सदम ! सदमतान्तर्वैरिजेता यतः स्यां,**
**विशदविशदनन्तज्ञानवान् शीतलार्हन् ।**
**सुरव-सुरवधूभिः स्तुत्य ! पात्रं गुणाना–**
**ममद ! मम दयाब्धे ! देहि तां योगशुद्धिम् ।।१०।।**

हे सदम ! । सतां–उत्तमानामनभिमता येऽन्तर्वैरिणः–काम १ क्रोध २ मद ३ मान ४ लोभ ५ हर्षा ६ दिरूपारिषड्वर्गात्मानस्तेषां जयनशीलः सन् । विशदं सकलावरणक्षयात्, विशन्-जीवमध्ये तादात्म्यभावेन परिणमदनन्तज्ञानं–केवलज्ञानं तद्वान् । यतो योग-शुद्धिः स्यामिति योगः । अष्टमदरहित ! । योगस्य मनोवाक्का-यरूपस्याष्टाङ्गस्य वा शुद्धिम् ।।१०।।

"Aho Shrut Gyanam"

**वरद ! वरदयां त्वं मित्र हे चित्त ! कृत्वा,**

**भवविभवविधानेष्वेकहेतो ! मयि द्राक् ।**

**कलय ! कलय भक्ति श्रेयसीशे सुखश्री-**

**र्लसति लसति नित्या यन्मयि श्रेयसीष्टा ॥११॥**

वरं-वाञ्छितं ददतीति वरदं, चित्तसम्बोधने हे वरद ! वरा-परिणामहिता या दया तां मयि कृत्वेति योगः। भवस्य-संसारस्य, विभवस्य-अपुनर्भवस्य च प्रसन्नचन्द्रादिदृष्टान्तैरद्वितीयकारण !। हे कलय-सुखलय !, यतः सुखलयित्वमतः श्रेयसि स्वामिनि भक्ति कलयेति । अत्र हेतुहेतुमद्भावो ज्ञेयः । यद्-यस्मात्कारणा-न्मयि, श्रेयसि-मोक्षे लसति-अनन्तज्ञान-वीर्यादिभिर्द्योतमाने सति शाश्वती इष्टा सुखश्रीर्लसतीति योगः ॥११॥

**हितसहितसदुक्तीर्यस्य कुर्युः सुराणा-**

**मतनुमतनुतीनां संततीर्नित्यमीशाः ।**

**महत महततश्रीहेतुमब्धि महिम्ना-**

**मुदितमुदितचित्तास्तं बुधा ! वासुपूज्यम् ॥१२॥**

हितसहिता-हितफलाः, सत्यः-सद्भूता उक्तयो यासु ताः। अतनूनि मतानि याभ्योऽथवा अतन्व्यो-गुर्व्यो मता-र्चिता या नुतयस्तासां सन्ततीर्यस्य सुराणामीशाः कुर्युरिति योगः। अर्चत। उत्सवः। उदितं मुदितं-भावक्तप्रत्ययान्तत्वाद् हर्षो यस्मिन् ईदृशं चित्तं येषां बुधानां ते तथा ॥१२॥

**तुहिनतुहिनरोचीरोचिषस्ते वृषानो-**

**धवलधवल ! येयुः कीर्तयोऽपि त्रिलोकीं ।**

**विमल ! विमलयातश्चित्तमेतत् प्रभुर्मे,**

**मलिनमलिनवद्युद्विकल्पोद्भवाघैः ॥१३॥**

"Aho Shrut Gyanam"

तुहिनं-हिमं, तुहितरोचिः–चन्द्रस्तयो रोचिष इव रोचिषो वपुःकान्तयो यासां ताः । हे पुण्यशकटमहावृषभ !। कर्ममलरहितं कुर्विति भावः । भ्रमरनव्यकान्तिभिर्दुर्विकल्पोद्भवैरघैः ।।१३।।

**सदन ! सदनघोद्यत्–श्रेयसां श्रीअनन्ता–**
**ऽगमनगमनयश्रीभ्राजमानाऽऽगमाब्धे !।**
**शमद ! शमऽदरं मे श्रायसं कल्मषाणां,**
**वितर वितरणे यत्त्वं क्षमोऽसोहितानाम् ।।१४।।**

सन्ति-प्रशस्यानि, अनघानि-पापानुबन्धरहितानि, उद्गच्छन्ति यानि श्रेयांसि तेषां सदन !। अगमना-आगमस्य शाश्वतत्वेनाऽगत्वरा, गमाः–सदृशपाठाः, नयाश्च नैगमाद्यास्तेषां श्रिया भ्राजमान आगमसमुद्रो यस्य । हे कल्मषाणां शमद !। श्रेयस इदं अणि श्रायसं 'देविकाशिंशपादीर्घसत्रश्रेयसस्तत्प्राप्तावाः' [सि०७।४।३] इत्यात्त्वम् ।।१४।।

**विबुधविबुधराज्या धर्मनाथाऽङ्घ्रियुग्मं,**
**महितमहितवह्नौ वारिदं ते नमन् स्यात् ।**
**जनितजनिततश्रीर्योगिवृन्दस्य चेतः–**
**सरसि सरसिजाभं तन्नमस्यं तदेव ।।१५।।**

विशेषेण बुधाः–सुधियः सम्यग्दृश इति भावः। ते च ते विबुधा–देवाश्च तेषां राज्या । बाह्याभ्यन्तरभेदभिन्नवैरि। जनिता जनेर्जन्मनस्तता परिणावपि (मेपि) भवान्तरेप्युपलभ्या वा श्रीः–शोभा सफलता वा येन । जिननमनादिभिरेव नृजन्मनः सश्रीकत्वात्सफलत्वाच्च। तस्माद्धेतोः नमस्कारार्हं तदेव अङ्घ्रियुग्मं हितार्थिनामिति शेषः ।।१५।।

**सदय ! सदययोगाद् यस्य विश्वाङ्गिवर्गे,**
**महिममहि ! महश्रीवर्ष ! शान्ते ! प्रभुस्त्वं ।**

"Aho Shrut Gyanam"

**भवति भवसितांशौ सैंहिकेयः प्रभावात्,**
**स भविसभवितीर्णाऽऽनन्दलक्ष्मीः स्यात् ॥१६॥**

विश्वाङ्गिवर्गे हे सदय ! सद्भाग्ययोगात् हे महिममहि- महिम्नां मही-पृथ्वी उत्पत्तिस्थितिवृद्धिविलासादिस्थानमिति भावः। उत्सवानां श्रेणीनां (श्रीणां) च बाहुल्यकरणाद् वर्षमिव वर्षम्। (भवसितांशौ-) संसारचन्द्रे तद्ग्रासादयदीप्त्यादिहननात् सैंहिकेयो- राहुः। प्रभावात् स्वमहिम्ना रोगदुर्भिक्षाऽन्यायदारिद्र्यादिदुःखहर- णाद्भविनां सभायाः 'शालां विना सभे'ति। [लिंगानु०] नपुंसकत्वे भविसभस्य वितीर्णाऽऽनन्दलक्ष्मीर्येन स तथा ॥१६॥

**कमनकमनहेतुर्भक्तितो यस्य कुन्थोः,**
**सकलसकलनुत्यं ब्रह्मशर्म्माऽश्नुतेऽङ्गी ।**
**भर सुभरसुखौघस्याऽस्य तां नेतुरात्मन् !**
**वसति वसति हृष्टा त्वय्यीशे शिवश्रीः ॥१७॥**

कमनस्य--कामस्य, कमनं--कान्तिः सर्वत्रास्खलितविलासा- दिरूपा सदुपदेशादिभिस्तद्धरणशीलस्य। सकलैः--सर्वैः, सकलैः-- सम्यग् ज्ञानादिकलावद्भिर्नुत्यं--स्तुत्यम् अभिलषणीयमिति भावः। मुक्तिशर्म्म। अस्य कुन्थोः स्वामिनः तां भक्तिं भर--पुषाणेति योगः। सुभरा--अनायासपोषाः सुसाधा इतिभावः। सुखौघा नृसुर- शिवसम्बन्धिनो यस्माद्। हे आत्मन्! त्वयि आधारभूते ईशे- सम्यग्ज्ञानधान्यादिभिः स्वपररक्षणक्षमे शिवश्रीर्वासियोग्यात्मनां स्वल्पत्वाद्दुर्लभलाभे च हर्षभवनात्सदालयप्राप्तिः हृष्टेव वसतीति योगः ॥१७॥

**कृतसुकृतसुयत्ना हे बुधाः ! शुद्धभावा-**
**दरमदरमधीशं श्रीजिनानां सदापि ।**

"Aho Shrut Gyanam"

**नमत न मतसौख्यैश्चेद्विरामेऽस्ति वाञ्छा,**
**विभवविभवमेष ह्यानतो रात्यनन्तम् ।।१८।।**

कृतः सुकृतेषु अर्थात्तदर्जनाय यत्नो यैः। बुधा एव सुकृतयत्नकृतः, सुकृतं जिननमनमूलमित्युपदेशार्हाश्चेति बुधग्रहणम् । सप्तभयरहितम् । इष्टसुखैः सह विरामे–वियोगे नास्ति यदि वाञ्छा–शाश्वतसुखे वाञ्छाऽस्ति यदीत्यर्थः । विगतो भवः–उत्पत्तिरुपलक्षणाज्जरामृती च यस्मिन्स विभवः–शिवं, तस्य तद्रूपं वा विभवं-सुखज्ञानादिसमृद्धिम् । एष-श्रीअरः । हि-यस्मात् राङ्क् दाने ।

**कुनतकुमतदूरीभावदोक्तिस्त्रिलोकी–**
**कमलकमलबन्धुः सिन्धुरुद्यन्महिम्नाम् ।**
**जयसुजयसुतत्त्वावाप्तिहृन्मोहशत्रो !**
**विध विविधविशेषज्ञार्च्य ! मल्ले ! शिवं मे ।।१९।।**

कोः–पृथिव्या अर्थात् पृथिवीस्थजनतायाः प्रायः 'मिच्छत्तनिसेवए जणे' इत्यादिवचनात् प्रायः कुमतप्रियत्वान्मतानीष्टानि यानि कुशासनानि कुवादिन इत्यर्थः । तेषां दूरीभावदा–अवितथप्ररूपणया वितथप्ररूपकाणां त्रासभवनाद्वित्रासिका उक्तय–आगमा यस्य । सूर्यः । सुष्ठु तत्त्वानामवाप्तिं हरतीति सुतत्त्वावाप्तिहृच्चासौ मोहशत्रुश्च सुखेन जीयते इति सुजयः सुतत्त्वावाप्तिहृन्मोहशत्रुर्यस्मात्तस्यामन्त्रणम् । तथा 'विधत् विधाने' इति प्रकृतेः पञ्चम्या हौ विध कुर्वित्यर्थः । विविधा गतिचतुष्कागतभेदादासन्नासन्नतरासन्नतमशिवगमनादिभेदाद्वा ।।१९।।

**वशितवशितर्ति यो वीरहीरं विजिग्ये,**
**विषमविषमबाणं शौरिशर्वादिजैत्रम् ।**
**नयविनयविधिज्ञाः सुव्रते श्रीजिनेऽस्मिन्,**
**भवत भव-तमोर्के श्रेयसे भक्तिभाजः ।।२०।।**

"Aho Shrut Gyanam"

वशिता–वशीकृता, वशिनां–लौकिकवशिष्ठविश्वामित्रादि-लोकोत्तरकूलवालकमुनीनां ततिः येन । शूरकोटीरम् । दुर्जय-मदनम् । हरिहरादिजयनशीलम् । एवं मदनस्य वीरत्व–महर्षि–महादेवजयशक्त्या विषमत्वोक्तिः, ईदृशस्यापि मदनस्य जयोक्त्या जिनातिशयोक्तिश्च । शूरो नयविनयोनं न भक्तितोऽर्थितं दत्ते इति नयविनयविधिज्ञाः । रात्रिः । श्रेयसे–मुक्तये ।।२०।।

**जनकजनक ! चेतः स्वांह्रियुग्मे शिवश्री–**
**शरण ! शरण ! विश्वप्राणभाजां लयं मे ।**
**जलजजलजयोद्यत्शैत्यपावित्र्यपात्रे,**
**नय सुनयसुखाब्धिः स्यां सदा श्रीनमे ! यन् ।।२१।।**

हे श्रीनमे ! मम चेतः स्वांह्रियुग्मे लयं–ध्यानस्थैर्यं नय–प्रापयेति योगः । हे जनकजनक ! कस्य–सुखस्य दुर्भिक्षमारीति–रोगाद्यपहारेण समाधानस्वरूपस्य धनराज्यादेर्वैहिकस्य, स्वर्गाप-वर्गादेः पारत्रिकस्य च निष्पादक ! 'धर्मोपदेशका गुरवो मता' इत्यादिप्रयोगदर्शनात् 'कर्मजा तृचा च'[सि० ३।१।८३]इति कर्म-षष्ठीसमासनिषेधेऽपि जन्यजनकविवक्षयाऽऽकृतिगणत्वेन याजका-दिपाठगणनाद्वा समासः । गृह । इष्ट सुखपालनकर । नीर–नीर-जयोर्जयेनोद्यती–उदयती ये शैत्य–पावित्र्ये–भवार्तितापपापकर्मम-लाशौचापहारिणी तयोर्भाजने । सुनयः–सुप्रापः, सुखाब्धिर्लक्षणया मोक्षो यस्मात् ।।२१।।

**नुततनुततभासा स्निग्धया राजमत्या,**
**विपुलविपुलयेभभ्रातृरत्नादिभिश्च ।**
**रुचितरुचितनूको मोहितो नैव योऽर्हन्,**
**भविकभविकदः श्रीनेमिनेता स जीयात् ।।२२।।**

"Aho Shrut Gyanam"

नुता–सर्वोत्तमत्वेन नेमिवधूत्वयोग्यतया वासुदेवादिभिः स्तुता प्रशंसिता, तनोर्वपुषस्तता–विस्तृता भा–दीप्तिः सुभगिमलक्षणा वा यस्याः। स्नेहलया०। विपुला–विशाला, या पृथिवी तया तद्राज्येनेत्यर्थः। इभैरश्वादीनां, हरि–बलादिभ्रातॄणां प्राधान्येन निर्देशाज्जनकादीनां, रत्नैर्मणिमुक्तादीनामादिशब्दयुक्तैरुपलक्षणम्। रुचिता–सुभगिमातिरेकाद् जगदभीष्टा, रुचयो यस्यास्तादृशी तनूर्यस्य। एतेन नेमिराजीमत्योरनुरूपता ख्यायते। तेन च मोहनीययोग्यतायामपि मोहाभवनेन परमयोगित्वं च श्रीनेमेः। भवोऽस्त्येषामिति भविका'अतोऽनेकस्वरादि'[सि० ७।२।६]तीके भविका–भविनस्तेषां भविकं–कल्याणं ददातीति डः॥२२॥

**रुचिररुचिरनन्तानन्ददायिन्! शिवश्री–**
**वर! तव रत! विश्वाऽभीष्टदाने प्रणौमि।**
**सुहितसुहितचेताः श्रेयसे पार्श्व! सूर्वी–**
**धरणधरणभोगिस्वामिसेव्यं क्रमाब्जम्॥२३॥**

हे श्रीपार्श्व! तव चरणकमलं प्रणौम्यहमिति शेषः। रुचिरा–जिनोक्ततत्त्वानुगत्वेन श्रेयसेति पुरो भणनात् शिवाभिलाषिणी, रुचिर्लक्षणयाऽभिप्रायो यस्य शिवस्येत्यर्थः। सदेव दातुं शक्यमित्याह–हे शिवश्रीवर! सुष्ठु हितैः शिवसुखैस्तत्त्वैर्वा भवद्दर्शितैः, सुहितं–घ्राणं गतभवाकाङ्क्षं चेतो यस्य। शिवाय। सुखेनानायासेन लोकरूढ्या उर्वीधरणः यः स चासौ भोगी स्वामी च तेनाऽऽसेव्यं॥२३।

**चिररुचिररुचस्ते वर्धमानाऽक्षरश्री–**
**दयित! दयितभव्यश्रेयसः शासनस्य।**
**परमपरमतश्रीजैत्र! भक्तः सदा स्या–**
**मुदयमुदयपात्रं यल्लभे शर्म नित्यम्॥२४॥**

"Aho Shrut Gyanam"

हे श्रीवर्धमान ! ते–तव शासनस्याहं सदा शिवप्राप्तिभक्तः स्यामिति प्रार्थनायां सप्तमी । चिरं-दुष्प्रसहावधि, रुचिराः-शिवसुखदायित्वेन जगदभिमताः, रुचो–दीप्तयो महिमादिरूपा यस्य । हे शिवश्रीवल्लभ ! दयि–दत्तं दातुमारब्धं वा, भव्यानां श्रेयः–कल्याणं शिवं वा येन शासनेन त्वया वा । हे परमपरा मा–समवसरणादिर्यस्य । अथवा परमाणि–बहुलकालभावित्वाज्जगज्जनन्या एकत्वाच्च प्रकर्षवन्ति यानि परमतानि, तेषां श्रियो जैत्रेत्यामन्त्रणम् । उदयो-ज्ञानसुखताद्यात्मकता । मुद् हर्षः ॥२४॥

**सुकृतिसुकृतिनुत्यं सर्वसीमन्धर ! त्वां**
**महति महति सौख्यैर्यः शिवे वासमिच्छन् ।**
**सहितसहितलक्ष्मी · · · · · · · · · · · ·**
**· · · · · ·कर्मा द्रागलभेतार्ऽथितं तं ॥२५॥ इति पाठां० ।**

सुकृति(नः)पुण्यवन्तो येऽतिशायिविद्वान्सस्तैःस्तुत्यम् । विद्वत्त्वे सत्यपि पुण्यं विना जिनस्तुतेरसम्भवात् सुकृतित्वग्रहः । पूजयति । सौख्यैः सर्वोत्तमे । हितसहिता–पापकर्मपरिहारेण हितानुबन्धा या लक्ष्मी श्रेणी तां इहलोकेऽपि–संसारवासेऽपि वा अमितम्–अप्रमाणं यथा भवत्येवं समिता-समंतात्सामस्त्येन वा इता-प्राप्ता सद्भ्योऽर्चाविमल केवलाद्यवस्थायां पूजा येन शिवे वासम् ॥२५॥ पाठान्तरव्याख्या ।

शिवरूपे । विदेहस्य-महाविदेहस्य इयं वैदेही सा चासौ भूमिश्च'पुंवत्कर्मधारये' [सि० ३।२।५७] इति पुंवद्भावेन वैदेहीति ङीनिवृत्तिः । हे इहर–कामहर शिवरूपे । हितसहितानि निरवद्याजीविकया निष्पापानि, न तु हस्तितापसादिवत्सपापानि कर्माणि–तपो–ध्यानादीनि यस्य स ॥२५॥

**सदतिसदतिशोतिश्रीमहिम्ना त्रिलोक्या–**
**महतमहततीर्थः प्राणभाजां प्रदत्ते ।**

"Aho Shrut Gyanam"

**स मतसमतयापि श्रीजिनस्त्रेयभक्तो**

**जयतु जयतुराषाट् कर्मदैत्यव्रजस्य** ॥२६॥ साधारणस्तुतिरियम् ।

सताम्-उत्तमानाम् अत्यर्थं सत्यः–प्रशस्याः, सद्भिरतिपूजिता वा अतिशीतिश्रिय -अति(शय)लक्ष्म्यस्तासां महिम्ना । अप्रतिहतोत्सवश्रेणीः । मता-अभिमता, या समता मता भवति, स कथं भक्तांस्त्रायति ?, तस्य हि सर्वेषां सामान्येन त्राणत्राणमौदासीन्यं वा युज्यतेति विरोधदीपकोऽपिशब्दः । विरोधपरिहारस्त्वेवं-मतसमतेति चित्तविषयं जिनस्य मैत्री–प्रमोद–कारुण्य–माध्यस्थ्यसद्भावेऽपि भक्तानामेव पालयितुं शक्यत्वात्तेन कालसौकरिकादिषु तथा श्रवणात् । कर्मदैत्यव्रजस्य जये तुराषाट्–इन्द्रः ॥२६॥

**निजजनिजजयीद्धनन्दसौख्यैस्त्रिलोकी–**

**महद ! महदनन्तं देहि मे ब्रह्मशर्म ।**

**सुदयसुदयसम्यक्तत्त्व ! विश्वाङ्गिचेतः–**

**कुमुदकुमुदबन्धो ! श्रीजिनाधीशवर्ग !** ॥२७॥

चतुर्विंशतिजिन-सप्ततिशतजिनपट्टादौ देववन्दने युगपद् बहुजिनस्तुतिरियम् ।

निजा–जनयो–जन्मानि तत्प्रभवप्रभाविनी जयीनि–नारकादीनामपि स्वप्रतिपक्षहेतुदुःखघातात्सर्वोत्कर्षेण वर्तमानानि, इद्धानिमिथः परैरपि विभाव्यमानत्वेन दीप्तानि, आनन्दसौख्यानि तैः कृत्वा हे त्रिलोकीमहद–त्रिजगत्युत्सवप्रद ! सुखान्तरेभ्यो गुरु । सदयानि–अनायासदेयानि, सुदयानि–अतिशायिदयामयानि सम्यक्तत्त्वानि–जीवाजीवादीनि यस्येत्यामन्त्रणम् । चन्द्र ! ॥२७॥

**सुकरसुकरमो मां पाहि देवर्षभ ! त्वं**

**हरसि हरसितद्युत्कीर्तिभृद्वर्द्धमान ! ।**

**हृदि सुहृदि सुखानां यः स्थितस्त्वं च चन्द्रा–**

**नन ! जननजरान्तान् भाविनां वारिषेण !** ॥२८॥

"Aho Shrut Gyanam"

॥ नन्दीश्वरपट्टादौ देववन्दने शाश्वतजिनचतुष्टयस्तुतिः ॥

कं–च सुखं रमा च करमे, सु-भृशं करमे सुकरमे, सुकरे-सुदाने सुकरमे यस्य । हे देव ऋषभ ! हे वर्द्धमान ! हे चन्द्रानन ! हे वारिषेणेति शाश्वतजिनचतुष्कसम्बोधनानि । तत्र च त्वं चेति (च) कारेण समुच्चितस्य त्वमादीनि सर्वाणि यथार्हं योज्यन्ते प्रत्येकम् । स्यत्तदोर्नित्याभिसम्बन्धात् तदो गम्यत्वेन हे ऋषभदेव ! स त्वं मां पाहि इति योगः । स त्वं महेशधवलकीर्तिपोषकृत् । सुखानां सुहृदि मित्रे इव, सुखसङ्गमिच्छतीति भावः । हृदि भव्यानामिति गम्यम् । स्थितः सन् जननजरामरणानि हरसीति योगः ॥२८॥

**स जय सजयशर्मश्रेणिदायिन् ! महिम्ना**
**भवन ! भवनगौघस्फूर्जथुः पुण्डरीक ! ।**
**तमसि तमसि वाचो यस्य भेजुः प्रजानां**
**किरणकिरणलीलाक्लृप्तविश्वप्रकाशाः** ॥२९॥ श्रीपुण्डरीकस्तुतिः ।

हे श्रीपुण्डरीकगणधर ! स त्वं जय । हे सजयशर्मश्रेणिदायिन् ! जयो-बाह्यान्तर्वैरिपराभवात्सर्वोत्कर्षेण वर्त्तनं, तेन सहितेति जिनस्य पृथग् सम्बोधनम् शर्मणो वा विशेषणम् । भवः– संसारो, भवा-एकेन्द्रियादिजन्मानि वा, नगौघः–पर्वतनिवहः तस्मिन् स्फूर्जथुर्वज्रम् । इदं त्वमित्यस्य विशेषणम् । तमः–पापं तदेव ज्ञानचक्षुस्तत्त्वालोकाद्यपहारादन्धकारं तस्मिन् किरणः (स्य) सूर्यस्य ये किरणा–रश्मयस्तल्लीलां ॥२९॥

**शमिन ! शमिनत ! श्री गौतमाशेषभक्ते–**
**हितद ! हित ! दयस्व त्वं ममाऽनन्तमाशु ।**
**शिवद ! शिववशात्मन्नादिमो वीरशिष्या–**
**वलीषु वलिषु सीम्नो मोहवीरस्य जेता** ॥३०॥ श्रीगौतमस्तुतिः ।

"Aho Shrut Gyanam"

हे श्रीगोतम ! हे इन–स्वामिन् ! ममाऽनन्तं शं–सुखं शैवमित्यर्थः। त्वमाशु दयस्व–देहीति योगः। अशेषं भक्ताना-मीहितदं इष्टदायि, हितं–तात्त्विकं ज्ञानत्रयं यस्य। शिवा–सर्व-रोगाद्युपद्रवरहिता दशाऽवस्थाविशेषात्मस्वरूपं यस्य। गणभृतां रोगजरादिरहितदशात्मकत्वात्। हरिहरपुरन्दरादिसुभटवशीका-रान्मोहस्य बलिषु सीमत्वं सिद्धमेव ॥३०॥

**जयद ! जयवनन्तानन्दचिद्दर्शनौजो–**
**मय ! समयसदेकत्रिंशदुद्यद्‌गुणस्त्वम् ।**
**हृदयहृदयभृन्मे देहि शं सिद्धराजाऽ–**
**समसुसमसुखानां ते हि कोशोऽस्तपारः ॥३१॥**

। श्रीशाम्ब-प्रद्युम्न-रथनेमि-मरुदेवा-राजीमत्यादिश्रीसिद्धस्तुतिः।

जयन्ति–बाह्यान्तर्वैरिपराभवेन सर्वोत्कर्षवन्ति अनन्ता-न्यानन्दज्ञान(दर्शन)वीर्याणि प्रकृतानि यस्मिन् स तन्मय :। समये सन्तोऽर्थात् प्ररूपिता एकत्रिंशत्सङ्ख्या उद्यन्तो गुणा आदिगुणा यस्य। ते च गुणाः–संस्थान ५ वर्ण १० गन्ध १२ रस १७ स्पर्श २५ वेद २८ काय २९ सङ्ग ३० जन्म ३१ निषेधरूपाः। 'नव-दरिसणम्मि चत्तारि आउए पंच आइमे अंते। सेसे दो दो भेया खीणभिलावेण इगतीसं ॥ इति गाथोक्ता वा। हृदयं हरतीति हृदयहृद्–निरुपमसुखफल इत्यर्थः। स चासौ अयश्च–शुभदैवं तं बिभर्ति–पुष्णाति स्वसेवार्चादिभिः स्वसेवकादीनां स तथा। असमानाम्–'इअ सिद्धाणं सुक्खं अणोवम्मं नत्थि तस्स उवम्मं' [आवश्यक नि०] इत्यादिवचनान्निरुपमानामत एव स्थितिमजि-तानां समेषामन्यूनानां। हि-यस्मात् ते-तव कोश इव कोशोऽपारो-ऽनन्तानामपि दानेऽक्षय्योऽस्ति। तदात्मकत्वात्तवेतिदानयुक्त्युक्तिः।

"Aho Shrut Gyanam"

**कृतिसुकृतिसुरेन्द्राद्यर्च्य ! हे सिद्धचक्राऽ–**
**नवमनवमहःश्रीदाय्यनन्तप्रभावः ।**
**सुमह ! सुमहतां त्वं सर्वतो ध्यानलीला–**
**पद ! विपदवितर्द्राग् देहि मे शर्म शैवम् ।।३२।।**

। श्रीसिद्धवर्गस्य सिद्धचक्रस्य वा स्तुतिः ।

कृतिनो–देवादितत्त्वाभिज्ञाः, सुकृतिनः–पुण्यबीजभाजः, अन्येषां तदर्च्चाया अयोगात् । अनवमा–उत्कृष्टाः, अत एव नवा–प्रागऽप्राप्तपूर्वा या महश्री–ज्ञानप्रतिष्ठापूजादितेजोलक्ष्मीस्तस्या दायी । अनन्तः प्रभावो यस्य । शोभना महा उत्सवा यस्मात् इत्यामन्त्रणम् । पूजितमहतां योगिनामित्यर्थः । ध्यानसुभगतास्थान ! विपद्भ्योऽवनशील ! । सिद्धचक्रस्य कैश्चिदालिख्य पूज्यमानस्य सिद्धवर्गस्य एकदा गणधरादिपट्टस्थस्य बहुसिद्धप्रतिमारूपस्य वा स्तुतिः ।।३२।।

**महाऽऽयतमहायतच्चरणवन्दनाः श्रीजिनाः**
**सदोदयसदोदयप्रथितशुद्धपुण्याऽऽगमाः ।**
**सुभाववसुभाववत्त्रिदशराजवृन्दार्चिताः**
**सुरोचितसुरोचितप्रचितदामभिः पातु माम् ।।३३।।**

महान्तः–प्रौढाः, स्थाने २ विभावनाद् विस्तीर्णा ये महा–उत्सवास्तेषां आयस्य–लाभस्य 'गतिकारकस्ये' [सि० ३।२।८५] ति दीर्घत्वाभावाय तनोतीति तदिति पृथग् निष्पाद्य योजने विस्तारकं चरणवन्दनं येषां ते तथा । सदा–नित्यं, उदयो यस्याः सा सदोदया, ईदृशी सदसोऽर्थात् श्रोतृसभाया दया येभ्यस्ते सदोदया, प्रथितानि–विस्तारितानि शुद्धपुण्यानि यैस्ते प्रथितशुद्धपुण्याश्चागमाः-सिद्धान्ता येषाम् । सु-शोभनो भावः-श्रद्धा सुभावः, स एवानन्तसुखहेतुत्वाद्वसु-द्रव्यं तस्य भावः-सत्ता तद्वन्तो ये त्रिदश-

"Aho Shrut Gyanam"

राजानः–सुरेन्द्रास्तैरच्चिताः, कैः ? इत्याह–सुष्ठु–भृशं रोचितैः–शोभितैः, सुराणां जिनपूजार्थमुचितैर्योग्यैः, कल्पद्रुमादिभ्यः प्रचितैर्मीलितैर्दामभिः–पुष्पस्रग्भिः ॥३३॥

**सन्तः सन्ततशर्मणे दधति यं धीरोचिधीरोचित–**
**श्रीद ! श्रीदमदर्शकं हृदि स ते सम्पन्नसम्पन्नतः ।**
**प्राणिप्राणितदानवाग् वितनुतां सर्वज्ञ ! सर्वज्ञराट्–**
**श्रेयः श्रेयसि वासकानि समयः पुण्यानि पुण्यानि मे ॥३४॥**

हे सर्वज्ञ ! सन्ततशर्मणे–नित्यसुखाय शिवायेत्यर्थः, हृदि दधति–धारयन्ति यं, स ते समयः–आगमः, पुण्यानि–आशसारहितविधानादिना पवित्राणि श्रेयसि-मोक्षे, वासकानि–वासप्रदानि मे–मम वितनुतामिति योगः । धिया-बुद्ध्या रोचन्त इति धीरोचिनो ये धीराः-पुण्यकर्मसु सात्त्विकास्तेषामुचितां–सत्त्वसाध्यामद्भुतां श्रियम्–इह महाराज्यादिकां परत्र चानुत्तरसुरशिवशर्मरूपां च ददातीति सर्वज्ञामन्त्रणम् । श्रिया युक्तस्य दमस्य–इन्द्रियनोइन्द्रियनियन्त्रणारूपस्य दर्शकं–ज्ञापकम् । सम्पन्नाः सम्पदो येषां तैरर्थादिन्द्रनृपादिभिर्नतः, प्राणिनां–जन्तूनां, प्राणितस्य–जीवितस्य दानं वक्तीति (वाक्) 'दिद्युदि' [सि० ५।२।८३] त्यादिनिपाते जीवदयाख्यापक इत्यर्थः । सर्वज्ञराड्भिः–विज्ञराजैः श्रेय–आश्रयणीयः ॥३४॥

**कारं कारं जिनानामतिमतिविभवा ये स्तवं वास्तवं वाः**
**साराऽऽसारा: स्वभक्तेहितहितविपिने स्युः समानाऽसमानाः ।**
**क्रीडाक्रीडा महिम्नां सरसरतिसुरीराजयः श्रीजयश्री–**
**श्रेयः श्रेयस्विनस्तेऽसुरसुरपतयो मे क्रियासु क्रियासुः ॥३५॥**

इति स्तुतयः

"Aho Shrut Gyanam"

ये (असुर) सुरपतयोऽत्यर्थं बुद्धिसमृद्धयः स्वभक्तेहितहित विपिने वाः सारासाराः स्युरिति योगः। कोऽर्थः ? स्वभक्त-वाञ्छितहितकानने वारां–जलानां, सारश्च आसारो–वेगवान् वर्ष-स्तद्रूपास्तत्पल्लवनहेतत्र इत्यर्थः। समानाः साम्यत्वात् असमाना-श्चानन्यसदृशा महिमादिभिः। खञ्जकुटादिवत् समासः। महिम्नां क्रीडाक्रीडाः–केलियोग्यराजलोकोचितोद्यानरूपाः। सरसाश्चित्ता-क्षेपहेतवो रतयः–कामानुगाह्लादविशेषा याभ्यस्ताः सुरीराजयः-अप्सरःश्रेण्यो येषां ते, सुरीराजियुता इत्यर्थः, श्रियो-रामाः, जयः-सर्वोत्कर्षः, श्रियः-शोभा, श्रेयांसि-शिवानीतिपदचतुष्कस्य समाहार-द्वन्द्वे कर्मणि द्वितीयैकवचनम्। कल्याणभाजः। समवसरणकरणादि यः (षु) सुराणां प्रागुपयोगाल्लोकरूढचा तेषां बलित्वाद्वा प्राग् निर्देशः। कर्मकर्मसु ॥३५॥

**एवं यो मतिमान् स्तुते जिनवरान् भक्त्या समग्रान् क्रमात्**
**शक्रालोमुनिसुन्दरस्तवगणैर्नूतक्रमाम्भोरुहान्।**
**सर्वाभीष्टसुखोच्चयैरविरतं स्फूर्जत्प्रमोदाद्वयो**
**मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥३६॥**

शक्राल्या मुनीनां च सुन्दरैस्तवगणैः ॥३६॥

**अनेन स्तवनमपि। इति वर्तमानचतुर्विंशतिजिनानां श्री सीमन्धरस्य साधारणवृत्त्या जिनस्य युगपद्बहुजिनानां शाश्वत-जिनचतुष्कस्य सिद्धस्य सिद्धचक्रस्य च मङ्गलशब्दाऽर्थाक्षरार्थ यमकैर्वर्द्धमानाश्च स्तुतयः स्तवनं च। इति पञ्चशक्रस्तवैः श्रीदेव-वन्दने आसामुभयीनामपि कथनेन मङ्गलमयाऽक्षरार्थयमकैर्वर्द्ध-मानाः स्तुतयो भवन्तीति एतासां प्रागविभाव्यमानैतज्जातीयानां करणोद्यम इति।**

"Aho Shrut Gyanam"

**इति युगप्रधानावतारतपाबृहद्गच्छाधिराजश्रीदेवसुन्दरसूरि-श्रीज्ञानसागर० श्रीसोमसुन्दर० शिष्यैः श्रीमुनिसुन्दरसूरिभिर्विरचिते जयश्रयङ्के श्रीजिनस्तुतिस्तोत्ररत्नकोशे तृतीयस्तुतिरूपे प्रस्तावे बहुविधस्तुतिरत्नगर्भा पेटा ।। ग्रं. ८१**

आद्यस्तुतिषु वर्णत्रयस्य, द्वितीयस्यां वर्णचतुष्कस्य, तृतीयस्यां स्थानद्वयेन पञ्चानां, चतुर्थ्यां स्थानत्रयेण षण्णां च वर्णानां प्रतिपादमावृत्त्या यमकैर्वर्द्धमानत्वमिति ।

इति श्रीमुनिसुन्दरसूरिपादकृतस्तुतीनामवचूरिः । ग्रन्थाग्रं २०२ ।

— —

"Aho Shrut Gyanam"

वाचकमेघविजयरचितम् ।

# । श्रीशङ्खेश्वरपार्श्वनाथस्तवनम् ।

ॐ ह्रीं क्लीं अर्हं ऐं नमः सिद्धम् ।

श्रीसारणाचलमहेश्वरसन्निधाने,
सम्पत्करी शिवपुरीनगरी सुरीभिः ।
(स)तद्राज्यभाजि ननु राजनि वैरिशल्ये,
शङ्खेश्वरो विजयतां जिनपार्श्वनाथः ॥१॥

स्पष्टीबभूव भविनां भुवि भागधेयाद्,
[1]ध्येयातिशायि–सुखदायि–सुनामधेयः ।
शङ्खेश्वरस्[2]तनुमयूखदिनेश्वरोऽर्हन्,
नेत्राऽमृताञ्जनजगत्प्रियरूपधेयः ॥२॥

ॐकार एष सविशेषविधेर्विधाने,
श्वेतातपत्ररुचिसम्भृतचारुमूर्तिः ।
देवाऽसुरोरगनरेश्वरसेविताङ्घ्री,
राज्यश्रियं त्रिभुवनस्य दधाति पार्श्वः ॥३॥

नैतादृशस्त्रिभुवने जनताभिनेता,
योगीश्वरोऽपि विबुधाधिपतेः श्रियाढ्यः ।
[3]शैवस्थितं(तिं)वपुषि दर्शयते जिनोऽपि,
ब्रह्मक्रियापरिणतः स्वत एव भास्वान् ॥४॥

---

१. ध्येयान् अतिशेते यत् इति ध्येयातिशायि सुखं दत्ते यत् इति सुखदायि ध्येयातिशायि च सुखदायि च सुनामधेयं यस्य स इतिविग्रहः । २. तनुः-शरीरं तस्य ये मयूखाः शरीरस्य तेजोऽञ्चितत्वात् किरणानि तैः दिनेश्वरः सूर्य इव योऽसौ इति समासः । ३. जिनोऽपि–रागद्वेषजयकारी अपि ब्रह्मक्रियया–योगसम्बन्धिप्रक्रियानुगतपरमा-

"Aho Shrut Gyanam"

राजा द्विभागमदधाद् विविधार्थबोधात्,
क्रोधानुरोधनधियो विरराम कासम् ।
माङ्गल्यमाल्यपरिपूजनया प्रसादी,
शङ्खेश्वरः प्रभुरसौ सुरसौख्यकारी ॥५॥

त्वन्नाम्नि धाम्नि भगवन् ! हरिशङ्कराद्याः,
स्वांशं दधुर्मधुरपूजनहेतवेऽमी ।
तल्लेभिरे फलमलं विमलं त्वदीयं,
ते विश्वपूज्यपदसम्पदमङ्गनाढ्याः ॥६॥

ये चक्रीया(स)त्ककमलापरिभोगमग्नाः,
भूता भवन्त्यभिनवैर्विभवैर्मनुष्याः ।
त्वत्पादपद्मरजसामनुशीलनस्य,
माहात्म्यमद्भुतमिदं जगति प्रतीमः ॥७॥

नामानि यानि जगदुद्धरणाय लोके,
गेयानि तानि किल निश्चिनुमस्तवैव ।
पर्यायवृत्तिविधया सुधयावलिप्ता,
भावा भवन्ति सरसाः स्वरसाद्यथैव ॥८॥

---

त्मचिन्तनया परिणतः सन् शैवस्थितिं शिवः–मोक्षः तत्सम्बन्धिनीं स्वीयां स्थितिं वपुषि–प्रक्रमात् ध्यातुरन्तरङ्गमनोमयसृष्टौ संवेदनादिद्वारा स्वत एव भास्वान्–तेजस्वी प्रभुः दर्शयते–परमात्मस्वरूपध्यातॄन् परमात्मस्वरूपानुभवयुतान् कारयतीत्यर्थः ।

४. धाम्नि–तेजस्वरूपे त्वन्नाम्नि शङ्खेश्वरपार्श्वनाथरूपे हरिशङ्कराद्याः लौकिकदेवाः शं इति शङ्करवाचकं ख इति विष्णुवाचकं ईश्वर इति ब्रह्मावाचकं इत्येवंरूपेण स्वांशं दधुः येन च तैरेवमित्थं कल्पितं यदस्य नामाक्षराणि पार्श्वनाथप्रभुनाम्नि संनिविष्टत्वात् पूज्यमानानि पूजास्पदत्वमस्माकमपि प्रथयिष्यन्ति ।

"Aho Shrut Gyanam"

भाग्योदयेन भविनां भगवँस्त्वदीयं,
संदर्शनं भवति दुस्तमसां भिदायै ।
भानोर्मरीचिनिचये स्फुरिते समन्तात्,
किं वा न नश्यति तमिश्रविमिश्रितो(ता)वा ॥९॥
त्वन्नायकस्त्वमसि सार्वजनीनबन्धु–
स्त्वं तारकः सकलदुर्जनवारकस्त्वम् ।
नीतस्त्वयाहमियतीमिह वन्द्यभूमिं,
तद्देहि सम्प्रति पदं परमं स्वकीयम् ॥१०॥
५सिद्धेर्विधास्त्वदभिधा विविधानुभावा–
ल्लक्ष्मीस्त्वदीयपदसेवनया वशेव ।
सम्प्राप्यते तनुभृता निभृता नितान्तं,
कीर्तिस्तदेकसुररत्नमयस्त्वमत्र ॥११॥
नीताः क्षयं रिपुजना जनपूजनाऽपि,
सम्प्रापिता मयि कलाः सकलाः फलाढ्याः ।
६सद्योऽनवद्यसुरवन्द्य ! विभिद्य माद्यत्–
कर्माणि देहि परमं पदमीश ! मह्यम् ॥१२॥
लुप्ताः क्रियास्त्वदुदिताश्चरणस्य दुष्टै–
र्व्यालस्वरूपकलिकालकरालयोगात् ।

---

५. त्वदभिधाया–त्वन्नाम्नः विविधानुभावात्–विविधप्रभावात् सिद्धेः-मुक्तिलक्षणस्येष्टकार्यसिद्धेर्वा विधाः-प्रकाराः प्राप्यन्त इति-शेषः त्वदीयपदसेवनया वशा-वशवर्त्तिनीव लक्ष्मीः सम्प्राप्यते तथा निभृता कीर्त्तिः नितान्तं सम्प्राप्यते तत्–तस्मात् एकः–अद्वितीयः सुररत्नमयः–चिन्तामणिस्वरूपः त्वं अत्र–संसारे इति भावः ।
६. अनवद्यसुरवन्द्य ! हे विभो ! माद्यत् कर्माणि विभिद्य हे ईश ! मह्यं परमं पदं देहि ।

"Aho Shrut Gyanam"

एषां पुनर्विमलमार्गमहोदयार्थं,
दुष्कर्मणां कुरु पराकरणं गुरुस्त्वम् ॥१३॥
मोहावमोहवशत: शतशोऽन्यदेवा:,
सेवारसादनुगुणा विहिता मया ते ।
तै: काऽपि सिद्धिरभवन्न मनोरथस्य,
तश्चै(च्चे)तस: स्थिरदृशा त्वयि मे बभूव ॥१४॥
सिद्धप्रसिद्धमहिमा भगव(वँ)स्त्वमेव,
देव: सदैव धरणोरगराजसेव्य: ।
विश्वम्भर: शिवकर: करुणैकवृत्ति-
वि(र्वि)श्वेशिता जनपितामह एव साक्षात् ॥१५॥
तेजस्तवाव्ययन(त)रं तरसान्तरारि-
विस्तारिवर्गहनने तरवारिधारि: ।
तस्मात् त्रयीतनुलसत्तनुरेव भासि,
शोभातिरेकवशत: शतमन्युमान्य ! ॥१६॥
के के त्वया न भगवन्ननुयायिन: स्वा:,
विश्वाधिपत्यकमलां विमलां न नीता: ।

---

७. अतिशयेनाव्ययं अव्ययतरम् । ८. तरसा–शीघ्रम् । ९. खड्गापरपर्यायोऽयं शब्द: 'तलवार' इति लोकरूढ्यनुगश्च तस्य धारि:–तीक्ष्णाग्रं 'धार' इति पदवाच्यं बोध्यम् । १०. त्रयी–त्रिपदीरूपा तनु: यस्यैतादृशद्वादशाङ्गश्रुतज्ञानरूपा लसत्तनु: यस्य स इतिविग्रह: । ११. मन्युशब्द: यज्ञवाच्यप्यस्ति अत: 'शतमन्यु' पदेनात्र लौकिकदृष्टया यज्ञशतकरणोत्तरलभ्येन्द्रपदवीरूढिमनुसृत्य 'इन्द्र' रूपार्थो ग्राह्य: । १२. स्वपदस्य सर्वादित्वाभावमत्र सूचयित्वा ज्ञाति–धनरूपार्थे सर्वादित्वनिषेधं व्याकरणप्रसिद्धमुपजीव्य अनुयायिनां ज्ञातीयत्वं प्रकल्प्य परमात्मनो विश्वजनीनता ध्वनिता ।

"Aho Shrut Gyanam"

इच्छन्ननन्तसुखभोगमहो मनीषी,[13]
कस्त्वां विमुञ्चति सुरद्रुमरूपमारात् ॥१७॥
[14]जेता सहस्रमहसां(सो) [15]स(म)हसां प्रतापः,
कीर्त्तिश्च कार्तिकनिशाकरकान्तिकान्ता ।
[16]कान्ता विलासकलना किल वर्द्धमानात्,
त्वद्ध्यानतस्तनुभृतामचिरादुदेति ॥१८॥
त्वद्दर्शनान्ननु जनुर्विहितं पवित्रं,
[17]निष्कम्पसम्पदुदियाय जयाय भोग्या ।
आनन्दमञ्जुलदशाऽजनि मामकीना,
लभ्यं मया परिचयात् परमं पदं तत् ॥१९॥
चित्ताम्बुजन्मनि मम भ्रमरायसे चेद्,
[18]भक्तिः परं भगवती मयि सानुरागा ।
नित्याष्टधीविभवसिद्धिरसप्रसिद्धिः,
प्राप्ता मया ननु तदा भगवत्प्रसादात् ॥२०॥

---

१३. मनीषी पदं हि समीक्षापूर्वककार्यकारिबुद्धिमदर्थकं हि विन्यस्यैवं दध्वनुः स्तुतिकर्त्तारो यत् अनन्तसुखभोगेच्छुः सन् तत्पूर्तिक्षमं सुरतरुसन्निभं भवन्तं कः विमुञ्चति एवं च ध्वनिव्यङ्ग्यो हि प्रभोः निरतिशायिफलप्रदत्वरूपो गुणः स्तुतिकारैः मनीषीपदेन सूचितोऽस्ति ।

१४. सहस्राणि महांसि—तेजांसि किरणानीति यावत् यस्य स इति विगृह्य सूर्यस्येतिभावः । १५. महसां—तेजसां १६. कान्ता—रम्या विलासकलना—विविधसत्पदार्थविपुलताप्तिरित्यर्थः । १७. कम्पः—अस्थिरत्वं निर्गतः कम्पः यस्याः सेति समस्य सुस्थिरेत्यर्थः ।

"Aho Shrut Gyanam"

श्रीशङ्खेश्वरपार्श्वभास्वदुदितज्योतिर्मयश्रीजिनः,
सर्वारिष्टविनाशनः शिवपुरीप्राप्तप्रतिष्ठोदयः ।
देशाधीश्वरवैरिशल्यमहितः सद्भाग्यलक्ष्म्यै सतां,
नूतो वाचकमेघपूर्वविजयाऽभिख्येन मेरुध्रुवः ॥२१॥

१८. भगवती-मुक्तीरूपपरमपदप्रापकत्वेनाभ्यर्हणीया भक्तिः यदि मयि सानुरागा-अनुरागेण दृढान्तःकरणीयप्रीतिना सहिता भक्तिः मयि उदेतु—प्राप्नोतु यतः सर्वसिद्धिः ।

---

## । श्रीसिद्धसेनसूरिविरचिता ।

### (तीर्थवन्दना)

संसारतारयाणं तियसासुरमणुयवंदियकमाणं । तित्थयराणं तिहुयण—चेइयभवणे नमंसामि ॥१॥ बत्तीस सयसहस्सा जिण-भवणाणं नमामि सोहंमे । अट्ठावीसं लक्खा वंदे ईसाणकप्पंमि ॥२॥ बारस सणंकुमारे लक्खा वंदामि अट्ठ माहिंदे । चत्तारि बंभलोए सासय—जिणनाहभवणाइ ॥३॥ पंचास सहस्साइं लंतय-कप्पंमि भावओ वंदे । चत्तालीसं सुक्के छच्च सहस्सा सहस्सारे ॥४॥ आणय—पाणयकप्पे दोसुवि दो दो सयाइं वंदामि । आरण-अच्चुयकप्पे सयं दिवड्ढं दिवड्ढं तु ॥५॥ एगारसुत्तरसयं हेट्ठि-मगेविज्जएसु वंदामि । सत्तुत्तरं च मज्झिम सयमेगं उवरिमे वंदे ॥६॥ पंचेवऽणुत्तराइं एवं वंदामि उड्ढलोगंमि । तेवीस सत्तनउई सहस्स चुलसीइ लक्खा य ॥७॥ भवणवईणं मज्झे असुरकुमारेसु लक्ख चउसट्ठी । चुलसीइ सयसहस्सा नागकु-मारेसु वंदामि ॥८॥ बावत्तरिं च लक्खा जिणभवणाणं सुवण्ण-

"Aho Shrut Gyanam"

भवणेसु । छन्नवइ सयसहस्सा वाउकुमारेसु वंदामि ॥९॥ दीवदिसाउदहीणं विज्जुकुमारिंदथणियमग्गीणं । छावत्तरि छावत्तरि लक्खा छण्हंपि वंदामि ॥१०॥ एवं च अहोलोए फणिंद-नमंसियाइं भावेणं । बावत्तरि–लक्खजुया कोडीओ सत्त वंदामि ॥११॥ सासयजिणभवणाइं वंदे नंदीसरंमि दीवंमि । बावन्न मणहराइं तियसासुरखयरनमियाइं ॥१२॥ चउरो कुंडलवलए चउरो वंदामि रुयगवलयंमि । चत्तारि माणुसुत्तरवलए वंदामि जिणभवणे ॥१३॥ इसुकारपव्वएसुं वंदे चत्तारि चेइयहराइं । मेरुसिहरेसु पंचसु पणसिइ वंदामि भावेण ॥१४॥ जिणभवणाइं वीसं वंदे गयदंतसेलसिहरेसु । दस कुरुदुमेसु वंदे तीसं वासहर-सेलेसुं ॥१५॥ वंदे असिई जिणमंदिराइं वक्खारपव्वयवरेसु । सत्तरि सयं च पुन्नं वेयड्ढनगेसु वंदामि ॥१६॥ एवं च तिरिय-लोए तेसट्ठाइं सयाइं चत्तारि । जोइस–वंतरियाणं संखाइयाइं वंदामि ॥१७॥ सत्ताणवइ सहस्सा लक्खा छप्पन्न अट्ठ कोडीओ । चउसय छायासीया तइलोए चेइयं वंदे ॥१८॥ सिरिभरहचक्क-वइणा अट्ठावयपव्वयस्स सिहरंमि । कारवियं अइरम्मं चउवीस-जिणालयं वंदे ॥१९॥ सम्मेयसेल–सेत्तुंज उज्जिंते अब्बुयंमि चित्तउडे । जालउर रणत्थंभे गोयलगिरिम्मि वंदामि ॥२०॥ सिरिपासनाहसहियं रम्मं सुरनिम्मियं महाथूभं । कलिकालेवि सुतित्थं मज्ज(थु)रा नयरीए वंदामि ॥२१॥ रायगिहं चंप–पावा अउज्झ–कंपिल्ल–हत्थिणपुरेसु । भद्दिलपुर–सीहपुरे अंगइया–कन्न-उज्जेसु ॥२२॥ सावत्थिदुग्गमाइसु वाणारसिपमुह पुव्वदेसंमि । कम्मगसिरोहमाइसु भयाण देसंमि वंदामि ॥२३॥ रज्जउरकुडी-णीसु य वंदे गिज्झउर पंचवारेसु । तलवाड देवराउर उत्तरदेसंमि वंदामि ॥२४॥ खंडिल्लडिंडु थाणघनराण हरिसउर खट्टऊएसु ।

"Aho Shrut Gyanam"

नागउरसुद्धदंतिसु संभरिदेसंमि वंदामि ॥२५॥ पल्लियसंडेरघनाणएसु कोरिंट–भिल्लमालेसु । वंदे गुज्जरदेसे आहाडाईसु मेवाडे ॥२६॥ उवएस किराडउए विजयपुराईसु मरुंमि वंदामि । सच्चउरकुंडराइसु पच्छिमदेसंमि वंदामि ॥२७॥ थारावद्द धवाघड जालोहरखेड नगरमोढेरे । अणहिल्लवाडदेसे वड्डावल्लीघबंभाणे ॥२८॥ निहयकलिकालमल्लं साइसयं सयलवाहिथंभणय । थंभणयपुरनिवासं पासं पणमामि भत्तीए ॥२९॥ कच्छे भरुयच्छंमि य सुरट्ठ–मरहट्ठ-कुंकणथलीसु । कलिकुंडमन्नखेडे दक्खिणदेसे नमंसामि ॥३०॥ धारा उज्जीणीसु य मालवदेसंमि पारिघत्ते य । वंदामि मणुयविहिए जिणभवणे सव्वदेसेसु ॥३१॥ इय पंचसु भरहेसु य एरवएसु य महाविदेहेसु । संखेज्ज जिणहराइं मणुएहिं कयाइं वंदामि ॥३२॥ कित्तिम अकित्तिमा वि य तित्थया वंदिया मए सव्वे । जिणभवणेसु निविट्ठा साहारणभत्तिराएण ॥३३॥ भरहाइमणुयमहिया महिया मोहारिमहियमाहप्पा । सिरिसिद्धसेणसूरीहि संथुया सिवसुहं दिंतु ॥३४॥ इति ॥

---

"Aho Shrut Gyanam"

# श्री वीरस्य पञ्चवर्गपरिहारस्तुतिः ।

[1]हरहासयशोराशिं सेवे हारं शिवश्रियः ।
[2]रोषोर्वीरुहसंहार–वायुं वीरेश्वरं वरम् ॥१॥

[3]विश्वश्रीसंश्रियः [4]सार्व–विसरांह्रि (रोऽह्रि) सरोरुहम् ।
सुरहंसावलीसेव्यं स श्रियात् [5]पा(ल्या)लि वः श्रिये ॥२॥

[6A]सुरासुरविशां वारा सहर्षी(र्षा)यं हि [6B]शश्रुवुः ।
श्रेयसेऽ([7]स)रहः सर्वे(सार्व)विहारविसरः स वः ॥३॥

[8]शिवहारि सरोहंसं [9]सार्वं सार्वंहसारवम् ।

---

१. हरः–शङ्करः हासः–हास्यं तद्वत् निर्मला–उज्वला यशसां राशिः यस्य स तम् । २. रोषः–क्रोधः स एव उर्वीरुहः–वृक्षः तस्य संहारे वायुः तम् । ३. विश्वा च या श्रीः तं संश्रयते योऽसौ अर्थात् समस्तलक्ष्मीस्थानरूपः । ४. सर्वं विदन्ति ये ते इति सार्वाः–तीर्थकृतः तेषां विसरः-समूहः । ५. सश्रिया–श्रीः–लक्ष्मीः तेन सहिता तया, आल्या–पङ्क्त्या श्रेण्या, अर्थात् लक्ष्मीश्रेण्या, आसमन्तात् लिवति–भक्तजनान् स्पृशति अर्थात् भक्तजनैः लक्ष्मी-श्रेण्या सम्बन्धकारी । ६. A सुराश्च असुराश्च विशश्च–जनाः तेषां वारा-समूहः । ६. B श्रुधातोः वशवर्त्तित्वार्थं हि विवक्ष्याऽत्र वशीभूता इत्यर्थः । ७. वि–विशेषेण हारः–हरणं यस्मात् कर्ममलानामित्येतादृशं हितकारिवचः तस्य विसरः–समूह इत्यर्थः । अरहः–न विद्यते रहः येभ्यः इत्येतादृशाः तथा सर्वं विदन्ति ये ते सार्वाः तत् सम्बन्धि । ८. शिवं-मुक्तिपदं तदेव हारि-रमणीयं सरः तस्मिन् हंसभूतम् । ९. सार्वाः–सर्वज्ञाः ये सार्वाः–तीर्थकृतः तेषां हसः–प्रकाशमानः य आरवः–आ समन्तात् रौति–दिशति तत्त्वादिकं योऽसौ उपदेश इत्यर्थः तम् ।

"Aho Shrut Gyanam"

विषषे (से)[10] वृषवः[11] सार्व[12]–श्रिये वः स्युः सुराः[13] सुराः ॥४॥

१०. विषसे–वि–विशेषेण ससे–गच्छामि शरणमितियावत् अहमिति शेषः। ११. वृषं–धर्मं अवन्ते ये ते वृषवः–धर्मरक्षकाः इदं हि सुरविशेषणं ज्ञेयम्। १२. सर्वं वेत्ति यत् तत् सार्वं–केवलज्ञानं तस्य श्रिये। १३. सु–सुष्ठु राजन्ते ये ते इति।

---

## । श्रीमहावीर-जिनस्तुतिः ।

[श्री उदय (लावण्य) धर्मगणिविहिता
स्तुतिचतुष्कमयी दण्डकरूपा च]

स चरमपरमेष्ठिनाथ ! त्वदेकान्तविश्रान्तचित्ताः स्वयं सूरय–
स्सूचयन्तीति तत्त्वं परेषां यदेनं जिनं वर्द्धमानप्रभुं,
भजत रजतगौरवर्णं विवर्णावनीभूतवर्णागमं निर्जराधीनपुण्यां च
नाहं तमोदीर्णभावं प्रभावास्तवामाहितम्।
विविधघनसमिद्धसिद्धार्थपृथ्वीय(प)ति-प्रीतिकारिण्युदाराशया–
ऽम्भोरुहाशीतपादोदयं दीप्ततेजोदयं पादपद्मद्वयी,
भजत रजतगौरवर्णं विवर्णावनीभूतवर्णागमं निर्जराधीनपुण्यां च
नाहं तमोदीर्णभावं प्रभावास्तवामाहितम् ॥१॥

निखिलजिनवरावली दर्शनानन्दलीनात्मनां व्यक्तभक्ताङ्गभृत्
कौमुदीवल्लभानां मनश्शान्तिपीयूषयूषार्पणे तर्पणे,
रजनीपतिविभास्वरा वर्जिताखण्डजीवासनज्येष्ठमध्यस्थबाणस्थिति-
र्मुक्तनिर्ग्रन्थनाथायतागारसाराजभावञ्चकम्।

"Aho Shrut Gyanam"

शुभमुभयभवाश्रयायातसातोदयं वर्द्धयन्ती चयं वर्द्धयन्ती च तीव्रांहसां
पुष्पयत्वाशुपुष्पर्तुतुल्यां यशोजालकैः,
रजनीपतिविभास्वरार्वाजिताखण्डजीवासनज्येष्ठमध्यस्थबाणस्थिति-
र्मुक्तनिर्ग्रन्थनाथायतागारसाराजभावञ्चकम् ॥२॥

जिणगणिभणिआगमो दाणि माणेइ णिम्माइणिव्वत्तए देइ बित्थारए
आसु णित्थारए बारए गाढपाठत्थिणं पाणिणं,
दुहबहूविह वेअणं तत्तसंकित्तणं तं कलंकित्तणं पावणिज्जायणं
सीससंघायणं सव्ववेरग्गयं सव्वहा भग्गयं ।
गमणयसयसंकुलो तक्कचक्केसु चक्केसरो वक्क वक्केसरो छिंदई
भिंदई रुंधइ संधए बंधए सोहए बोहए,
दुहबहूविह वेअणं तत्तसंकित्तणं तं कलंकित्तणं पावणिज्जायणं
सीससंधायणं सव्ववेरग्गयं सव्वहा भग्गयं ॥३॥

हवइ कइवईणि वायकाएसु णिद्दोसया वित्तपावित्तयं सद्दिट्ठि
गंगातरंगालिए णाणसुण्हाणसंताणओ,
सिअवसण सुहासिआ जुग्गहं सप्पिणा अप्पवीणिक्कणिस्साण अत्ताण
मायालयाणं च सारप्पणासायओ हारिणी सामिणी ।
दिसउ सुअसमिद्धिमिद्धा पसिद्धा ससिद्धा सुरेहिं सुरेहिं णया सारया
सारयादेवया मे वरा पुण्णलावण्णधम्माणुआ,
सिअवसण सुहासिआ जुग्गहं सप्पिआ अप्पवीणिक्कणिस्साण अत्ताण
मायालयाणं च सारप्पणासायओ हारिणी सामिणी ॥४॥

इति श्रीमहावीरजिनस्तुतिः ( स्तुतिचतुष्कं )

---

"Aho Shrut Gyanam"

## । श्री ऋषभजिनस्तुतिः ।

प्रमुखसुखनिदर्शनं दर्शनं दर्शनंदादिनाग्रेसरद्वासरप्रोदिता
तोदितामोदिताशेषपुंकौमुदीकान्त कान्तस्य ते,
वृषभजिन ! निरर्गलालोकलोकालिकालच्छवीमत्कुवेलाविला–
ज्ञानभानप्रमीलाकुवेलावहेलामहेलालसं नालसम् ।
लसदसमरसेनसेनारसेनासुराभासुरावासुराबालबाला
अबालाश्च बालाः स्वबालादिभूषादिकृत्यत्यजिप्रत्यला,
विदधति रतिकारणं प्रक्षरत्कारणं सम्पदाकारणं तामसावारणं
व्यापदां वारणं सर्वसाधारणं सातनिर्द्धारिणम् ॥१॥
जनितमनितसङ्गमाजङ्गमारङ्गमाला इवोद्भङ्गमारास्तथा तुङ्गमा-
रातिजातिस्मयं दुर्जयं नाशयन्तो भवद्विस्मयं,
स्फुरदतिशयसञ्चयं तीर्थकृत्त्वोदयं लाभलक्ष्म्यालयं
भूतभूताभयं सर्वदेवव्रजद्धर्युच्चयं तर्जयन्तः श्रयन्तः स्वयम् ।
नवतरुतरुणारुणादारुणा भारुणाश्माञ्जनादय गाङ्गेयखर्जूर–
कर्पूरपूरोपमानाऽसमानाद्भुतस्फूर्त्तिमूर्त्तिप्रभा,
भवभयभरभेदकाः सन्तु ते मेदका म्लानविद्वेदकाः क्षीण–
तद्वेदकाः सर्वथा भेदनिर्वेदकाः सर्वसंवेदकाः सत्सभाः ॥२॥
अतिमतियतिपुङ्गवैस्तुङ्गवैरङ्गिकैरङ्गिकैवल्यकल्याण–
कल्पत्वदैः शल्यचापल्यवैकल्यदैर्यो विधैः सङ्गते धीयते,
सहृदयहृदयोल्लसद्धर्म्यहर्म्योच्चयः शास्त्रतात्पर्यवर्यार्थसार्थैः
कृतार्थीकृतेररोचिरप्रत्नरत्नोज्ज्वलागाररत्नायते ।
विषयविषगूढपातू क्ष्वेडमूर्त्तात्मनां मूर्त्तिमद् धर्मधीचेतना
वालनाज्जाङ्गुलीविद्यया विद्यते विद्यमानोपमानश्चयः,
स च जिनसमयो मयोद्गीयते नित्यमादीयते चित्र आधी (पी)–
यते साधवे दीयते वृद्धिमानीयते हीयते नो न तत् क्षीयते ॥३॥

"Aho Shrut Gyanam"

दलयतु दुरिताभितापप्रपन्नं विपन्नत्वदौस्थ्यं महद्दुःखदुस्थान-
दुर्मानदुर्ध्यानदुर्गतसम्बाधजाबाधसंसाधनं,
कलयतु कुशलावलीसत्प्रणालीसमालीनचेतस्कसंलीनता-
घानवाः पानदानात् समाधानजध्यानसंधातुसालेन्धनम् ।
मम समदमनोज्ञमेधाविस्तुता शक्रचक्रेश्वरीभूतिभूतिस्थित-
विश्रुता शीघ्रभाविश्रुतार्थाव्ययार्था सुधार्थार्थिभिः संस्तुता,
विधुतविधुतरस्वितेजस्विताभावलावण्यधर्मानिमासौ
वसन्मानसाद्दत्तमत्ताखिलस्वान्तकामा च चक्रेश्वरीदेवता ॥४॥
इतिश्री वृषभजिनस्तुतिः ।
॥ इदं स्तुतिद्वयं कृतं पं. उदयधर्मगणिभिः,
विमलकुशलगणिना लिखिता (तं) ॥

---

# । ह्रींकारवर्णनस्तवनम् ।

पद्मोद्बोधविधात्म(य)कात्मधवलध्यानोदयः सर्वतः,
शुष्यद्दुःखदविघ्नपङ्कनिकरः सच्चक्रहर्षप्रदः ।
आत्मीयप्रकटप्रभावकिरणव्याधूतताम्यत्र भो,
ह्रींकारस्तरणिस्तनोतु सततोद्योतं सतां चिन्मयम् ॥१॥
एनः सा तु विभेदभग्नरदनः कुम्भानुकारोन्नुता-
ऽनुस्वारः पृथुपृष्टिरप्रतिमहत्पृष्टप्रदेशोंसलः ।
द्वैतीयीकगुरुस्वरायतकरः खण्डेन्दुरेखाङ्कुशो,
वंशारूढ विशिष्टषड् जिज्नमहामात्रोऽतिमात्रोन्नतः ॥२॥
ऊक्तिक्रोडगतद्विरष्टपरमेष्ठयष्टापदीयस्फुरद्-
घण्टः पादनिलीनरेफनिगुडः पद्मप्रतिष्ठावधिः ।

"Aho Shrut Gyanam"

मायाबीजकरी दुरन्तदुरितव्रातद्रुमोन्मूलके,
ध्यानाधीनधियां तनोतु सुधियां प्रत्यूहवैरिक्षयम् ॥३॥ युग्मम् ॥

ॐकारादिनमोऽन्तमन्त्रजगदन्तःस्थः कलाचूलिको-
ऽनुस्वारविहारहारिशिखरोद्वेधा सुवर्णात्मकः ।
अन्त्योपान्त्यशिरस्त्रिरेखविपिनश्रेणीत्रयः सर्वविद्-
देवानां सदनं ह्राक्षरसुरक्ष्माभृच्चिरं नन्दतु ॥४॥

हस्ताभ्यामिह शाखिताः कुसुमिताः कामाङ्कुशादर्शकै-
र्भूषाभिश्च विभूषिताः किसलिता दीर्घाङ्गुलीभिर्भृशम् ।
यत्र स्वःपतिपादपंति सपदि द्विर्द्वादश श्रीजिनाः,
ह्रींकारा····रनन्दनं तदुदितच्छाया सुखायाऽस्तु वः ॥५॥

भव्यप्राणीसमीहितार्थपटलीसम्पादनप्रत्यलाः,
सर्वे सार्वप(सा)र्वदिव्यमणयस्तिष्ठन्ति यस्यान्तरे ।
चञ्चच्चन्द्रकलोर्ध्वभूम्यधिगतानुस्वारश्रृङ्गं दधि,
ह्रींकाराकृतिरोहणक्षितिधरो दद्यात् सरत्नानि वः ॥६॥

नीलः शीर्षगलभरायभुग्जग व्यापादनव्यापृतः,
प्रेङ्खत्कालिमबिन्दुचन्द्रकलभोपेतः सदीर्घस्वरः ।
यः शोभाञ्चितपञ्चवर्णरुचिरो धत्ते मयूरश्रियं,
मायाबीजमयः स खेलतु हृदुद्यानेषु वर्णः सताम् ॥७॥

यः कायांह्रिषु शातकुम्भकपिशः शीर्षाश्रितेकारयो-
र्दूर्वानीलरुचिर्न चार्ककिरणरक्तश्च नादेद्भृते ।
बिन्दौ व्योमशितिः कलाधरकलासत्कः कलायामिति
स्याद्वादं प्रतिपादयन्नवतु वो ह्रींकारवर्णो गुरुः ॥८॥

भूतोद्भाविभवज्जगज्जनजरां ह्रींकारवर्णोसितुम्,
सन्नादोष्ठनिकोर्ध्वबिन्दुगकलापीयूषकुम्भोदधिः ।

"Aho Shrut Gyanam"

तद्भारद्विवटीभवत्कटिरिवेकारैकयष्टेरव–
ष्टम्भात्तिष्ठति कष्टमुत्तमनरः सत्यं परार्थोद्यमः ॥९॥

स्वान्तस्थापितसर्वसार्वनिवहः संन्यस्तसर्वाशुभ–
व्यापारः स्थविरत्ववक्रवलितश्चेकारदण्डं दधन् ।
यो रेखात्रययोगपट्टमुररीकृत्यौपतिष्ठत्यलं,
दद्यात्सिद्धिमसौ स सौष्ठवकलो ह्रींकारयोगीश्वरः ॥१०॥

यत्रेकारखलीनलीनवदनेऽध्यारुह्य सद्योगिनां,
स्वान्तोद्यानवनान्तरे शशिकलापर्याणचर्याकृतौ ।
उच्चैः खेलति बिन्दुरूपपरमब्रह्माश्वचारः स वो,
मायाबीजहयः कुकर्मविजये भूयात्सहायः सदा ॥११॥

ख····गोयमतुर्यकस्वरधरोऽनुस्वाररूपं जटा–
जूटं मूर्ध्नि कलाकलाधरकलं बिभ्रन् शिवोल्लासकः
सर्वाभीष्टसुखप्रदः सुरसुरासंसेव्यमानोनिश !,
श्री ह्रींकारहरस्त्रिपातकपुरक्षेप्ता तनोतु श्रियम् ॥१२॥

ह्रींकारोऽस्ति तृणोटजस्तदुदरे सार्वावली जानकी,
रेखास्तत्परितश्च रामविहिताऽऽज्ञादानरूपाः किमु ।
तस्योर्ध्वं चतुरङ्गुलाञ्छनकलालीलाविमानवरा–
नुस्वारो दशकन्धरस्तदुपरित्वात्तिष्ठतीवोन्नता ॥१३॥

वज्रा(ज्रा)गारमकारि धूर्तविधिना ह्रींकाररूपं कलि,
स्तेनातङ्कवशाज्जिनार्थकलशोस्तस्योदरे न्यस्य च ।
बिन्दुशेखरिकश्च तस्य परितो रेखाश्च तिस्रः कृता,
वप्रास्तिष्ठति तत्पुरो तु सततं क्रोंकार सत्कोंतिकः ॥१४॥

कुर्वाणं वृषभासनं वसुमिताः सिद्धीर्ददानं सतां,
कण्ठेकालमहीनसन्निगरणं सोमादिमन्त्रप्रथम् ।

"Aho Shrut Gyanam"

नाम्ना चापि हराक्षराङ्कमितियंश्कत्वे वनादछला–
दर्द्धेन्दुः समुपास्ति सोऽस्तु भवतां ह्रींकारवर्णः श्रिये ।।१५।।

योगीन्द्राङ्गनणस्यगद् करगलद्वाग्निर्जरार्चिर्भवो,
ह्रींकाराक्षरपाठपाटवसरित्पूरोधकारस्करान् ।
निःसंस्कारमयास्य याति परमज्योतिः समुद्रं चयः,
सोन्तः कर्ममलान्तमत्र भवतान्त्वंतन्यतामेपयः ।।१६।।

धन्यास्ते कृतिनो यदीयहृदयावासेषु नक्तं दिवा,
शीर्षे वक्षसि पादयोश्च विधृतार्हद् तूपदीपव्रजः ।
अन्तर्निश्चलमुक्तबिन्दुसुलिकामिन्दोः कलामल्लिकां,
बिभ्रन् मूर्द्धनि नृत्यति प्रतिकलं ह्रींकारशैभूषकः ।।१७।।

अन्त्योपि प्रथमोहकार भवसि त्वं व्यञ्जने रेफ हे,
त्वं सत्यो सिकटारमल्लविरुदीकारासि सत्यो गुरु ।
बिन्दो त्वं समवर्णशीर्षवसतिः स्थाने भवद्भिर्यतो,
मायाबीजमुरुप्रभावसदनं सम्भूय सम्भाव्यते ।।१८।।

लक्ष्मीसागरवार्यमेयमहिमावासो यमेवं स्तुतो,
नित्यादित्यगुणेन यंनयकृद्योगीन्द्रहृद्व्योमनि ।
स्वर्णाञ्च द्विपरत्नमण्डनमुखाभीष्टार्पणस्वस्तरु–
र्वेणानामधिपस्तनोतु भवतां ह्रींकारवर्णः श्रियम् ।।१९।।

।। इतिश्रीपरमगुरुरत्नमण्डनसूरिशिष्यविबुधश्री-
आगममण्डनगणिभिः कृतं स्तवनं समाप्तम् ।।

"Aho Shrut Gyanam"

## महोपाध्याय-श्रीहेमहंसगणिवर-विरचितः
# साधारणजिनस्तवः ।

भक्तामरस्तवनमध्यगतानि यानि,
वृत्तानि सन्ति नव सातिशयान्यतीव ।
एकैकतच्चरणरूपसमस्ययाऽहं,
स्वस्वाश्रयस्थितिजुषैव जिनं नुवामि ॥ १ ॥
[12]**यैः शान्तरागरुचिभिः परमाणुभिस्त्व–**
मप्यानतो नृभिरिमेऽप्यनघाः स्युरेव ।
स्यादेव नूनमजरामरता कथञ्चित्,
पीता सुधा यदि रुचेरिह को विचारः ? ॥ २ ॥
त्रैलोक्यपूर्यधिकतावककीर्तिराशि–
**निर्मापितस्त्रिभुवनैकललामभूतः ।**
सम्पिण्डय सैष विधिना निधिना मतीनां,
मन्ये महोदयशीलेति विदो विदुस्तम् ॥ ३ ॥
यान् व्याडिराह नियतान् प्रतिमासमेका–
द्यङ्का(६)न्तसङ्ख्यशतयुक्तमथो सहस्रम् ।
**तावन्त एव खलु तेऽप्यणवः पृथिव्यां,**
रव्यंशवः किमु समास्त्वदनन्तभासाम् ॥ ४ ॥
यैरागृहीतमुपमैकमलङ्कृतीनां,
काव्येषु बीजमिति हा ! कुधियो हतास्ते ।
यत्त्वां कथं कवयितार इमे वराका
**यत्ते समानमपरं नहि रूपमस्ति** ॥ ५ ॥
[13]**वक्त्रं क्व ते सुरनरोरगनेत्रहारि ?**
कुण्डं क्व चामृतरसस्य भुजङ्गभीष्मम् ? ।

"Aho Shrut Gyanam"

यत्तुल्यतामपि तयोः प्रतिपादयन्ति,
तेभ्यो नमः शुचिविचारचतुर्मुखेभ्यः ? ॥ ६ ॥
देव ! त्वदीयचरितं हृदुपैति याव-
न्निश्शेषनिर्जितजगत्त्रितयोपमानम् ।
तावन्मतिर्मम सतीरसतीव्रतेव,
स्तुत्याऽन्तरस्य नहि संमुखमीक्षतेऽपि ॥ ७ ॥
क्षीराब्धिगर्भसलिलैर्घटितानि नूनं,
वाक्यानि ते विमलतातिशयाञ्चितानि ।
**बिम्बं कलङ्कमलिनं क्व निशाकरस्य ?,**
तेषां तु यातु परिणामि-निदानतायाम् ॥ ८ ॥
नित्यं निशासु शशिबिम्बमुदीय दीपं,
दीपं यथेष्टमधिकाधिकदीप्तिरूपैः ।
चेन्नैति ते मुखतुलां त्रपयोचितं तद्,
**यद्वासरे भवति पाण्डुपलाशकल्पम्** ॥ ९ ॥
[१४]**सम्पूर्णमण्डलशशाङ्ककलाकलाप-**
मुन्मुद्र्य किञ्चिदपसार्य च पङ्कमाङ्कम् ।
चेत्तं पृथक् क्वचन सञ्चिनुते विरञ्चि-
स्तत् त्वद्गिरो निरुपमत्वमदं पिदध्यात् ॥१०॥
त्वं देशमेतमधुना प्रपुनासि पादैः,
**शुभ्रा गुणास्त्रिभुवनं तव लङ्घयन्ति ।**
तन्नूनमेतदनृतं गुणिनं विहाय,
यन्नो गुणाः क्वचन केवलतां भजन्ति ॥११॥
क्षान्तिर्दृढा तव गिरो मृदुलाश्च कीर्त्ति-
र्लोकम्पृणाऽथ परतापकरः प्रतापः ।

"Aho Shrut Gyanam"

**ये संश्रितास्त्रिजगदीश्वरनाथमेकं,**

त्वामेव तेष्वपि किमेवमहो ! विरोधः ॥१२॥

लुम्पन्ति गा द्विजपतेस्तमपीरयन्ति,

कण्ठे लगन्ति सुमनः सुदृशामशङ्कम् ।

मुक्तार्गलास्तव गुणा यदि वा प्रभुत्वात्,

**कस्तान्निवारयति सञ्चरतो यथेष्टम्** ॥१३॥

**[15]चित्रं किमत्र यदि ते त्रिदशाङ्गनाभिः,**

कण्ठेकृतः सपदि सद्गुणरत्नहारः ।

सद्वृत्तनिर्मलमहार्घतमेन जज्ञे,

यन्नायकेन भवता भुवनप्रियोऽयम् ॥१४॥

अक्षैः कषायविषयैश्च न कौतुकं ते,

**नीतं मनागपि मनो न विकारमार्गम्** ।

वर्षाऽऽतपोत्थमथवा किमु चर्मरीत्या,

व्योम्नोऽपि मार्दवकठोरिमवैकृतं स्यात् ॥१५॥

क्षान्तोऽसि नाथ ! परमात्मसभाजिनां नः,

पीडासु किं किमपि नो तनुषे स्वतेजः ।

**कल्पान्तकालमरुता चलिताचलेन,**

यस्मात्पयोधिरपि लङ्घयति स्वसीमाम् ॥१६॥

विद्योन्मदैरपि न कौतुकमन्यतीर्थ्यै-

र्नो शक्यते चलयितुं तव शासनश्रीः ।

दृष्टं श्रुतं क्वचन वा घनवातवृन्दैः,

**किं मन्दराद्रिशिखरं चलितं कदाचित्** ॥१७॥

**[16]निर्धूमवर्त्तिरपवर्जिततैलपूरः,**

खे दीप्रदीप इयता ननु कोऽर्थ उल्का ।

"Aho Shrut Gyanam"

कुक्षिम्भरिस्त्रिजगतां यमुनाऽमुनापि,
स्यादेतदेव विदुषां तव देव ! कीर्त्तिः ॥१८॥

यत्त्वं गिरा मधुकिरा किल केदलीन्द्रः,
**कृत्स्नं जगत्त्रयमिदं प्रकटीकरोषि ।**
तत्तावकीनकरणिं कियदेतिका ये,
कर्त्तुं स्पृशन्ति विलिखन्ति नखैर्गिरिं ते ॥१९॥

स्पर्द्धां विधाय भवतोन्तिषदापि कश्चिद्
यातः स्वमानमविहाय भवेदिदं चेत् ।
**गम्यो न जातु मरुतां चलिताचलाना–**
मेरण्डकोऽद्रिशिरसीत्यपि सूनृतं तत् ॥२०॥

दुःखेऽत्र दुष्षमतमासमये तमोभि–
र्व्यालुप्तचक्षुषि जने सुपथप्रवृत्त्यै ।
निष्कम्पनिर्मलनिरञ्जननित्यदीप्ति–
**र्दीपोऽपरस्त्वमसि नाथ ! जगत्प्रकाशः ॥२१॥**

**[१७]नास्तं कदाचिदुपयासि न राहुगम्यः,**
पूर्णः सदाप्यनवमः सुदशाधिकश्च ।
धत्ते कलङ्ककणिकामपि नो बुधेष्टः,
स्पष्टं तथाप्यमृतसूरसि चित्रमेतत् ॥२२॥

न स्नेहमुद्वहसि नाञ्जन-तीव्रते वा,
**स्पष्टीकरोषि सहसा युगपज्जगन्ति ।**
दीपः क्व तत् क्व च भवाँस्तदपीह विज्ञं–
मन्योऽपि किं बत ! पतङ्गति दोषिवर्गः ॥२३॥

भौमं न तन्न च खजन्मजडैरनाशा–
स्थैर्याच्च न ग्रहगणप्रभवं यतस्त्वम् ।

"Aho Shrut Gyanam"

**नाम्भोधरोदरनिरुद्धमहाप्रभाव–**
स्तज्ज्योतिरीश ! कतमन्ननु यन्मयोऽसि ॥२४॥
रात्रिंदिवाऽभ्युदयिता रुचिसञ्चयाना–
मह्नासिता च मिहिरे न महोमयेऽपि ।
ते तु त्वयीश ! सततं वसतस्ततस्त्वं,
**सूर्यातिशायिमहिमाऽसि मुनीन्द्र ! लोके** ॥२५॥
[१८]**नित्योदयं दलितमोहमहान्धकारं,**
त्वां दीप्यमानमभितः स्वतनुप्रभाभिः ।
मन्येऽनुकर्त्तुमिह दीपशिखाभिधानाः
स्वःशाखिनस्तदनुरूपमहो ! यतन्ते ॥२६॥
ज्योत्स्नेन्दुमाह नु विधो ! भवतेश ! पार्श्वे,
**गम्यं न राहुवदनस्य न वारिदानाम्** ।
तद्योगकश्मलतयाऽस्य न जातु यातु,
त्वत्कीर्त्तिसाम्यपदवीति विदग्धबुद्धया ॥२७॥
सन्नेत्रपत्रलममत्रममात्रलक्ष्म्याः,
सद्यः प्रसादजननं जनलोचनानाम् ।
**विभ्राजते तव मुखाब्जमनल्पकान्ति,**
प्रेङ्खत्स्यरागपरिषङ्गपिशङ्गिताशम् ॥२८॥
निस्तेजसी भवति कर्ह्यपि नान्धकारं,
नो मन्दयेत् कषति किन्तु समूलकाषम् ।
तृप्नोति कस्य नयनानि न ते मुखाब्जं,
**विद्योतयज्जगदपूर्वशशाङ्कबिम्बम्** ॥२९॥
[१९]**किं शर्वरीषु शशिनाऽह्नि विवस्वता वा,**
शक्येत कोऽपि तमसां प्रसरो निरोद्धुम् ।

"Aho Shrut Gyanam"

अव्याहतैस्तव महोभिरिमानि पूर्व-
मुद्योतिभिर्यदि हि जर्जरितानि न स्युः ॥३०॥
बाह्येषु चान्तरगतेषु च विष्टपस्य,
**युष्मन्मुखेन्दुदलितेषु तमस्सु नाथ !।**
एतौ जगत्युदयतो यदि पुष्पदन्तौ,
तन्नूनमान्तरतमःक्षयशिक्षणार्थम् ॥३१॥
स्वामिन् ! प्रभावविभवैर्भुवने भृते ते,
सर्वेऽप्यमी जनपदाः सुखदा भृशं नः ।
**निष्पन्नशालिवनशालिनि जीवलोके,**
यद्वा शुकः क्वचन तिष्ठति किं क्षुधार्त्तः ? ॥३२॥
मुक्त्यर्थिनां किमपरैरभियोगयोगै-
स्त्वत्पादभक्तिकरणे यदि शक्तिरस्ति ।
चेत् शालयः समूदपत्सत पङ्क्तिलैस्तत्,
**कार्यं कियज्जलधरैर्जलभारनम्रैः ॥३३॥**
[२०] **ज्ञानं यथा त्वयि विभाति कृतावकाशं,**
साऽऽलोकलोककलनास्वनिभं नभस्वत् ।
क्वाऽन्येषु तस्य कणिकाऽप्यथवाऽऽप्यते किं,
कल्पद्रुमः क्वचन मारवमेदनीषु ॥३४॥
दैवी कला त्वयि यथाऽर्हति सम्यगास्ते,
**नैवं तथा हरिहरादिषु नायकेषु ।**
यत्सौरभं मलयचन्दनपादपानां,
भाव्यं क्व तेन मरुमण्डलशाल्मलीषु ? ॥३५॥
श्रीसर्ववेदिनि जिन ! त्वयि यादृशी श्रीः,
क्वैषा कियन्मतिधरेषु सुरान्तरेषु ।

"Aho Shrut Gyanam"

तेजःस्फुरन्मणिषु याति यथा महत्त्वं,
किं दुष्टलोष्टशकलेऽपि तथैव तत्स्यात् ? ॥३६॥

साऽऽडम्बरेष्वपि सुरेष्वपरेषु नेत्रे,
नो रंरतस्त्वयि यथा गतडम्बरेऽपि ।
ज्ञानां रतिर्भवति धूसरितेऽपि रत्ने,
नैवं तु काचशकले किरणाकुलेऽपि ॥३७॥

भक्तामरस्थनवपद्यपदप्रसूनैः,
षट्त्रिंशतेति खचितां नवकाव्यमालाम् ।
भक्त्या विधाय महितः परमेश्वरो मे,
श्रीसोमसुन्दरशिवालयवासदः स्तात् ॥३८॥

॥ इति श्रीभक्तामरस्तवमध्यगतवृत्तनवकस्यैकैकपादरूप-
समस्याभिर्विरचितः साधारणजिनस्तवः
श्री महोपाध्याय-श्रीहेमहंसगणिपादैः कृतः ॥

"Aho Shrut Gyanam"

# एकः श्लोकः ।

यामाताऽमम ! ता मा या, मा परोक्षक्षरोपमा ।
तारोने गगने रो ! ता–मक्षगक्षक्ष ! गक्षम ! ॥१॥

व्याख्या–अथ गुरुः शिष्यं वक्ति–हे अमम !, हे रो !–सर्वजीवरक्षणपर ! हे गगने गक्षम !–हे आकाशे गमनसमर्थ !, किं विशिष्टे गगने ? तारोने–ताराभिः ऊने–ताराविवर्जिते सकलगगनगमनसमर्थ इति । आकाशगामिलब्धिमत्त्वात् । हे अक्षगक्षक्ष !–अक्षगम्–इन्द्रियवशगं यत् क्षं–क्षेत्रं वपुस्तत्र तपःप्रभृतिभिः क्षयकारित्वात् क्ष–राक्षसतुल्य हे साधो !, तां, तां–लक्ष्मीं प्रति ममतां–स्मरणमपि मा अय–मा गच्छ । तां कां ? या अपरोक्षक्षरोपमा–अपरोक्षाणि क्षराणि–चञ्चलानि उपमानानि यस्याः सा तथा । किं विशिष्टो मुनिः ? अमाता–स्वजनादिसङ्गरहितः । इति ।

समाप्त

"Aho Shrut Gyanam"



શ્રી જિનશાસન જય હો !!!
॥ શ્રી ગૌતમસ્વામીને નમઃ ॥ ॥ શ્રી સુધર્માસ્વામીને નમઃ ॥

જિનશાસનના અણગાર, કલિકાલના શણગાર પૂજ્ય ભગવંતો અને જ્ઞાની પંડિતોએ શ્રુતભક્તિથી પ્રેરાઈને વિવિધ હસ્તલિખિત ગ્રંથો પરથી સંશોધન-સંપાદન કરીને અપૂર્વ જહેમતથી ઘણા ગ્રંથોનું વર્ષો પૂર્વે સર્જન કરેલ છે અને પોતાની શક્તિ, સમય અને દ્રવ્યનો સદ્વ્યય કરીને પુણ્યાનુબંધી પુણ્ય ઉપાર્જન કરેલ છે. કાળના પ્રભાવે જીર્ણ અને લુપ્ત થઈ રહેલા અને અલભ્ય બની જતા મુદ્રિત ગ્રંથો પૈકી પૂજ્ય ગુરુદેવોની પ્રેરણા અને આશીર્વાદથી સં.૨૦૬૫માં ૫૪ ગ્રંથોનો સેટ નં-૧ તથા સં.૨૦૬૬માં ૩૬ ગ્રંથોનો સેટ નં-૨ સ્કેન કરાવીને મર્યાદિત નકલ પ્રીન્ટ કરાવી હતી. જેથી આપણો શ્રુતવારસો બીજા અનેક વર્ષો સુધી ટકી રહે અને અભ્યાસુ મહાત્માઓને ઉપયોગી ગ્રંથો સરળતાથી ઉપલબ્ધ થાય.

પૂજ્ય સાધુ-સાધ્વીજી ભગવંતોની પ્રેરણાથી જ્ઞાનખાતાની ઉપજમાંથી તૈયાર કરવામાં આવેલ પુસ્તકોનો સેટ ભિન્ન-ભિન્ન શહેરોમાં આવેલ વિશિષ્ટ ઉત્તમ જ્ઞાનભંડારોને ભેટ મોકલવામાં આવ્યા હતા. આ બધાજ પુસ્તકો પૂજ્ય ગુરુભગવંતોને વિશિષ્ટ અભ્યાસ-સંશોધન માટે ખુબજ જરુરી છે અને પ્રાયઃ અપ્રાપ્ય છે. અભ્યાસ-સંશોધનાર્થે જરૂરી પુસ્તકો સહેલાઈથી ઉપલબ્ધ બને તેમજ પ્રાચીન મુદ્રિત પુસ્તકોનો શ્રુત વારસો જળવાઈ રહે તે શુભ આશયથી આ ગ્રંથોનો જીર્ણોદ્ધાર કરેલ છે. જુદા જુદા વિષયોના વિશિષ્ટ કક્ષાના પુસ્તકોનો જીર્ણોદ્ધાર પૂજ્ય ગુરૂભગવંતોની પ્રેરણા અને આશીર્વાદથી અમો કરી રહ્યા છીએ. તો અભ્યાસ તથા સંશોધન માટે વધુમાં વધુ ઉપયોગ કરીને શ્રુતભક્તિના કાર્યને પ્રોત્સાહન આપશો.

લી.શાહ બાબુલાલ સરેમલ બેડાવાળાની વંદના

**મંદિરો જીર્ણ થતાં આજકાલના સોમપુરા દ્વારા પણ ઊભા કરી શકાશે.....!**
**પણ એકાદ ગ્રંથ નષ્ટ થતા બીજા કલિકાલસર્વજ્ઞ કે**
**મહોપાધ્યાય શ્રી યશોવિજયજી ક્યાંથી લાવીશું...???**